लक्षणं पृच्छसे केन नैरात्म्यं पृच्छसे कथम्।
गर्भा नैयायिकाः[5] केन पृच्छसे मां जिनौरसाः[6] ॥८९॥
शाश्वतोच्छेददृष्टिश्च केन चित्तं समाध्यते।
अभिलापस्तथा ज्ञानं शीलं गोत्रं जिनौरसाः[7] ॥९०॥
युक्तव्याख्या गुरु[8]शिष्यः सत्त्वानां चित्रता कथम्।
अन्नपानं नभो[9] मेधा माराः प्रज्ञप्तिमात्रकम् ॥९१॥
तरुवल्ल्यः कथं केन पृच्छसे मां जिनौरस।
[9a]क्षेत्राणि चित्रता केन ऋषिर्दीर्घतपास्तथा ॥९२॥
वंशः[10] कस्ते गुरुः केन पृच्छसे मां[11] जिनौरस।
अहोऽडिमा[12] नरा योगे[13] कामधातौ न बुध्यसे ॥९३॥
सिद्धान्तो ह्यकनिष्ठेषु युक्तिं पृच्छसि मे कथम्।

[1] षि T. [2] वे A. C. I. K छे T. [3] बोध्यते (魏) (唐) Tib. [4] असत्वा (宋) (魏) Tib. [5] नैकायिकाः Tib. [6] सा in all MSS. [7] सां A. C. K. साः I. T. [8] गुरुः T. [9] ततो C. तथा I. [9a] णां I. [10] वणः A. वंश C. I. वंण K. वंस T. [11] In C. T. only. [12] अहोभिमा A. अहोहिमा I. 醜陋(宋)(魏) 體卑陋(唐) उहो° in the other MSS. [13] According to Tib. केन for योगे but the latter agrees with the Chin. version.

अभिज्ञां लौकिकां केन कथं भिक्षुत्वमेव च ॥९४॥
नैर्माणिकान्विपाकस्थान्बुद्धान्पृच्छसि मे कथम् ।
तथताज्ञानबुद्धा[1] वै संघाश्चैव कथं भवेत् ॥९५॥
वीणापणवपुष्पाभा[2] क्षेत्रालोकविवर्जिता[3] ।
चित्तं हि[4] भूमयः सप्त पृच्छसे मां जिनौरस[5] ॥९६॥
एतांश्चान्यांश्च सुबहून्प्रश्नान्पृच्छसि मां सुत ।
एकैकं लक्षणैर्युक्तं दृष्टिदोषविवर्जितम् ॥९७॥
सिद्धान्तं देशनां वक्ष्ये सहसा त्वं शृणोहि मे ।
उपन्यासं करिष्यामि पदानां शृणु मे सुत ।
अष्टोत्तरं पदशतं यथा बुद्धानुवर्णितम् ॥९८॥

[6]अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्त=मेतदवोचत् । कतमद्भगवन्नष्टोत्तरपदशतम् । भगवानाह । उत्पादपदमनुत्पादपदं नित्यपदमनित्यपदं लक्षणपदम=लक्षणपदं स्थित्यन्यथात्वपदमस्थित्यन्यथात्वपदं क्षणिकप=दमक्षणिकपदं स्वभावपदमस्वभावपदं शून्यतापदमशून्य=तापदमुच्छेदपदमनुच्छेदपदं चित्तपदमचित्तपदं[7] मध्यम-पदममध्यमपदं शाश्वतपदमशाश्वतपदं[8] प्रत्ययपदमप्रत्यय-पदं हेतुपदमहेतुपदं क्लेशपदमक्लेशपदं तृष्णापदमतृष्णा-

[1] बुद्धो ? [2] भाः in all MSS. [3] ता in all MSS. but ताः I. [4] च Tib.
[5] नो in all MSS. [6] From अथ till नाह । left out in T. [7] 邊句非邊句(宋) 心見非心見 邊見非邊見(魏) [8] 常句非常句(宋) 變見非變見(魏) 恒句非恒句(唐)

पदमुपायपदमनुपायपदं कौशल्यपदमकौशल्यपदं शुद्धि-
पदमशुद्धिपदं युक्तिपदमयुक्तिपदं दृष्टान्तपदमदृष्टान्तपदं
शिष्यपदमशिष्यपदं गुरुपदमगुरुपदं गोत्रपदमगोत्रपदं
यानत्रयपदमयानत्रयपदं निराभासपदमनिराभासपदं[1]
प्रणिधानपदमप्रणिधानपदं त्रिमण्डलपदमत्रिमण्डलपदं
निमित्तपदमनिमित्तपदं सदसत्पक्षपदमसदसत्पक्षपदमु=
भयपदमनुभयपदं स्वप्रत्यात्मार्यज्ञानपदमस्वप्रत्यात्मार्य-
ज्ञानपदं दृष्टधर्मसुखपदमदृष्टधर्मसुखपदं क्षेत्रपदमक्षेत्र-
पदमणुपदमनणुपदं जलपदमजलपदं धन्वपदमधन्वपदं
भूतपदमभूतपदं संख्यागणितपदमसंख्यागणितपदम[2]भिज्ञा-
पदमनभिज्ञापदं [3]खेदपदमखेदपदं घनपदमघनपदं शि=
ल्पकलाविद्यापदमशिल्पकलाविद्यापदं [4]वायुपदमवायु-
पदं भूमिपदमभूमिपदं चिन्त्यपदमचिन्त्यपदं[5] प्रज्ञप्तिपद=
मप्रज्ञप्तिपदं स्वभावपदमस्वभावपदं स्कन्धपदमस्कन्धपदं
सत्त्वपदमसत्त्वपदं बुद्धिपदमबुद्धिपदं निर्वाणपदमनि=
र्वाणपदं ज्ञेयपदमज्ञेयपदं तीर्थ्यपदमतीर्थ्यपदं डमरपद=
मडमरपदं मायापदममायापदं स्वप्नपदमस्वप्नपदं मरी=

[1] 所有句無所有句(宋) 寂靜見非寂靜見(魏) 無影像句非無影像句(唐) आभास-पदं निराभासपदं ? Tib. [2] In (宋) and Tib., this is divided into two. [3] खेद in all MSS. 虛空句非虛空句(宋)(唐) 虛妄見非虛妄見(魏) [4] 明處見非明處見(魏) 伎術句非伎術句(唐) left out in here, in the text. [5] चित्तपदमचित्तपदं Chin. Tib.

चिपदममरीचिपदं विम्बपदमविम्बपदं चक्रपदमचक्रपदं गन्धर्वपदमगन्धर्वपदं देवपदमदेवपदमन्नपानपदमनन्नपानपदं मै[1]थुनपदममै[1]थुनपदं दृष्ट[2]पदमदृष्ट[2]पदं पारमितापदमपारमितापदं शीलपदमशीलपदं सोमभास्करनक्षत्रपदमसोमभास्करनक्षत्रपदं सत्यपदमसत्यपदं फलपदमफलपदं निरोधपदमनिरोधपदं निरोधव्युत्थानपदमनिरोधव्युत्थानपदं चिकित्सापदमचिकित्सापदं लक्षणपदमलक्षणपदमङ्गपदमनङ्गपदं कलाविद्यापदमकलाविद्यापदं[3] ध्यानपदमध्यानपदं भ्रान्तिपदमभ्रान्तिपदं दृश्यपदमदृश्यपदं रक्ष्यपदमरक्ष्यपदं[4] वंशपदमवंशपदमृषिपदमर्षि[5]पदं राज्यपदमराज्यपदं ग्रहणपदमग्रहणपदं रत्नपदमरत्नपदं[6] व्याकरणपदमव्याकरणपदमिच्छन्तिकपदमनिच्छन्तिकपदं स्त्रीपुंनपुंसकपदमस्त्रीपुंनपुंसकपदं रसपदमरसपदं क्रिया[7]पदमक्रियापदं देहपदमदेहपदं तर्कपदमतर्कपदं चलपदमचलपदमिन्द्रियपदमनिन्द्रियपदं संस्कृतपदमसंस्कृतपदं[8] हेतुफलपदमहेतुफलपदं कनिष्ठ[9]पदमकनिष्ठपदमृतुपदमर्तु[10]पदं द्रुमगुल्मलतावितानपदम=

[1] मि T. [2] ष्टि T. [3] Left out in (唐) [4] रक्षपदमरक्षपदं Chin. Tib.
[5] मन्षृषि in all MSS. [6] 實句非實句(宋) 實見非實見(魏) but 寶句非寶句(唐)
[7] 事(宋) [8] 無爲句非無爲句 is added in (宋) [9] कनिष्ठफल T.
[10] मन्षृतु in all MSS.

द्रुमगुल्मलतावितानपदं वैचित्र्यपदमवैचित्र्यपदं देशनावतारपदमदेशनावतारपदं[1] विनयपदमविनयपदं भिक्षुपदमभिक्षुपदमधिष्ठानपदमनधिष्ठानपदमक्षरपदमनक्षरपदम्। इदं तन्महामते अष्टोत्तरपदशतं पूर्वबुद्धानुवर्णितम्[2] ॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत्। कतिविधो भगवन्विज्ञानानामुत्पादस्थितिनिरोधो भवति। भगवानाह। द्विविधो महामते विज्ञानानामुत्पत्तिस्थितिनिरोधो भवति न च तार्किका[3] अवबुध्यन्ते यदुत प्रबन्धनिरोधो लक्षणनिरोधश्च। द्विविध उत्पादो विज्ञानानां प्रबन्धोत्पादो लक्षणोत्पादश्च। द्विविधा स्थितिः प्रबन्धस्थितिर्लक्षणस्थितिश्च। त्रिविधं विज्ञानं प्रवृत्तिलक्षणं कर्मलक्षणं जातिलक्षणं च। द्विविधं महामते विज्ञानं संक्षेपेण अष्टलक्षणोक्तं ख्यातिविज्ञानं[4] वस्तुप्रतिविकल्पविज्ञानं च[4]। यथा महामते दर्पणस्य रूपग्रहणमेवं ख्यातिविज्ञानस्याख्यास्यति[5] ख्यातिविज्ञानं च महामते वस्तुप्रतिविकल्पविज्ञानं च द्वे ऽप्येते ऽभिन्नलक्षणे ऽन्योन्यहेतुके। तत्र ख्यातिविज्ञानं महामते ऽचिन्त्यवासनापरिणामहेतुकम् वस्तुप्रति=

1 決定句非決定句 is added in (唐)　2 वंर्दि A. C.　3 ता A. C. K. काः I. T.
4 नश्च A. C. I. K. नं नं च T.　5 ख्यातो T.

विकल्पविज्ञानं[1a] च महामते विषयविकल्पहेतुकमनादिकालप्रपञ्चवासनाहेतुकं च ॥

तत्र सर्वेन्द्रियविज्ञाननिरोधो महामते यदुतालयविज्ञानस्याभूतपरिकल्पवासनावैचित्र्यनिरोधः एष हि महामते लक्षणनिरोधः। प्रबन्धनिरोधः पुनर्महामते यस्माच्च[1] प्रवर्तते। यस्मादिति महामते यदाश्रयेण[2] यदालम्बनेन[3] च। तत्र यदाश्रयमनादिकालप्रपञ्चदौष्ठुल्यवासना यदालम्बनं स्वचित्तदृश्यविज्ञानविषये विकल्पाः। तद्यथा महामते मृत्परमाणुभ्यो मृत्पिण्डो न चान्यो नानन्यस्तथा सुवर्णं भूषणात्। यदि च महामते मृत्पिण्डो मृत्परमाणुभ्यो ऽन्यः स्यात्तैर्नारब्धः स्यात्स चारब्धस्तैर्मृत्परमाणुभिः तस्मान्नान्यः। अथानन्यः स्यात्मृत्पिण्डपरमाण्वोः प्रतिभागो न स्यात्। एवमेव महामते प्रवृत्तिविज्ञानान्यालयविज्ञानजातिलक्षणादन्यानि स्युरनालयविज्ञानहेतुकानि स्युः। अथानन्यानि प्रवृत्तिविज्ञाननिरोध[4] आलयविज्ञाननिरोधः स्यात्स च न भवति स्वजातिलक्षणनिरोधः। तस्मान्महामते न स्वजातिलक्षणनिरोधो विज्ञानानां किंतु कर्मलक्षणनिरोधः। स्वजातिलक्षणे पुनर्निरुध्यमान[5] आलयविज्ञाननिरोधः स्यात्। आलय-

[1a] ख्यातिविज्ञानं is added in I. [1] यस्मान्न Tib. [2] आश्रय 依(宋) 依法(魏) 所依因(唐)
[3] आलम्बन 緣(宋) 依緣(魏) 所緣(唐) [4] धे in all MSS. [5] ने in all MSS. रूध्यमाणे I.

विज्ञाने पुनर्निरूप्यमाणे[1] निर्विशिष्टस्तीर्थकरोच्छेदवादे= नायं वादः स्यात्। तीर्थकराणां महामते अयं वादो यदुत विषयग्रहणोपरमाद्विज्ञानप्रबन्धोपरमो[2] भवति वि= ज्ञानप्रबन्धोपरमादनादिकालप्रबन्धव्युच्छित्तिः[3] स्यात्। कारणतश्च महामते तीर्थकराः प्रबन्धप्रवृत्तिं वर्णयन्ति न चक्षुर्विज्ञानस्य रूपालोकसमुदयत[4] उत्पत्तिं वर्णयन्ति अन्यत्र कारणतः। कारणं पुनर्महामते प्रधानपुरुषेश्वर[5]- कालानुप्रवादाः॥

पुनरपरं महामते सप्तविधो भावस्वभावो भवति यदुत समुदय[6]स्वभावो भावस्वभावो लक्षणस्वभावो महाभूत- स्वभावो हेतुस्वभावः[7] प्रत्ययस्वभावो निष्पत्तिस्वभावश्च सप्तमः॥

पुनरपरं महामते सप्तविधः परमार्थो यदुत चित्तगो= चरो ज्ञानगोचरः[8] प्रज्ञागोचरो[9] दृष्टिद्वयगोचरो[10] दृष्टिद्व= यातिक्रान्तगोचरः[11] सुत[12]भूम्यनुक्रमणगोचरः तथागतस्य[13] प्रत्यात्मगति[14]गोचरः॥

[1] ने in all MSS. निरुध्यमाने Tib. [2] प्रवृत्यो T. [3] त्यित्तिः A. C. K. छित्तिः I. न्यित्तः T. [4] मुद्रयत A. K. मुदयत C. T. मुद्रपते I. [5] षश्चिर A. C. K. षश् चिर I. षेश्वर T. [6] भाव is added in T. [7] Left out in C. [8] In I. (宋)(魏) only. [9] Left out in Tib. [10] left out in I. [11] अदृष्टिगोचरः is added in Tib. [12] सूत्र A. C. I. K. सत T. but 超子地(宋)(唐) 過佛子地(魏) so that तु ought to be ति as in Tib. also. [13] स्य left out in I. [14] प्रत्यात्मगति left out in C.

एतन्[1]महामते अतीतानागतप्रत्युत्पन्नानां तथागतानामर्हतां सम्यक्संबुद्धानां भावस्वभावपरमार्थहृदयं[2] येन समन्वागतास्तथागता लौकिकलोकोत्तरतमान्धर्मानार्येण प्रज्ञाचक्षुषा स्वसामान्यलक्षणपतितान्व्यवस्थापयन्ति । तथा च व्यवस्थापयन्ति यथा तीर्थकरवादकुदृष्टिसाधारणा न भवन्ति । कथं च[3] महामते तीर्थकरवादकुदृष्टिसाधारणा भवन्ति यदुत स्वचित्त[4]विषयविकल्पदृष्ट्यनवबोधनाद्विज्ञानानां स्वचित्तदृश्यमात्रानवतारेण महामते बालपृथग्जना भावाभावस्वभावपरमार्थदृष्टिद्वयवादिनो भवन्ति ॥

पुनरपरं महामते विकल्पभवत्रयदुःखविनिवर्तनमज्ञानतृष्णाकर्मप्रत्यय[5]विनिवृत्तिं स्वचित्तदृश्यमायाविषयानुदर्शनं भाषिष्ये । ये केचिन्महामते श्रमणा[6] वा ब्राह्मणा वाभूत्वा श्रद्धा[7] हेतुफलाभिव्यक्ति[8]द्रव्यं च कालावस्थितं प्रत्ययेषु च स्कन्धधात्वायतनानामुत्पादस्थितिं चेच्छन्ति भूत्वा च व्ययम् । ते महामते संततिक्रियोत्पादभङ्ग[9]भवनिर्वाणमार्गकर्मफलसत्यविनाशोच्छेदवादिनो भवन्ति ।

[1] एवं A. C. I. K. एतं T. [2] यं in I. T. only. [3] न (魏) Tib. [4] चित्त left out in T. Tib. [5] प्रत्यय left out in C. I. [6] व A. C. K. T. म I. [7] सद्धा T. सतां (魏) Tib. [8] क्ति Tib. [9] भङ्ग left out in A. T. (宋) Tib. भव is added in K. (魏) भङ्गव C. भगवन् I.

तत्कस्य हेतोर्यदिदं प्रत्यक्षानुपलब्धेराद्य[1]दर्शनाभावात् । तद्यथा महामते घटकपालाभावो घटकृत्यं न करोति नापि दग्धवीजमङ्कुरकृत्यं करोति । एवमेव महामते ये[2] स्कन्धधात्वायतनभावा निरुद्धा निरुध्यन्ते निरोत्स्यन्ते[3] स्वचित्तदृश्यविकल्पदर्शनाहेतुत्वान्नास्ति[4] नैरन्तर्यप्रवृत्तिः ॥

यदि पुनर्महामते अभूत्वा श्रद्धा[5] विज्ञानानां त्रिसंगतिप्रत्ययक्रियायोगेनोत्पत्तिरभविष्यदसतामपि महामते कूर्मरोम्नामुत्पत्तिरभविष्यत्सिकताभ्यो वा तैलस्य । प्रतिज्ञाहानिर्नियमनिरोधश्च महामते प्रसज्यते क्रियाकर्मकर[6]णवैयर्थ्यं च सदसतो ब्रुवतः । तेषामपि महामते त्रिसंगतिप्रत्ययक्रियायोगेनोपदेशो विद्यते हेतुफलस्वलक्षणतयातीतानागतप्रत्युत्पन्नासत्सल्लक्षणास्तितां[7] युक्त्यागमैस्तर्कभूमौ वर्तमाना स्वदृष्टिदोषवासनतया निर्देक्ष्यन्ति । एवमेव महामते बालपृथग्जनाः कुदृष्टिदष्टा[8] विषममतयो ऽज्ञैः प्रणीतं सर्वज्ञप्रणीतमिति वक्ष्यन्ति ॥

ये[9] पुनरन्ये महामते श्रम[10]णा वा[11] ब्राह्मणा वा निःस्व-

[1] अय A. आप C. K. T. आद्य I. [2] ते (魏) Tib. [3] ते seems to be here in (唐) [4] दर्शनात्तेषां नास्ति (魏) दर्शना अहेतुत्वान्नास्ति (唐) दर्शनहेतुत्वा=दात्तेषां नास्ति Tib. तेषां is added in I. [5] श्रद्धो A. K. श्रद्धा C. सर्वा I. सद्धा T. सतां (魏) Tib. [6] ण in all MSS., but (宋) (魏) Tib. [7] °त्पंनात्संदर्शनलक्षणास्यिता in all MSS., but नासदसल्लक्षणास्तिता T. °स्तितां Tib. [8] °ष्टिदूष्टा I. K. °ष्टिदष्टा T. [9] वा is added in I. K. [10] व in all MSS. [11] वा in K. T. only.

भावघनालातचक्रगन्धर्वनगरानुत्पादमायामरीच्युदकचन्द्र-
स्वप्न[1]स्वभावबाह्यचित्तदृश्यविकल्पानादिकालप्रपञ्चदर्शने=
न स्वचित्तविकल्पप्रत्ययविनिवृत्तिरहिताः परिकल्पि[2]ताभि=
धा[3]नलक्ष्य[4]लक्षणाभिधेयरहिता दे[5]हभोगप्रतिष्ठा[6]समालय-
विज्ञान[7]विषयग्राह्यग्राहकविसंयुक्तं निराभासगोचरमुत्पा=
दस्थितिभङ्गवर्ज्यं स्वचित्तोत्पादानुगतं विभावयिष्यन्ति न-
चिरात्ते महामते बोधिसत्त्वा महासत्त्वाः संसारनिर्वाण-
समताप्राप्ता भविष्यन्ति। महाकरुणोपायकौशल्यानाभो=
गगतेन महामते प्रयोगेन सर्वसत्त्वमायाप्रतिविम्बसमत=
यानारब्धप्रत्ययतयाध्यात्म[7a]बाह्यविषयविमुक्ततया चित्तबा=
ह्यादर्शनतयानिमित्ताधिष्ठानानुगता अनुपूर्वेण भूमिक्रम-
समाधिविषयानुगमनतया त्रैधातुकस्वचित्ततयाधिमुक्ति=
तः प्रतिविभावयमाना मायोपमसमाधिं प्रतिलभन्ते।
स्वचित्तनिराभासमात्रावतारेण प्रज्ञापारमिताविहारानु=
प्राप्ता उत्पादक्रियायोगविरहिताः समाधिवज्रविम्बोपमं
तथागतकायानुगतं तथतानिर्माणानुगतं बलाभिज्ञा[8]वशि=
ताकृपाकरुणो[9]पायमण्डितं सर्वबुद्धक्षेत्रतीर्थ्यायतनोपगतं[10]

[1] स्वप्न left out in T. भावा K. स्वभाव left out in (魏) Tib. [2] ल्लि A. C. K. ल्लि I. T. [3] ना in all MSS., but (宋) Tib. [4] लक्ष्य left out in A. K. [5] देश Tib. [6] स A. C. भा I. भ K. [7] नं विषये A. C. K. नं विषय I. नविषय T. [7a] यताया अनात्म I. [8] ज्ञ in all MSS. [9] कृपो instead of कृपाकरुणो in T. [10] पभागं T. पगमं in all other MSS.

चित्तमनोमनोविज्ञानरहितं परावृत्त्यानुश्र[1]यानुपूर्वकं तथागतकायं[2] महामते ते[3] बोधिसत्त्वाः प्रतिलप्स्यन्ते । तस्मात्तर्हि महामते बोधिसत्त्वैर्महासत्त्वैः तथागतकायानुगमेन प्रतिलाभिना स्कन्धधात्वायतनचित्तहेतुप्रत्ययक्रिया-योगोत्पादस्थितिभङ्गविकल्पप्रपञ्चरहितैर्भवितव्यं चित्तमात्रानुसारिभिः ॥

अनादिकालप्रपञ्चदौष्ठुल्य[4]विकल्पवासनहेतुकं त्रिभवं पश्यतः निराभासबुद्धभूम्यनुत्पादस्मरणतया प्रत्यात्मार्यधर्मगतिंगतः स्वचित्तवशवर्त्य[5]नाभोगचर्यागतिंगतो विश्वरूपमणिसदृशः सूक्ष्मैः सत्त्वचित्तानुप्रवेशकैर्निर्माणविग्रहैश्चित्तमात्रावधारणतया भूमिक्रमानुसंधौ[6] प्रतिष्ठापयति[7] । तस्मात्तर्हि महामते बोधिसत्त्वेन महासत्त्वेन स्वसिद्धान्तकुशलेन भवितव्यम् ॥

पुनरपि महामतिराह । देशयतु मे भगवंश्चित्तमनोमनोविज्ञानपञ्चधर्मस्वभावलक्षणकुसुमधर्मप[8]र्यायं बुद्धबोधिसत्त्वानुयातं[9] स्वचित्तदृश्यगोचरविसंयोजनं सर्वभाष्य[10]युक्तितत्त्वलक्षणविदारणं सर्वबुद्धप्रवचनहृदयं लङ्कापुरिगिरिमलये निवासिनो बोधिसत्त्वानारभ्योदधितरङ्गाल-

[1] परावृत्ताश्रया ? [2] तथा कार्यं A. [3] Left out in I. [4] दौष्टुल्य A. C. K. T. दौष्कल्प I. [5] वर्ती अना A. वर्ति अना C. [6] संबोधौ C. [7] मार्गयति A. [8] कुसुमप A. कुसुममप C. [9] यातस्व A. [10] ष्यं in all MSS., but T. (宋)(魏) Tib.

यद्विज्ञानगोचरं धर्मकायं तथागतानुगीतं प्रभाषस्व ॥

अथ खलु भगवान्पुनरेव महामतिं बोधिसत्त्वं महा-
सत्त्वमेतदवोचत् । चतुर्भिर्महामते कारणैश्चक्षुर्विज्ञानं
प्रवर्तते । कतमैश्चतुर्भिर्यदुत स्वचित्तदृश्यग्रहणानवबोधतो[1]
ऽनादिकालप्रपञ्चदौष्ठुल्य[2]रूपवासनाभिनिवेशतो विज्ञान-
प्रकृतिस्वभावतो विचित्ररूपलक्षणकौतूहलतः । एभिर्म=
हामते चतुर्भिः कारणैरोघान्तर[3]जलस्थानीयादालयविज्ञा=
नात्प्रवृत्तिविज्ञानतरङ्ग उत्पद्यते । यथा[4] महामते चक्षु=
र्विज्ञान[5] एवं सर्वेन्द्रियपरमाणुरोमकूपेषु युगपत्प्रवृत्तिक्र=
मविषयादर्शविम्बदर्शनवत् उदधेः पवनाहता इव महा-
मते विषयपवनचित्तोदधितरङ्गा अव्यु[6]च्छिन्नहेतुक्रियाल=
क्षणा अन्योन्यविनिर्मुक्ताः कर्मजातिलक्षण[7]सुविनिबद्धरू=
पस्वभावानवधारिणो महामते पञ्चविज्ञानकायाः प्रवर्त=
न्ते । सह तैरेव महामते पञ्चभिर्विज्ञानकायैर्हेतुविषयप[8]=
रिच्छेदलक्षणावधारकं नाम मनोविज्ञानं तद्धेतु[9]जशरीरं
प्रवर्तते । न च तेषां तस्य चैवं भवति वयमत्रान्योन्यहे=
तुकाः स्वचित्तदृश्यविकल्पाभिनिवेशप्रवृत्ता इति ॥

अथ चान्योन्याभिन्नलक्षणसहिता प्रवर्तन्ते विज्ञप्तिवि=

[1] नवबो I. [2] दोस्फुल्य A. दौस्फुल्य C. दौष्ठूल्य I. दौस्कुल्य K. दौष्ठुल्यं T.
[3] अन्तर left out in T. Tib. [4] तथा A. C. K. यथा I. T. [5] नेन I. [6] अभ्यु I.
[7] णे A. C. K. णो I. ण T. [8] ये प I. [9] तु अ in all MSS. तुज Tib.

[1]षयपरिच्छेदे । तथा च प्रवर्तमानाः प्रवर्तन्ते यथा समा=
पन्नस्यापि योगिनः सूक्ष्मगतिवासनाप्रवृत्ता न[2] प्रज्ञायन्ते ।
योगिनां चैवं भवति निरोध्य विज्ञानानि समापत्स्यामह
इति । ते चानिरुद्धैरेव विज्ञानैः समापद्यन्ते वासनावी=
जानिरोधादनिरुद्धा विषयप्रवृत्तग्रहणवैकल्या[3]न्निरुद्धाः ।
एवं सूक्ष्मो[4] महामते आलयविज्ञानगतिप्रचारो यत्तथा=
गतं स्थापयित्वा भूमिप्रतिष्ठितांश्च बोधिसत्त्वान्न सुकरम=
न्यैः श्रावकप्रत्येकबुद्धतीर्थ्ययोगयोगिभिरभिगन्तुं समाधि-
प्रज्ञाबलाधानतोऽपि वा परिच्छेत्तुम् । अन्यत्र भूमिल=
क्षणप्रज्ञाज्ञानकौशलपदप्रभेदविनिश्चयजिनानन्त[5]कुशलमू=
लोपचयस्वचित्तदृश्यविकल्पप्रपञ्चविरहितैर्वनगहनगुहाल=
यान्तर्गतैर्महामते हीनोत्कृष्टमध्यमयोग[6]योगिभिः न[7] शक्यं
स्वचित्तविकल्पदृश्यधाराद्रष्ट्र[8]नन्तक्षेत्रजिनाभिषेकवशिताब=
लाभिज्ञासमाधयः प्राप्तुम् । कल्याणमित्रजिनपुरस्कृतैर्म=
हामते शक्यं चित्तमनो[9]विज्ञानं स्वचित्तदृश्यस्वभावगोच=
रविकल्पसंसारभवोदधिं कर्मतृष्णाज्ञानहेतुकं तर्तुम् । अत
[10]एतस्मात्कारणान्महामते योगिना कल्याणमित्रजिनयोगे

[1] विषय A. left out in C. विषये I. K. T. [2] Left out in A. [3] प्रवृत्तवैकल्य-ग्रहणा A. I. प्रवृत्तिग्रहणवैकल्पा T. [4] शूक्ष्मा A. C. K. सूक्ष्मो I. शूक्ष्मौ T. [5] ज्ञानारम्भ A. I. K. [6] योग left out in T. [7] न left out in all MSS., but I. T. [8] धारां द्रष्टुं अन A. C. K. धारा द्रष्टुम् अन I. धाराद्रष्टन (宋) (唐) Tib. [9] मनो is repeated in Chin. Tib. [10] एव त T.

योगः प्रारब्धव्यः ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

तरङ्गा ह्युदधेर्यद्वत्पवनप्रत्ययेरिताः ।
नृत्यमानाः प्रवर्तन्ते व्युच्छेदश्च न विद्यते ॥९९॥
आलयौघस्तथा नित्यं विषय[1]पवनेरितः ।
चित्रैस्तरङ्गविज्ञानैर्नृत्यमानः प्रवर्तते ॥१००॥
नीले रक्ते ऽथ लवणे शङ्खे क्षीरे च शार्करे ।
कषायैः फलपुष्पाद्यैः किरणा यथ भास्करे ॥१०१॥
न चान्येन च नानन्येन[2] तरङ्गा ह्युदधेर्मता ।
विज्ञानानि तथा सप्त चित्तेन सह संयुताः ॥१०२॥
उदधेः परिणामो ऽसौ तरङ्गाणां विचित्रता ।
आलयं हि तथा चित्रं विज्ञानाख्यं प्रवर्तते ॥१०३॥
चित्तं मनश्च विज्ञानं लक्षणार्थं प्रकल्प्यते ।
अभिन्नलक्षणा ह्यष्टौ न लक्ष्या न च लक्षणम्[3] ॥१०४॥
उदधेश्च तरङ्गाणां यथा नास्ति विशेषणम्[4] ।
विज्ञानानां तथा चित्तैः[5] परिणामो न[6] लभ्यते ॥१०५॥
चित्तेन चीयते कर्म मनसा च विचीयते[7] ।
विज्ञानेन विजानाति दृश्यं कल्पेति पञ्चभिः ॥१०६॥

[1] यः T. [2] This quarter ought to be न चानन्ये न चान्ये च ? [3] णां A. C. K. णा I. णं T. काः (唐) Tib. [4] णा A. C. I. K. णं T. [5] चित्ते in all MSS. [6] नोप T. [7] ची A. C. विधी I. चि K. विची T.

नीलरक्तप्रकारं हि विज्ञानं ख्यायते नृणाम् ।
तरङ्गचित्तसाधर्म्यं वद कस्मान्महामते[1] ॥१०७॥[2]
नीलरक्तप्रकारं हि तरङ्गेषु न विद्यते ।
वृत्तिश्च वर्ण्यते[3] चित्तं[4] लक्षणार्थं हि बालिशान्[5] ॥१०८॥
न[6] तस्य विद्यते वृत्तिः स्वचित्तं ग्राह्यवर्जितम् ।
ग्राह्ये सति हि वै ग्राहस्तरङ्गैः सह साध्यते ॥१०९॥
देहभोगप्रतिष्ठानं[7] विज्ञानं ख्यायते नृणाम् ।
तेनास्य दृश्यते वृत्तिस्तरङ्गैः सह सादृशा ॥११०॥
उदधिस्त[8]रङ्गभावेन नृत्यमानो विभाव्यते ।
आलयस्य तथा वृत्तिः कस्माद्बुद्ध्या[9] न गम्यते[10] ॥१११॥[11]
बालानां बुद्धिवैकल्या[12]दालयं ह्युदधि[13]र्यथा ।
तरङ्गवृत्तिसाधर्म्यं दृष्टान्तेनोपनीयते ॥११२॥
उदेति भास्करो यद्वत्समहीनोत्तमे जिने ।
तथा त्वं लोकप्रद्योत तत्त्वं देशे[14]सि बालिशान् ॥११३॥[15]

[1] मुने (唐) Tib. [2] In the three Chin. versions, v. 107 is said to be the question of Mahāmati, and v. 108, the answer of the Bhagavat. [3] र्ख्य A. C. I. K. न वर्ण्य T. [4] चित्ते in all MSS. [5] णा A. K. शान् C. शाः I. सां T. [6] न left out in C. [7] सं in all MSS. नं I. नं विज्ञानं left out in T. भं Tib. [8] अब्धिस्त ? [9] ध्या in all MSS. [10] रा A. C. K. T. [11] In 1st and 3rd Chin., v. 111 is said to be the question of the Mahāmati, and v. 112, the answer of the Bhagavat. [12] ल्या I. [13] धे A. C. I. K. धं T. [14] णां A. K. शां C. शान् I. सान् T. [15] In 1st and 3rd Chin., v. 113 and a half of v. 114 are said to be the question of Mahāmati, and the rest, the answer of the Bhagavat. But in 2nd Chin., v. 113 and all the rest are said to be the question of Mahāmati.

कृत्वा धर्मेष्ववस्थानां[1] कस्मात्तत्त्वं न भाषसे ।
भाषसे[2] यदि वा[3] तत्त्वं चित्ते तत्त्वं न विद्यते ॥११४॥
उदधेर्यथा[4] तरङ्गा हि दर्पणे सुपिने यथा ।
दृश्यन्ति युगपत्काले तथा चित्तं स्वगोचरे[5] ॥११५॥
वैकल्या[6]द्विषयाणां[7] हि क्रमवृत्त्या प्रवर्तते ।
विज्ञानेन विजानाति मनसा मन्यते पुनः ॥११६॥
पञ्चानां ख्यायते दृश्यं क्रमो नास्ति समाहिते ।
चित्राचार्यो यथा कश्चिच्चित्रान्तेवासिको ऽपि वा ॥११७॥
चित्रार्थे नाम[8]येद्रङ्गा[9]न्देशयामि तथा ह्यहम् ।
रङ्गे[10] न विद्यते चित्रं न भूमौ न च भाजने ॥११८॥
सत्त्वानां कर्षणा[11]र्थाय रङ्गैश्चित्रं विकल्प्यते[12] ।
देशना व्यभिचारं[13] च तत्त्वं ह्यक्षरवर्जितम् ॥११९॥
कृत्वा धर्मेष्ववस्थानं तत्त्वं देशेमि योगिनाम् ।
तत्त्वं प्रत्यात्मगतिकं कल्प्य[14]कल्पेन[15] वर्जितम् ॥१२०॥
देशेमि जिनपुत्राणां नेयं बालान देशनाः[16] ।
विचित्रा हि यथा माया दृश्यते न च विद्यते ॥१२१॥
देशनापि तथा चित्रा देश्यते व्यभिचारिणी ।

[1] नं I. [2] भाषामि ? [3] वै in all MSS. वा Tib. [4] अब्धौ यथा ? [5] तु is added in T. [6] ल्या I. [7] नां A. C. I. K. णां T. [8] न्यास Tib. [9] गां A. C. K. गान् I. गा T. [10] रंगे A. K. T. रंगे C. रंगेन I. [11] हर्षणा° 爲悅 (宋)(唐) [12] ल्प I. [13] व्यभिचारिणी Chin. Tib. [14] कल्प्य left out in A. K. [15] कल्पेन left out in C. कल्प्येन I. [16] बालानां देशनाद्वियं T. देशना Tib.

देशना हि यदन्यस्य[1] तदन्यस्याप्यदेशना ॥१२२॥
आतुरे आतुरे यद्वद्भिषग्द्रव्यं प्रयच्छति ।
बुद्धा हि तद्वत्सत्त्वानां चित्तमात्रं वदन्ति वै ॥१२३॥
तार्किकाणाम[2]विषयं श्रावकाणां न चैव हि ।
यं दे[illegible]न्ति वै नाथाः प्रत्यात्मगतिगोचरम् ॥१२४॥

पुनरपरं महामते बोधिसत्त्वेन स्वचित्तदृश्यग्राह्यग्राहकविकल्पगोचरं परिज्ञातुकामेन संगणि[3]का[4]संसर्ग[5]मिद्ध[6]निवरण[7]विगतेन भवितव्यम् । प्रथममध्यमपश्चाद्रात्रजागरिकायोगम[8]नुयुक्तेन भवितव्यम् । कुतीर्थ्यशास्त्राख्यायिकाश्रावकप्रत्येकबुद्धयानलक्षण[9]विरहितेन च[10] भवितव्यम् । स्वचित्तदृश्यविकल्पलक्षणगतिंगतेन च[10] भवितव्यं बोधिसत्त्वेन महासत्त्वेन ॥

पुनरपरं महामते बोधिसत्त्वेन महासत्त्वेन चित्तविज्ञा[11]नप्रज्ञा[12]लक्षणव्यवस्थायां[13] स्थित्वोपरिष्टादार्यज्ञानलक्षणत्रययोगः[14] करणीयः । तत्रोपरिष्टादार्यज्ञानलक्षणत्रयं महामते कतमद्यदुत निराभासलक्षणं सर्वबुद्धस्वप्रणिधानाधिष्ठानलक्षणं प्रत्यात्मार्यज्ञानगतिलक्षणं च । यान्यधि=

[1] से A. त्र C. स्य I. K. T. [2] काणां न ? [3] णि in C. I. only. [4] 群聚(宋) 憒閙(魏)(唐) [5] 習俗(宋) 昏滯(唐) [6] सिद्ध I. 睡眠 Chin. [7] 蓋 (魏) [8] योगानु ? [9] लक्षण left out in I. [10] Left out in T. [11] नं A. C. K. [12] चित्तप्रज्ञाज्ञानलक्षण Tib. cf. p.50, l.1. [13] यां स्थि left out in A. [14] गैः A. K.

गम्य योगी खञ्जगर्दभ इव चित्तप्रज्ञाज्ञानलक्षणं हित्वा जिनसुताष्टमीं प्राप्य भूमिं[1] तदुत्तरे[2] लक्षणत्रये योगमापद्यते ॥

तत्र निराभासलक्षणं पुनर्महामते सर्वश्रावकप्रत्येकबुद्धतीर्थ[3]लक्षणपरिचयात्प्रवर्तते । अधिष्ठानलक्षणं पुनर्महामते पूर्वबुद्धस्वप्रणिधानाधिष्ठानतः प्रवर्तते । प्रत्यात्मार्यज्ञानगतिलक्षणं पुनर्महामते सर्वधर्मलक्षणानभिनिवेशतो मायोपमसमाधिकायप्रतिलम्भाद्बुद्धभूमिगतिगमनप्रचारात्प्रवर्तते । एतन्महामते आर्याणां लक्षणत्रयं येनार्येण लक्षत्रयेण समन्वागता आर्याः स्वप्रत्यात्मार्यज्ञानगतिगोचरमधिगच्छन्ति । तस्मात्तर्हि महामते आर्यज्ञानलक्षणत्रययोगः करणीयः ॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरेव तस्या बोधिसत्त्वपर्षदश्चित्ताशयविचारमाज्ञाय आर्यज्ञानवस्तु[4]प्रविचयं नाम धर्मपर्यायं सर्वबुद्धाधिष्ठानाधिष्ठितो भगवन्तं परिपृच्छति स्म । देशयतु मे भगवानार्यज्ञानवस्तुप्रविचयं नाम[5] धर्मपर्यायमष्टोत्तरपदशतप्रभेदाश्रयं य[6]माश्रि[7]त्य तथागता अर्हन्तः सम्यक्संबुद्धा बोधिसत्त्वानां

[1] मि C. I. [2] न उत्तरे A. तदन्तरे C. I. तदत्तरे K. यदुत्तरे T. [3] र्थ्यं T.
[4] स्वभाव is added in (宋) Tib. [5] यं नाम A. K. यस्वभाव C. I. T. [6] स in all MSS. [7] सृ A. C. I. K. शृ T.

महासत्त्वानां स्वसामान्यलक्षणपतितानां परिकल्पितस्व-
भावगतिप्रभेदं देशयन्ति । येन परिकल्पितस्वभावगति-
प्रभेदेन सुप्रतिविभाग[1]विद्धेन पुद्गलधर्मनैरात्म्यप्रचरं[1a] प्रति=
विशोध्य भूमिषु कृतविद्याः सर्वश्रावकप्रत्येकबुद्धतीर्थ[2]कर-
ध्यानसमाधिसमापत्तिसुखमतिक्र[3]म्य तथागता[4]चिन्त्यविष=
यप्रचारगतिप्रचारं[5] पञ्चधर्मस्वभावगतिविनिवृत्तं तथागतं
[6]धर्मकायं प्रज्ञाज्ञानसुनिबद्धधर्मं माया[7]विषयाभिनिवृ[8]त्तं
सर्वबुद्धक्षेत्रतुषितभवनाकनिष्ठालयोपगं तथागतकायं प्र=
तिलभेरन् ॥

भगवानाह । इह महामते एके तीर्थ्यास्तीर्थ्यदृष्टयो ना=
स्तित्वाभिनिविष्टा [9]विकल्पबुद्धिहेतुक्षयस्वभावाभावान्[10]ना=
स्ति शशस्य विषाणं विकल्पयन्ति । यथा शशविषाणं
नास्ति एवं सर्वधर्माः ॥ अन्ये पुनर्महामते भूतगुणाणुद्र=
व्यसंस्थानसंनिवेशविशेषं[10a] दृष्ट्वा नास्ति शशशृङ्गाभिनिवे=
शाभिनिविष्टा अस्ति गोशृङ्गमिति कल्पयन्ति ॥ ते महा-
मते अन्तद्वयदृष्टिपतिताश्चित्तमात्रानवधारितमतयः स्व-
चित्तधातुविकल्पेन[11] ते पुष्णन्ति देहभोगप्रतिष्ठागतिवि=

[1] गा T. [1a] प्रचारं I. [2] र्थ्य T. [3] क्र T. क्रा in all other MSS.
[4] यता A. K. तयता C. I. तथागता T. [5] विषयगतिपरं T. [6] तध or तथागतं ध Tib. [7] गोचर is added in all MSS. [8] र्वृ T. [9] बुद्ध is added in A. C. K. [10] वः ना A. C. K. वा ना I. T. [10a] षणं I. [11] कल्पनं T.

कल्पमात्रे महामते शशशृङ्गं नास्त्यस्तिविनिवृत्तं[1] न कल्पयेत्[2] [3]तथा महामते सर्वभावानां नास्त्यस्तिविनिवृत्तं[4] न कल्पयितव्यम्[4] ॥

ये पुनर्महामते नास्त्यस्तिविनिवृत्ता[5] नास्ति शशशृङ्गं [6]न कल्पयन्ति तैरन्योन्यापेक्षहेतुत्वान्नास्ति शशविषाणमिति न कल्पयितव्यम् ॥ आपरमाणुप्रविचयाद्वस्त्वनुप[6a]लब्धभावान्महामते आर्यज्ञानगोचरविनिवृत्तमस्ति गोशृङ्गमिति न कल्पयितव्यम् ॥[7]

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । ननु भगवन्विकल्पस्याप्रवृत्ति[8]लक्षणं दृष्ट्वानुमिमीमहे विकल्पाप्रवृत्त्यपेक्षं तस्य नास्तित्वम् । भगवानाह । न हि महामते विकल्पाप्रवृत्त्य[9]पेक्षं तस्य नास्तित्वम् । तत्कस्य हेतोर्विकल्पस्य तत्प्रवृत्तिहेतुत्वात् । तद्विषाणाश्रयप्रवृत्तो हि महामते विकल्पो यस्मा[10]द्विषाणाश्रयप्रवृत्तो महामते विकल्पस्तस्मादाश्रयहेतुत्वादन्या[11]नन्यविवर्जितत्वान्न हि तदपे[12]क्षं नास्तित्वं शशविषाणस्य । यदि पुनर्महामते विकल्पोऽन्यः स्याच्छशविषाणादवि=

[1] वृत्ता K. [2] कल्पयितव्यं ॥ K. [3] From तथा till तव्यं left out in K. [4] त्ता °व्यम् I. त्ता °व्याः T. [5] त्तं T. [6] न left out in T. °शृङ्गमिति for °शृङ्गं न Tib. [6a] ब्ध्य I. [7] This whole paragraph left out in C. [8] र् in I. only. [9] त्ये A. I. K. [10] ल्पः धर्माः A. ल्पः धर्मा C. ल्पधर्मा I. विल्पः धर्म K. ल्पः यस्माद्वि T. [11] न्यो A. I. [12] प्य A. K. पे C. T. प I.

षाणहेतुकः स्यादथानन्यः स्यात्तद्धेतुकत्वादापरमाणुप्रविचयानुपलब्धेर्विषाणादनन्यत्वात्तदभावः स्यात् । तदुभयभावाभावात्कस्य किमपेक्ष्य नास्तित्वं[1] भवति ॥

अथ न[2] भवति महामते अपेक्ष्य[3] नास्तित्वं शशविषा[4]णस्य अस्तित्वमपेक्ष्य नास्तित्वं शशविषाणं[5] न कल्पयितव्यं विषमहेतुत्वान्महामते नास्त्यस्तित्वं सिद्धिर्न भवति नास्त्यस्तित्ववादिनाम् ॥ अन्ये पुनर्महामते तीर्थकरदृष्टयो रूपकारणसंस्थानाभिनिवेशाभिनिविष्टा आकाशभावापरिच्छेदकुशला रूपमाकाशभावविगतं परिच्छेदं दृष्ट्वा विकल्पयन्ति । आकाशमेव च[6] महामते रूपम् । रूपभूतानुप्रवेशान्[7]महामते रूपमेवाकाशम् । आधेयाधारव्यवस्थानभावेन महामते रूपाकाशकारणयोः प्रविभागः प्रत्येतव्यः । भूतानि महामते प्रवर्तमानानि परस्परस्व[8]लक्षणभेदभिन्नानि आकाशे चाप्रतिष्ठितानि न च तेष्वाकाशं नास्ति । एवमेव शशस्य विषाणं महामते गोविषाणमपेक्ष्य भवति । गोविषाणं पुनर्महामते अणुशो विभज्यमानं पुनरप्यणवो विभज्यमाना अणुत्व[9]लक्षणे नावतिष्ठन्ते । तस्य किमपेक्ष्य[10] नास्तित्वं भवति । अथान्यदपेक्ष्य-

[1] त्वे I. [2] नु A. C. I. K. [3] अपक्ष्यं I. [4] गो for शश in Tib. [5] विषाणस्य ?
[6] मेव च left out in C. [7] शार्भ A. K. शाम्भ C. I. शात्म T. [8] स्व left out in T.
[9] त्वं A. C. I. K. त्व T. [10] क्ष्यना A. C. K. क्षना I. क्ष्य T.

वस्तु तदप्येवं[1]धर्मि ॥

अथ खलु भगवान्पुनरपि महामतिं बोधिसत्त्वं महासत्त्वमेतदवोचत् । शशगोशृङ्गाकाशरूपदृष्टिविकल्पविगतेन महामते भवितव्यम् । तदन्यैश्च बोधिसत्त्वैः स्वचित्तदृश्यविकल्पा[1a]नुगम[1b]मनसा च महामते भवि[2]तव्यम् । सर्वजिनसुतक्षेत्रमण्डले च त्वया स्वचित्तदृश्ययोगोपदेशः करणीयः ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत[3] ॥

दृश्यं न विद्यते चित्तं[4] चित्तं दृश्यात्प्रवर्तते[5] ।
देहभोगप्रतिष्ठानमालयं ख्यायते नृणाम् ॥१२५॥
चित्तं मनश्च विज्ञानं स्वभावं धर्मपञ्चकम् ।
नैरात्म्यं द्वितयं[6] शुद्धं प्रभाषन्ते विनायकाः ॥१२६॥
दीर्घह्रस्वादिसंबन्धमन्योन्यतः प्रवर्तते ।
अस्तित्वसाधकं नास्ति अस्ति नास्तित्वसाधकम् ॥१२७॥
अणु[7]शो [8]भज्यमानं हि नैव रूपं विकल्पयेत्[8a] ।
चित्तमात्रं व्यवस्थानं कुदृष्ट्या न प्रसीदति ॥१२८॥
तार्किकाणाम[9]विषयः श्रावकाणां[10] न चैव हि ।

[1] व in all MSS. [1a] ल्पा I. [1b] गमन I. [2] कुर्वि in all MSS.
[3] त A. त् C. I. K. तः T. [4] चित्रं Tib. [5] प्रमुच्यते I. T. [6] द्वितयं A. T. हीनयं C. हि नयं I. द्विनयं K. द्विविधं ? [7] नु in all MSS. [8] वि is added in all MSS. [8a] ल्पयन् I. [9] काणां न ? [10] नां in all MSS.

यं देशयन्ति वै नाथाः प्रत्यात्मगतिगोचरम् ॥१२०॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि[1] स्वचित्तदृश्यधाराविशुद्ध्यर्थं भगवन्तमध्येषते स्म । कथं भगवन्स्वचित्तदृश्यधारा विशुध्यति युगपत्क्रमवृत्त्या[2] वा । भगवानाह । क्रमवृत्त्या महामते स्वचित्तदृश्यधारा विशुध्यति न युगपत् । तद्यथा महामते आम्रफलानि[3] क्रमशः पच्यन्ते न युगपत् एवमेव महामते स्वचित्तदृश्यधारा सत्त्वानां क्रमशो विशुध्यति न युगपत् । [4]तद्यथा महामते कुम्भकारः क्रमशो भाण्डानि कुरुते न युगपत् एवमेव महामते तथागतः सत्त्वानां स्वचित्तदृश्यधारां क्रमशो विशोधयति न युगपत् । तद्यथा महामते पृथिव्यां तृणगुल्मौषधिवनस्पतयः क्रमवृत्त्या विरोहन्ति न युगपत् एवमेव महामते सत्त्वानां तथागतः क्रमशः स्वचित्त[5]दृश्यधारां विशोधयति न युगपत् । तद्यथा महामते हास्यलास्यगीतवादित्रवीणालेख्ययोग्याः क्रमशः प्रवर्तन्ते न युगपत् एवमेव महामते तथागतः सर्वसत्त्वानां क्रमशः स्वचित्तदृश्यधारां विशोधयति न युगपत् । तद्यथा महामते दर्पणान्तर्गताः सर्वरूपावभासाः संदृश्यन्ते

[1] स्वय is added in A. K. स्वयं id. in I. [2] वृत्या here and hereafter in all MSS. [3] वि A. C. K. T. नि I. [4] These two sentences are left out in I. [5] त्तं in all MSS. दृश्य left out in all MSS.

निर्विकल्पा युगपत् एवमेव महामते स्वचित्तदृश्यधारां युगपत्तथागतः सर्वसत्त्वानां विशोधयति निर्विकल्पां[1] निराभासगोचराम् । तद्यथा महामते सोमादित्यमण्डलं युगपत्सर्वरूपावभासान्किरणैः प्रकाशयति एवमेव महामते तथागतः स्वचित्तदृश्यदौष्ठुल्यवासनाविगतानां सत्त्वानां युगपदचिन्त्यज्ञानजिनगोचरविषयं संदर्शयति । तद्यथा महामते आलयविज्ञानं स्वचित्तदृश्यदेहप्रतिष्ठाभोगविषयं युगपद्विभावयति एवमेव महामते निष्यन्दबुद्धो युगपत्सत्त्वगोचरं परिपाच्याकनिष्ठभवनविमानालययोगं योगिनामर्पयति । तद्यथा महामते धर्मताबुद्धो युगपन्निष्यन्दनिर्माणकिरणैर्विराजते एवमेव महामते प्रत्यात्मार्यगतिधर्मलक्षणं भावाभावकुदृष्टिविनिवर्तनतया युग[2]पद्विराजते ॥

पुनरपरं महामते धर्मतानिष्यन्दबुद्धः स्वसामान्यलक्षणपतितात्सर्वधर्मात्स्वचित्तदृश्यवासनाहेतुलक्षणोपनिबद्धात्परिकल्पितस्वभावाभिनिवेशहेतुकानतदात्मक[3]विविधमायारङ्गपुरुषवैचित्र्याभिनिवेशानुपलब्धितो[4] महामते देशयति ॥ पुनरपरं महामते परिकल्पितस्वभाववृत्तिलक्षणं परतन्त्रस्वभावा[5]भिनिवेशतः प्रवर्तते । तद्यथा[6] तृण=

[1] त्सा A. C. L K. त्सां T. [2] युगपद् left out in T. [3] कात् तदा L कान् अतदा T. कादना ? [4] तौ in all MSS. [5] काया in all MSS., but T. [6] महामते is added in L

काष्ठगुल्मलता[1]श्रयान्मायाविद्यापुरुषसंयोगात्सर्वसत्त्व[2]रूप-
धारिणं[3] मायापुरुषविग्रहमभिनिष्पन्नैकसत्त्व[4]शरीरं वि=
विधकल्पविकल्पितं ख्यायते तथा[5] ख्यायन्नपि महामते
तदात्मको न भवति एवमेव महामते [6]परतन्त्रस्वभावे प=
रिकल्पितस्वभावे विविधविकल्पचित्तविचित्रलक्षणं ख्या=
यते । वस्तुपरिकल्पलक्षणाभिनिवेशवासनात्परिकल्पय=
न्महामते परिकल्पितस्वभावलक्षणं भवति । एषा म=
हामते निष्यन्दबुद्धदेशना । धर्मताबुद्धः पुनर्महामते
चित्तस्वभावलक्षणविसंयुक्तां प्रत्यात्मार्यगतिगोचरव्यवस्थां
करोति । निर्मितनिर्माणबुद्धः पुनर्महामते दानशील[7]ध्या=
नसमाधिचित्तप्रज्ञाज्ञानस्कन्धधात्वायतनविमोक्षविज्ञानग=
तिलक्षणप्रभेदप्रचारं व्यवस्थापयति । तीर्थ्यदृ[8]ष्ट्या च रू=
प्यसमति[9]क्रमणलक्षणं देशयति । धर्मताबुद्धः पुनर्महामते
निरालम्ब आ[10]लम्बविगतं सर्वक्रिये[11]न्द्रियप्रमाणलक्षण-
विनिवृ[12]त्तमविषयं बालश्रावकप्रत्येकबुद्धतीर्थकरात्मक[13]ल=
क्षणाभिनिवेशाभिनिविष्टानाम् । तस्मात्तर्हि महामते प्र=
त्यात्मार्यगतिविशेषलक्षणे योगः करणीयः । स्वचित्तल=

[1] वल्यलता A. C. I. K. कगु ल्मा T. [2] त्य A. C. K. त्त्व I. T. [3] I. reads रूपांगसमुदितं विचित्ररूपधारिणम् [4] रूपसर्वं instead of सत्त्व in T. [5] च is added in all MSS., but T. [6] यं is added in A. K. रूपं id. in C. I. [7] क्षान्ति is added in Chin. [8] दू left out in A. [9] ध्याश्चारूप्यसमापत्ति Tib. [10] लंविलंव A. C. विलं left out in T. [11] ये A. C. K. [12] वृं I. [13] क left out in T.

क्षणदृश्यविनिवृत्तिदृष्टिना च ते भवितव्यम् ॥

पुनरपरं महामते द्विविधं श्रावकयाननयप्रभेदलक्षणं यदुत प्रत्यात्मार्याधिगमविशेषलक्षणं च[1] भावविकल्पस्वभावाभिनिवेशलक्षणं च[1]। तत्र महामते प्रत्यात्मार्याधिगमविशेषलक्षणं श्रावकाणां कतमद्यदुत शून्यतानात्मदुःखानित्यविषयसत्यवैराग्योपशमात्स्कन्धधात्वायतनस्वसामान्यलक्षण[2]बाह्यार्थ[3]विनाशल[3]क्षणाद्यथाभूतपरिज्ञानाच्चित्तं समाधीयते। [4]स्वचित्तं समाधाय ध्यानविमोक्षसमाधिमार्गफलसमापत्तिविमुक्ति[5]वासनाचिन्त्यपरिणति[6]च्युतिविगतं प्रत्यात्मार्यगतिलक्षण[2]सुखविहारं महामते अधिग[7]च्छन्ति श्रावकाः[8]। एतन्महामते[9] श्रावकाणां प्रत्यात्मार्यगति[10]लक्षणम्। एतद्धि महामते श्रावकाणां प्रत्यात्मार्याधिगमविहारसुखमधिगम्य बोधिसत्त्वेन महासत्त्वेन निरोधसुखं समापत्तिसुखं च सत्त्वक्रियापेक्षया पूर्वस्वप्रणिधानाभिनिर्हृततया च न साक्षात्करणीयम्। एतन्महामते श्रावकाणां प्रत्यात्मार्यगतिलक्षण[11]सुखं यत्र बोधिसत्त्वेन महासत्त्वेन[12] प्रत्यात्मार्यगतिलक्षणसुखे न शि-

[1] In T. only. [2] लक्षण left out in T. [3] र्थ ल left out in T. [4] स T.
[5] क्ति वा ? [6] Left out in A. K. त C. ति I. T. [7] च्छं A. C. K. छ I. च्छ T.
[8] का in all MSS. [9] From श्रा till मते left out in C. [10] गति left out in T
[11] णं A. C. I. K. ण T. [12] In T. only.

क्षितव्यम् । भावविकल्पस्वभावाभिनिवेशः पुनर्महामते श्रावकाणां कतमो यदुत[1] नीलपीतोष्णद्रवचलकठिना=नि महाभूतान्यक्रियाप्रवृत्तानि स्वसामान्यलक्षणयुक्त्या[2]=गमप्रमाणसुविनिबद्धानि दृष्ट्वा तत्स्वभावाभिनिवेशवि=कल्पः प्रवर्तते । एतन्महामते बोधिसत्त्वेनाधिगम्य व्या=वर्तयितव्यम् । धर्मनैरात्म्यलक्षणानुप्रवेशतया पुद्गलनै=रात्म्यलक्षणदृष्टिं[3] निवार्य भूमिक्रमानुसंधौ प्रतिष्ठापयि=तव्यम् । एतन्महामते[4] श्रावकाणां भावविकल्पस्वभावा=भिनिवेशलक्षणं यदुक्तमिदं तत्प्रत्युक्तम् ॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्त=मेतदवोचत् । नित्यमचिन्त्यं च भगवता प्रत्यात्मार्यगति=गोचरं परमार्थगोचरं च प्रभाषितम् । ननु भगवंस्ती=र्थकरा अपि नित्याचिन्त्यवादिनः कारणानाम् । भग=वानाह । न महामते तीर्थकराणां[5] कारणस्य नित्याचि=न्त्यतां[6] प्राप्नोति । तत्कस्य हेतोस्तीर्थकराणां महामते नि=त्याचिन्त्यं[7] न हेतुस्व[8]लक्षणयुक्तम् । यस्य महामते नि=त्याचिन्त्यं न हेतुस्वलक्षणयुक्तम् तत्कथं केनाभिव्यज्यते[9]

[1] According to the Chin. versions, some words are wanting here. [2] क्त्या A. K.
[3] ष्टिर्नि A. C. I. ष्टिर्न्नि K. [4] मते left out in all MSS., but (魏) Tib. [5] णा T.
[6] ता T. [7] चिंत्य A. C. I. K. चिंत्यं T. [8] स्व in T. only. [9] वाह्य A. वह्य C. व्यज्य I. वाज्य K. व्यह्य T.

नित्यमचिन्त्यमिति । नित्याचिन्त्यवादः[1] पुनर्महामते यदि हेतुस्वलक्षणयुक्तः[2] स्यान्नित्यं[3] कारणाधीन[4]हेतुलक्षणत्वान्नित्यमचिन्त्यं[5] न भवति । मम तु[6] महामते परमार्थनित्याचिन्त्यं परमार्थलक्षणहेतुयुक्तं[7] भावाभावविगतं[8] प्रत्यात्मार्याधिगमलक्षणत्वाल्[9]लक्षणवत्परमार्थज्ञानहेतुत्वाच्च हेतुमद्भावाभावविगतत्वादकृतकाकाशनिर्वाण[10]निरोधदृष्टान्तसा[11]धर्म्यान्नित्यम् । अत एतन्[12]महामते तीर्थकर[12a]नित्याचिन्त्यवादतुल्यं न भवति । नित्याचिन्त्यतैवेयं महामते तथागतानां प्रत्यात्मार्यज्ञाना[13]धिगमतथता[14] । तस्मात्तर्हि महामते बोधिसत्त्वेन[15] महासत्त्वेन[15] नित्याचिन्त्यप्रत्यात्मार्यज्ञानाधिगमाय योगः करणीयः । पुनरपरं महामते नित्याचिन्त्यता तीर्थ[16]कराणामनित्यभावविलक्षणहेतुत्वान्न[17] स्वकृतहेतुलक्षणप्रभावितत्वान्नित्यम्[18] । यदि पुनर्महामते तीर्थ[16]कराणां नित्याचिन्त्यता कृतकभावाभावा[19]दनित्यतां दृष्टानुमान[20]बुद्ध्या नित्यं[21] समाप्यते । [22]तेनैव हेतुना ममापि[23]

[1] विज्ञान instead of अचिन्त्य in T. [2] क्तस्य T. [3] स्यात् तस्मात् नित्यं I. स्यादनित्यं (魏) Tib. [4] धीनं T. [5] त्यमचिं left out in A. K. [9] ममात्र A. C. I. K. [7] परमार्थहेतुलक्षणयुक्तं (唐) Tib. [8] त K. [9] लक्षणत्वात् left out in C. [10] र्मा A. C. I. K. र्वा T. [11] सो A. I. सा C. K. T. [12] एवं म A. C. K. एव I. [12a] रं I. [13] ज्ञाना left out in C. [14] नार्थता वा पाठ A. K. नार्थता C. तयता I. T. [15] Left out in T. [16] थ्य T. [17] णां नित्य°हेतुत्वात् I. मनित्याभावलक्षणहेतुत्वादनित्यं न Tib. [18] त्यै A. K. [19] भावात् नि I. भावाद left out in T. [20] नु in all MSS. [21] त्या in all MSS., but T. [22] ते left out in all MSS., but Tib. [23] ममापि left out in all MSS., but Tib.

महामते कृतकभावाभावा[1]दनित्यतां दृष्ट्वा नित्यमहेतूपदेशात् ॥

यदि पुनर्महामते हेतुलक्षणसंयुक्तं नित्याचिन्त्यता[2] तीर्थकराणां हेतुभा[3]वस्वलक्षणभावाभावा[4]च्छशविषाणतुल्या[5] महामते नित्याचिन्त्यता[2] वाग्विकल्पमात्रा च[6] महामते तीर्थकराणां प्रस[7]ज्यते । तत्कस्य हेतोर्यदुत वाग्विकल्पमात्रं हि महामते शशविषाणं[8] [9]स्वहेतुलक्षणाभावत् । मम तु महामते नित्याचिन्त्यता[2] प्रत्यात्मार्याधिगमलक्षणहेतुत्वात्कृतकभावाभाववर्जितत्वान्नित्यं न बाह्यभावाभावनित्यानित्यानुप्रमाणान्नित्यं[10] । यस्य पुनर्महामते [10a]बाह्याभावान्नित्यानुमानान्नित्याचिन्त्यत्वान्नित्यं[11] तस्या नित्याचिन्त्यतायाः स्वहेतुलक्षणं न जानीते । प्रत्यात्माधिगमार्यज्ञानगोचरलक्षणं बहिर्धा ते महामते असंख्याः ॥

पुनरपरं महामते संसारविकल्पदुःखभयभीता निर्वाणमन्वेषन्ते संसारनिर्वाणयोरविशेषज्ञाः सर्वभावविकल्पाभावादिन्द्रियाणामनागतविषयोपरमाच्च[12] महामते

[1] द left out in all MSS. भावा also in T. [2] ता A. C. K. तां I. च्चिंत्यं T. Tib. [3] भाव left out in T. Tib. [4] भावा left out in C. [5] ल्यां A. I. ल्यं T. [6] त्रश्च in all MSS. [7] ह्य A. C. K. T. ज्य I. [8] ण A. C. I. K. णं T. [9] स्व left out in A. K. [10] त्यानित्ये in all MSS., but T. [10a] ह्य I. [11] स is added in all MSS. त्यं T. °भावनित्यानुमानादचिन्त्यानित्यं Tib. [12] मर्च्च A. मच्च C. K. मात् च I. माश्च T.

निर्वाणं विकल्पयन्ति[1] न प्रत्यात्मगतिविज्ञानालयं[2] परावृत्तिपूर्वकं महामते । अतस्ते[3] महामते[3] मोहपुरुषा यानत्रयवादिनो भवन्ति न चित्तमात्रगतिनिराभासवादिनः । अतस्ते महामते अतीतानागतप्रत्युत्पन्नानां तथागतानां स्वचित्तदृश्यगोचरानभिज्ञा बाह्यचित्तदृश्यगोचराभिनिविष्टास्ते संसारगतिचक्रे पुनर्महामते चङ्क्राम्यन्ते[4] ॥

पुनरपरं महामते [5]अनुत्पन्नान्सर्वधर्मानतीतानागतप्रत्युत्पन्नांस्[6]तथागता भाषन्ते । तत्कस्य हेतोर्यदुत स्वचित्तदृश्यभावाभावात्सदसतोरुत्पत्तिविरहितत्वान्महामते अनुत्पन्नाः सर्वभावाः शशहयखरोष्ट्रविषाणतुल्या महामते[7] सर्वधर्मा बालपृथग्जनाभूतपरिकल्पितस्वभावविकल्पितत्वान्महामते अनुत्पन्नाः सर्वभावाः । प्रत्यात्मार्यज्ञानगतिगोचरो हि महामते सर्वभावस्वभावलक्षणोत्पादः न बालपृथग्जन[8]विकल्पद्वयगोचरस्वभावः । देहभोगप्रतिष्ठागतिस्वभावलक्षणं महामते आलयविज्ञानग्राह्यग्राहकलक्षणेन प्रवर्तमानं बाला उत्पादस्थितिभङ्गदृष्टि[8a]द्वयपतिताशया उत्पादं[9] सर्वभावानां सदसतोर्विकल्पयन्ति ।

[1] यन्ति A. C. I. K. यंति T. [2] य T. [3] Left out in I. [4] वभ्राम्यंते A. K. वभ्रामंते C. बभ्रामास्ते I. चंभ्राम्यंते T. [5] बोधिसत्त्वो is added in A. C. I. K. [6] From स्तथा till अनुत्पन्नाः of tenth line, left out in I. [7] In T. only. [8] पृथग्जन left out in T. Tib. [8a] I. reads दृष्टि अस्तित्वनास्तित्वद्व [9] द in all MSS., but T.

अत्र ते महामते[1] योगः करणीयः ॥

पुनरपरं महामते पञ्चाभिसमयगोत्राणि[2] कतमानि पञ्च यदुत श्रावकयानाभिसमयगोत्रं प्रत्येकबुद्धयानाभिसमयगोत्रं तथागतयानाभिसमयगोत्रमनियतैकतरगोत्रमगोत्रं च पञ्चमम् । कथं[3] पुनर्महामते श्रावकयानाभिसमयगोत्रं प्रत्येतव्यम् । यः स्कन्धधात्वायतनस्वसामान्यलक्षणपरिज्ञानाधिगमे देश्यमाने रोमाञ्चिततनुर्भवति । लक्षणपरिचयज्ञाने चास्य बुद्धिः प्रस्कन्दति न प्रतीत्यसमुत्पादाविनिर्भागलक्षणपरिचये । इदं महामते श्रावकयानाभिसमयगोत्रम् । यः[4] श्रावकयानाभिसमयं[5] दृष्ट्वा षट्पञ्चम्यां भूमौ पर्युत्थानक्लेशप्रहीणो[6] वासनक्लेशाप्रहीणो ऽचिन्त्यच्युतिगतः सम्यक्सिंहनादं नदति । क्षीणा मे जातिरुषितं ब्रह्मचर्यमित्येवमादि[7] निगद्य पुद्गलनैरात्म्यपरिचयाद्यावन्निर्वाणबुद्धिर्भवति[8] ॥

अन्ये पुनर्महामते आत्मसत्त्वजीवपोषपुरुषपुद्गलसत्त्वावबोधान्निर्वाणमन्वेषन्ते[9] । अन्ये पुनर्महामते कारणाधीनां सर्वधर्मान्दृष्ट्वा[10] निर्वाणगति[11]बुद्धयो भवन्ति । धर्मनैरा=

[1] न is added in all MSS., but T. [2] ये C. I. [3] स Tib. [4] स ? [5] समयगोत्रं in all MSS., but T. [6] Left out in A. K. णौः C. I. [7] ब्रह्मचर्यं कृतं करणीयमित्ये° Tib. [8] त्म्यापरिचर्याद्या in all MSS., but Chin. Tib. [9] न्व A. C. I. K. न्वे T. [10] सर्वभावान्दृ° Tib. [11] रति Tib.

त्म्यदर्शनाभावान्नास्ति मोक्षो महामते । एषा[1] महामते श्रावकयानाभिसमय[2]गोत्रकस्यानिर्याणनिर्या[3]णबुद्धिः । अत्र ते महामते कुदृष्टिव्यावृत्त्यर्थं[4] योगः करणीयः ॥

तत्र[5] महामते प्रत्येकबुद्धयानाभिसमय[6]गोत्रको[7] यः प्रत्येकाभिसमये[8] देश्यमाने ऽश्रुहृष्टरोमाञ्चिततनुर्भवति । असंसर्गप्रत्ययाद्भावाभिनिवेशबहु[9]विविधस्वकायवैचित्र्यर्द्धि[10]व्यस्तयम[10]कप्रातिहार्यदर्शने निर्दिश्यमाने ऽनुनीयते स प्रत्येकबुद्धयानाभिसमयगोत्रक इति विदित्वा प्रत्येकबुद्धयानाभिसमयानुरूपा कथा करणीया । एतन्महामते प्रत्येकबुद्धयानाभिसमय[11]गोत्रकस्य लक्षणम् ॥

तत्र महामते तथागतयानाभिसमयगोत्रं त्रिविधं यदुत स्वभाव[12]निःस्वभावधर्माभिसमयगोत्रमधिगमस्वप्रत्यात्मार्याभिसमयगोत्रं बाह्यबुद्धक्षेत्रौदार्याभिसमयगोत्रं च । यदा पुनर्महामते त्रयाणामप्येषामन्यतमे देश्यमाने स्वचित्त[13]दृश्यदेहालयभोगप्रतिष्ठाचिन्त्यविषयदेश्यमाने नोत्त्रसति न संत्रसति न संत्रासमापद्यते वेदितव्यमयं तथागतयानाभिसमयगोत्रक इति । एतन्महामते तथाग=

[1] एषां T. [2] ये A. C. I. K. तीर्थ is added in Chin. Tib. [3] वा in all MSS. [4] र्थे A. C. K. र्थं I. T. [5] ते is added in all MSS., but T. [6] यो A. C. I. K. य T. [7] को A. K. का C. I. कः T. [8] य T. [9] बहु left out in all MSS., but Tib. [10] वि (for र्द्धि) ने (for म) in all MSS. The above three points follow Tib. [11] या A. K. [12] निःस्वभाव left out in A. [13] त्तं A. C. I. K. त्त T.

तयानाभिसमयगोत्रकस्य लक्षणम् ॥

अनियतगोत्रकः पुनर्महामते त्रिष्वप्येतेषु देश्यमानेषु यत्रानुनीयते तत्रानुयोज्यः[1] स्यात् । परिकर्मभूमिरियं महामते गोत्रव्यवस्था निराभासभूम्यवक्रमणतया व्यवस्था क्रियते । प्रत्यात्मालये तु स्वक्लेशवासनाशुद्धस्य धर्मनैरात्म्यदर्शनात्समाधिसुखविहारं प्राप्य श्रावको जिनकायतां प्रतिलप्स्यते ॥

अथ खलु[2] भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

स्रोतापत्तिफलं[3] चैव सकृदागामिनस्तथा[4] ।
अनागामिफलं चैव अर्हत्त्वं चित्तविभ्रमम् ॥१३०॥
त्रियानमेकयानं च अयानं[5] च वदाम्यहम् ।
बालानां[6] मन्दबुद्धीनामार्याणां च विविक्तताम्[7] ॥१३१॥
द्वारं हि परमार्थस्य विज्ञप्तिद्वयवर्जिता[8] ।
यानत्रयव्यवस्थानं निराभासे स्थिते[9] कुतः[10] ॥१३२॥
ध्यानानि चाप्रमाणानि आरूप्याश्च समाधयः ।
संज्ञानिरोधो निखिलं[11] चित्तमात्रे नं[12] विद्यते ॥१३३॥

तत्रेच्छन्तिकानां पुनर्महामते अनिच्छन्तिकता मोक्षं

[1] : left out in A. I. [2] In T. only. [3] श्रोता° in all MSS. [4] मिफलं तथा A. C. I. K. मिनस्तथा T. मिकस्तथा ? [5] आर्यानं T. [6] ना in all MSS., but Tib. [7] विविक्तं A. C. I. K. विकिक्ततं T. °क्तताम् Tib. [8] तम् ? [9] तं ? [10] स्थितः I. [11] लं चि A. C. I. K. ल चि T. लश्चि ? [12] ण A. K. T. न C. I.

केन प्रवर्तते यदुत सर्वकुशलमूलोत्सर्गतश्च सत्त्वानादि=
कालप्रणिधानतश्च । तत्र सर्वकुशलमूलोत्सर्गः कतमो
यदुत बोधिसत्त्वपिटकनिक्षेपो ऽभ्याख्यानां च नैते सू=
त्रान्तविनयमोक्षानुकूला इति ब्रुवतः सर्वकुशलमूलो=
त्सर्गत्वान्न निर्वायति[1] ॥ द्वितीयः पुनर्महामते बोधिसत्त्वो
महासत्त्व एवं भवप्रणिधानोपायपूर्वकत्वान्नापरिनिर्वृतैः
सर्वसत्त्वैः परिनिर्वास्यामीति ततो[2] न परिनिर्वाति । ए=
[3]तन्महामते अपरिनिर्वाणधर्मकाणां लक्षणं येनेच्छन्ति=
[4]कगतिं स[4a]मधिगच्छन्ति[5] ॥

पुनरपि महामतिराह । कतमो ऽत्र भगवन्नत्यन्ततो न
परिनिर्वाति । भगवानाह । बोधिसत्त्वेच्छन्तिको ऽत्र म=
हामते आदिपरिनिर्वृतान्सर्वधर्मान्विदित्वात्यन्ततो न प=
रिनिर्वाति । न[6] पुनः सर्वकुशलमूलोत्सर्गेच्छन्तिकः ॥
सर्वकुशलमूलोत्सर्गेच्छन्तिको[7] हि महामते पुनरपि तथा=
गताधिष्ठानात्कदाचित्कर्हिचित्कुशलमूलान्व्युत्थापयति ।
तत्कस्य हेतोर्यदुतापरित्यक्ता हि महामते तथागतानां स=
र्वसत्त्वाः । अत[8] एतस्मात्कारणान्महामते बोधिसत्त्वेच्छ=

[1] य left out in T. [2] मीमिति ता A. मी पतिते C. मी पतिततो I. मीतितो K. मीति ततो T. [3] एवं in all MSS., but T. Tib. [4] कु I. [4a] अपि for समधि in I. [5] कुगतिमपि गच्छन्ति is added in A. C. K. [6] न in T. Tib. only. [7] This long compound in I. T. Tib. only. [8] त्र A. C.

न्तिको न परिनिर्वातीति ॥

पुनरपरं महामते बोधिसत्त्वेन महासत्त्वेन स्वभावलक्षणत्रयकुशलेन भवितव्यम् । तत्र महामते परिकल्पितस्वभावो निमित्तात्प्रवर्तते । कथं पुनर्महामते परिकल्पितस्वभावो निमित्तात्प्रवर्तते । तत्र महामते परतन्त्रस्वभावो[1] वस्तुनिमित्तलक्षणाकारः ख्यायते । तत्र महामते वस्तुनिमित्तलक्षणाभिनिवेशः पुनर्द्विप्रकारः । परिकल्पितस्वभावं व्यवस्थापयन्ति तथागता अर्हन्तः सम्यक्संबुद्धा नामाभिनिवेशलक्षणेन च नाम[2]वस्तुनिमित्ताभिनिवेशलक्षणेन च । तत्र वस्तुनिमित्ताभिनिवेशलक्षणं पुनर्महामते यदुताध्यात्मबाह्यधर्माभिनिवेशः । नि[3]मित्त[4]लक्षणाभिनिवेशः पुनर्यदुत[5] तेष्वेवाध्यात्मिकबाह्येषु धर्मेषु स्वसामान्यलक्षणपरिज्ञानावबोधः । एतन्महामते द्विप्रकारं[6] परिकल्पित[7]स्वभावस्य लक्षणम् । यदाश्रयालम्बनात्प्रवर्तते तत्परतन्त्रम् । तत्र महामते परिनिष्पन्न[8]स्वभावः कतमो यदुत निमित्तनामवस्तुलक्षणविकल्प[9]विरहितं[10] तथतार्यज्ञानगतिगमनप्रत्यात्मार्यज्ञानगतिगोचर ए-

[1] वः A. C. K. T. व I. [2] नाम left out in (宋) (唐) Tib. [3] श नि in all MSS., but Tib. [4] त्त A. C. T. त्तम् I. त्तं K. [5] पुनर्महामते यदुत Tib. [6] र in all MSS., but T. [7] स्य is added in T. [8] पंन in all MSS. [9] विकल्प in T. Tib. only. [10] ता A. C. I. K. हीत् T. तः (宋) (唐) Tib.

ष महामते परिनिष्पन्न[1]स्वभावस्तथागतगर्भहृदयम् ॥

अथ खलु[2] भगवांस्तस्यां वेलायामिमां गाथामभाषत ॥

निमित्तं नाम संकल्पः स्वभावद्वयलक्षणम् ।
सम्यग्ज्ञानं हि तथता परिनिष्पन्न[1]लक्षणम् ॥१३४॥

एष महामते पञ्चधर्मस्वभावलक्षणप्रविचयो नाम धर्मपर्यायः प्रत्यात्मार्यज्ञानगतिगोचरो यत्र[3] त्वयान्यैश्च बोधिसत्त्वैः शिक्षितव्यम् ॥

पुनरपरं महामते बोधिसत्त्वेन महासत्त्वेन नैरात्म्यद्वयलक्षणप्रविचयकुशलेन भवितव्यम् । तत्र महामते कतमन्नैरात्म्यद्वयलक्षणं यदुतात्मात्मीयरहित[4]स्कन्धधात्वायतनकदम्बकमज्ञानकर्मतृष्णाप्रभवं[5] चक्षुषा[6] रूपादि[7]ग्रहणाभिनिवेशा[8]त्प्रवर्तमानं विज्ञानं सर्वेन्द्रियैः स्वचित्तदृश्यभाजन[9]देहालय[10]स्वचित्तविकल्पविकल्पितं विज्ञापयति । नदीवीजदीपवायुमेघसदृश[11]क्षणपरम्पराभेदभिन्नं चपलं[12][13] वानरमक्षिकासदृशमचौक्षमचौक्ष[14]विषयचार्यनाथो[15] ऽनल इ=

[1] °न्नं in all MSS. [2] In T. only. [3] गो यत्र A. गोचरा यत्र C. -- K. गोचरः यत्र T. [4] तं T. [5] स्व instead of दम्ब in T. कदम्बक left out in Tib. [6] चक्षुषा रूपा° in all MSS. नामरूपा° Tib. [7] ग्रा in all MSS., but T. Tib. [8] नि in I. only. [9] भाजन left out in C. I. श्यं I. [10] यं T. [11] सदृश left out in A. ल is added in all MSS., but T. [12] नञ्च in T. only. न च A. C. I. K. [13] ल A. K. लं C. I. T. [14] °सदृशमचौक्षवि° Tib. instead of °सदृशमचौक्षमचौक्षवि° here. [15] थ A. C. I. K. थः T.

वातृममनादिकालप्रपञ्चविषयवासना[1]रहितम[2]रघट्टचक्रय[3]=न्त्रचक्रवत्संसारभवगतिचक्रे विचित्रदेहरूपधारि[4] मायावे=ताल[5]यन्त्रप्रतिमं प्रवर्तमानं प्रवर्तते । यदत्र महामते ल=क्षणकौशलज्ञानमिदमुच्यते पुद्गलनैरात्म्यज्ञानम् ॥

तत्र महामते धर्मनैरात्म्यज्ञानं कतमद्यदुत स्कन्धधा=त्वायतनानां परिकल्पितलक्षणस्वभावावबोधः । यथा म=हामते स्कन्धधात्वायतनान्यात्म[6]विरहितानि स्कन्धसमूह-मात्रं[7] हेतुकर्मतृष्णासूत्रोप[8]निबद्धमन्योन्यप्रत्ययतया प्रवर्तते निरीहम् तथा स्कन्धा अपि महामते स्वसामान्यलक्षण-विरहिता अभूतपरिकल्पलक्षणविचित्रप्रभाविता बालै=र्विक[9]ल्प्यन्ते न त्वार्यैः । चित्तमनोमनोविज्ञा[10]नपञ्चधर्मस्व-भावरहितान्महामते सर्वधर्मान्विभावयन्बोधिसत्त्वो महा-सत्त्वो धर्मनैरात्म्यकुशलो भवति । धर्मनैरात्म्यकुशलः पु=नर्महामते बोधिसत्त्वो महासत्त्वो न [11]चिरात्प्रथमां बो=धिसत्त्वभूमिं[12] निराभासप्रविचयां प्रतिलभते । भूमिलक्ष=णप्रविचयावबोधात्प्रमुदितानन्तरमनुपूर्वं [13]नवसु भूमिषु कृतविद्या महाधर्ममेघां प्रतिलभते । स तस्यां प्रतिष्ठितो

[1] वासनाविषय in all MSS., but T. [2] रहितम A. C. I. K. हेतुकम T. Tib. [3] घटी is added in all MSS. [4] री T. [5] र T. [6] त्मादि Tib. [7] त्र in all MSS., but T. [8] रि A. C. I. K. नि T. [9] ल्प A. C. I. K. ल्प्य T. [10] नं T. [11] नितरां instead of न चिरात् in I. [12] मौ I. [13] पूर्वान्न A. C. K. पूर्वां न I. T.

ऽनेकरत्नमुक्तोपशोभिते महा[1a]पद्मराजे पद्मकृतौ महार=
त्नविमाने मायास्वभावगोचरपरिचयाभिनिर्वृते निषस[1]=
स्तदनुरूपैर्जिनपुत्रैः परिवृतः सर्वबुद्धक्षेत्रागतैर्बुद्धपाण्य=
भिषेकैश्चक्रवर्तिपुत्रवदभिषिच्यते बुद्ध[2]सुतभूमिमतिक्रम्य प्र=
त्यात्मार्यधर्मगतिगमनत्वात्तथागतो धर्मकायवशवर्ती भ=
विष्यति धर्मनैरात्म्यदर्शनात् । एतन्महामते सर्वधर्मनै=
रात्म्यलक्षणम् । अत्र ते[3] महामते शिक्षितव्यमन्यैश्च बो=
धिसत्त्वैर्महासत्त्वैः ॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि
भगवन्तमेतदवोचत् । समारोपापवादलक्षणं मे भगवा=
न्देशयतु यथाहं चान्ये च बोधिसत्त्वाः समारोपापवाद-
कुदृष्टिवर्जितमतयः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबु=
ध्येरन् । अभिसंबुध्य शाश्वतसमारोपापवादोच्छेददृष्टिवि=
वर्जितास्तव बुद्धनेत्रीं नापवदिष्यन्ति ॥

अथ खलु भगवान्पुनरपि महामतेर्बोधिसत्त्वस्य महा-
सत्त्वस्याध्येषणां विदित्वा इमां गाथामभाषत ॥

समारोपापवादो हि चित्तमात्रे न विद्यते ।
देहभोगप्रतिष्ठाभं ये चित्तं नाभिजा[4]नंते ।
समारोपापवादेषु ते चरन्त्यविपश्चिताः ॥१३५॥

[1a] रत्न is added in I. [1] निषसः left out in I. [2] शुद्ध is added in A.
[3] Left out in A. K. त्वया ? [4] नं A. C. K. न I. T.

अथ खलु[1] भगवानेतमेव गाथार्थमुद्योतयन्पुनरप्येत=
दवोचत् । चतुर्विधो महामते असत्समारोपः कतमश्चतु=
र्विधो यदुतासल्लक्षण[2]समारोपो ऽसद्दृष्टिसमारोपो ऽसद्धे=
तुसमारोपो ऽसद्भावसमारोपः । एष हि महामते चतु=
र्विधः समारोपः ॥

अपवादः पुनर्महामते कतमो[3] यदुतास्यैव कुदृष्टिसमा=
रोपस्यानुपलब्धिप्रविचयाभावादपवादो भवति । एतद्धि
महामते समारोपापवादस्य लक्षणम् ॥

पुनरपरं महामते असल्लक्षण[2]समारोपस्य[4] लक्षणं कत=
मद्यदुत स्कन्धधात्वायतना[5]नामसत्त्वसामान्यलक्षणाभिनि=
वेशः इदमेवमिदं नान्यथेति । एतद्धि महामते असल्लक्ष=
ण[2]समारोपस्य लक्षणम् । एष हि महामते असल्लक्षण[2]-
समारोपविकल्पो ऽनादिकालप्रपञ्चदौष्ठुल्य[6]विचित्रवास=
नाभिनिवेशात्प्रवर्तते । एतद्धि महामते असल्लक्षण[2]समा=
रोपस्य लक्षणम् ॥

असद्दृष्टिसमारोपः पुनर्महामते यस्तेष्वेव स्कन्धधात्वाय=
तनेष्वात्मसत्त्वजीवजन्तुपोष[7]पुरुषपुद्गलदृष्टिसमारोपः । अ=
यमुच्यते महामते असद्दृष्टिसमारोपः ॥

असद्धेतुसमारोपः पुनर्महामते यदुताहेतुसमुत्पन्नं प्रा=

[1] In T. only. [2] असतलक्षण I. [3] Left out in T. [4] स्य left out in A. K.
[5] ना left out in A. K. [6] दौष्ठल्य A. C. K. दौष्ठूल्य I. [7] योष I.

ग्विज्ञानं पश्चादभूत्वा मायावदनुत्पन्नं पूर्वं चक्षू[1]रूपालो=
कस्मृतिपूर्वकं प्रवर्तते[2] । प्रवृत्य भूत्वा च[3] पुनर्विनश्यति ।
एष महामते असद्धेतुसमारोपः ॥

असद्भावसमारोपः पुनर्महामते यदुताकाशनिरोधनि=
र्वाणाकृत[4]कभावाभिनिवेशसमारोपः । एते च[5] महामते
भावाभावविनिवृत्ताः शशहयखरोष्ट्रविषाणकेशोण्डुकप्र=
ख्या महामते सर्वधर्माः सदसत्पक्षविगताः समारोपाप=
वादैश्च बालैर्विकल्प्यन्ते[6] स्वचित्तदृश्यमात्रानवधारितम=
तिभिर्न त्वार्यैः । एतन्महामते असद्भावविकल्पसमारो=
पापवादस्य लक्षणम् । तस्मात्तर्हि महामते समारोपा=
पवाददृष्टिविगतेन भवितव्यम् ॥

पुनरपरं महामते बोधिसत्त्वाः चित्तमनोमनोविज्ञान-
पञ्चधर्मस्वभावनैरात्म्यलक्षणद्वयगतिंगत्वा परहितहेतोर=
नेकरूपवेशधारिणो भवन्ति परिकल्पितस्वभावा इव प=
रतन्त्राशया विश्वरूपचिन्तामणिसदृशाः सर्वबुद्धक्षेत्रपर्ष=
न्मण्डलगता मायास्वप्नप्रतिभासप्रतिविम्बो[7]दकचन्द्रगतिस=
मानुत्पादभङ्गशाश्वतोच्छेदरहितान्सर्वधर्मान्संमुखं सर्वत=
थागतेभ्यः सर्वश्रावकप्रत्येकबुद्धयानविरहान्धर्मदेशनाञ्छृ=
ण्वन्ति । समाधिमुख[8]शतसहस्राणि च प्रतिलभन्ते । या=

[1] क्षु A. C. K. क्षू I. [2] त A. C. K. ते I. [3] च A. C. K. च्च I. [4] णकृताकृत T.
[5] Left out in A. K. [6] ल्पांत A. [7] ब in all MSS. [8] मुख left out in T. Chin. Tib.

वदनेकानि समाधिकोटीनियुत[1]शत[2]सहस्राणि प्रतिलभ्य तैः समाधिभिः क्षेत्रात्क्षेत्रं संक्रामन्ति। बुद्धपूजाभियुक्ताश्च सर्वोपपत्तिदेवभवनालयेषु रत्नत्रयमुपदेश्य[3] बुद्धरूपमास्थाय श्रावकगण[4]बोधिसत्त्वगणपरिवृताः स्वचित्तदृश्य[5]-मात्रावतारणतया बाह्यभावाभावोपदेशं कुर्वन्ति सदसत्पक्षविनिवृत्त्यर्थम् ॥

अथ खलु भगवांस्तस्यां वेलायामिमां गाथामभाषत ॥

चित्तमात्रं यदा लोकं प्रपश्यन्ति जिनात्मजाः।
तदा नैर्माणिकं कायं क्रियासंस्कारवर्जितम्।
लभन्ते ते बलाभिज्ञावशितैः सह[6] संयुतम् ॥१३६॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमध्येषते स्म। देशयतु भगवाञ्छून्यतानुत्पादाद्वयनिःस्वभावलक्षणं सर्वधर्माणां येन शून्यतानुत्पादाद्वयनिःस्वभावलक्षणावबोधेनाहं चान्ये च बोधिसत्त्वा महासत्त्वा नास्त्यस्तिविकल्पवर्जिताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्येरन् ॥

अथ खलु भगवान्महामतिं बोधिसत्त्वं महासत्त्वमेतदवोचत्। तेन हि महामते शृणु तत्साधु च सुष्ठु च मनसिकुरु। भाषिष्ये ऽहं ते। साधु भगवन्निति महामति-

[1] न T. [2] शत left out in T. [3] देश्य A. C. T. दृश्य I. देश्यं K. [4] गण left out in T. [5] From दृश्य till चित्त (in verse) left out in C. [6] सह left out in C.

बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भगवानेतदवोचत् । शून्यता शून्यतेति महामते परिकल्पितस्वभावपदमेतत् । परिकल्पित[1]स्वभावाभिनिवेशेन पुनर्महामते शून्यतानुत्पादाभावाद्वयनिःस्वभावभाववादिनो भवन्ति । तत्र महामते संक्षेपेण सप्तविधा शून्यता यदुत लक्षणशून्यता भावस्वभावशून्यताप्रचरितशून्यता प्र[2]चरितशून्यता सर्वधर्मनिरभिलाप्यशून्यता परमार्थार्यज्ञानमहाशून्यतेतरेतरशून्यता च सप्तमी ॥

तत्र महामते लक्षणशून्यता कतमा यदुत स्वसामान्यलक्षणशून्याः सर्वभावाः परस्परसमूहापेक्षितत्वात्प्रविचयविभागाभावान्महामते स्वसामान्यलक्षणस्याप्रवृत्तिः स्वपरोभयाभावाच्च महामते लक्षणं नावतिष्ठते । अतस्तदुच्यते[3] स्वलक्षणशून्याः सर्वभावा इति ॥

भावस्वभावशून्यता पुनर्महामते कतमा यदुत स्वयं स्वभावाभावोत्पत्तितो महामते भावस्वभावशून्यता भवति सर्वधर्माणाम् । तेनोच्यते भावस्वभावशून्यतेति[4] ॥

अप्रचरितशून्यता पुनर्महामते कतमा यदुताप्रचरितपूर्वं निर्वाणं स्कन्धेषु । तेनोच्यतेऽप्रचरितशून्यतेति[5] ॥

[1] From स्वभाव till ल्पित left out in C. [2] ता प्रचरितशून्यताप्रच° (宋) (魏) Tib.

[3] त च्यन्ते Tib. [4] इति in T. only. [5] न्येति T. According to (宋) (魏) Tib. this paragraph is put in after the following one. It seems better.

प्रचरितशून्यता पुनर्महामते कतमा यदुत स्कन्धा आत्मात्मीयरहिता हेतुयुक्तिक्रियाकर्मयोगैः प्रवर्तमानाः प्रवर्तन्ते । तेनोच्यते प्रचरितशून्यतेति ॥

सर्वधर्मनिरभिलाप्यशून्यता पुनर्महामते कतमा यदुत परिकल्पितस्वभावानभिलाप्य[1]त्वान्निरभिलाप्यशून्याः सर्वधर्माः । तेनोच्यते निरभिलाप्यशून्यतेति ॥

परमार्थार्यज्ञानमहाशून्यता पुनर्महामते कतमा यदुत स्वप्रत्यात्मार्यज्ञानाधिगमः सर्वदृष्टिदोषवासनाभिः शून्यः । तेनोच्यते परमार्थार्यज्ञानमहाशून्यतेति ॥

इतरेतरशून्यता पुनर्महामते कतमा यदुत यद्यत्र[2] नास्ति तत्तेन शून्यमित्युच्यते । तद्यथा महामते शृगालमातुः प्रासादे हस्तिगवैडकाद्या न सन्ति । अशून्यं च भिक्षुभिरिति भाषितं मया स च तैः[3] शून्य इत्युच्यते । न च पुनर्महामते प्रासादः प्रासादभावतो नास्ति भिक्षवश्च भिक्षुभावतो न सन्ति । न च ते ऽन्यत्र हस्तिगवैडकाद्या भावा [4]नावतिष्ठन्ते । इदं[5] महामते स्वसामान्यलक्षणं सर्वधर्माणामितरेतरं तु न संविद्यते । तेनोच्यत इतरेतरशून्यतेति । एषा महामते सप्तविधा शून्यता । एषा च महामते इतरेतरशून्यता सर्वजघन्या सा च त्वया परिवर्जयितव्या ॥

[1] पि T. [2] द Tib. [3] तैः left out in I. [4] °द्या भावान्नाव° A. C. K. °द्याभावात् न अव° I. °द्या भावात् । अव° T. but follow Tib. [5] एवं (魏) Tib.

न स्वयमुत्पद्यते[1] न च पुनर्महामते ते नोत्पद्यन्ते ऽन्यत्र समाध्यवस्थायां[2] तेनोच्यन्ते[3] ऽनुत्पन्ना निःस्वभावाः । [4]अनुत्पत्तिं संधाय महामते निःस्वभावाः सर्वस्वभावाः[5] क्षणसंततिप्रबन्धाभावाच्चान्यथाभाव[6]दर्शनान्महामते निःस्वभावाः सर्वभावाः[7] । तेनोच्यन्ते निःस्वभावाः सर्वभावा इति ॥

अद्वयलक्षणं पुनर्महामते कतमद्यदुत च्छायातपवद्दी[8]र्घह्रस्वकृष्णशुक्लवन्महामते द्वयप्रभाविता न पृथक्पृथक् । एवं संसारनिर्वाणवन्महामते सर्वधर्मा अद्वयाः । न यत्र महामते निर्वाणं तत्र संसारः । न च यत्र संसारः तत्र निर्वाणं विलक्षणहेतुसद्भावात् । तेनोच्यन्ते ऽद्वया संसारपरिनिर्वाणवत्सर्वधर्मा इति । तस्मात्तर्हि महामते शून्यतानुत्पादाद्वयनिःस्वभावलक्षणे योगः करणीयः ॥

अथ खलु भगवांस्तस्यां वेलायामिमे गाथे ऽभाषत ॥

देशेमि शून्यतां नित्यं शाश्वतोच्छेदवर्जिताम् ।
संसारं स्वप्नमायाख्यं न च कर्म विनश्यति ॥१३७॥
आकाशमथ निर्वाणं निरोधं[9] द्वयमेव च ।

[1] न्ते ? [2] यां A. I. T. यान् C. K. [3] ते A. I. K. न्ते C. T. [4] भावनु A. C. K. T. भावाः । अनु I. [5] सर्वभावाः Tib. [6] °भावा C. I. [7] सर्वधर्माः Tib. [8] तः परत् A. तः पर्वत C. तपर्वत I. तः पवत् K. तपवत् T. [9] निरुद्धो T.

बाला[1] कल्पेन्त्यकृतकानार्या नास्त्यस्तिवर्जिताः[2] ॥१३८॥

अथ खलु भगवान्पुनरपि महामतिं बोधिसत्त्वं महा-
सत्त्वमेतदवोचत् । एतद्धि महामते शून्यतानुत्पादाद्वय-
निःस्वभावलक्षणं सर्वबुद्धानां सर्वसूत्रान्तगतं यत्र क्वचि-
त्सूत्रान्ते ऽयमेवार्थो विभावयितव्यः । एष हि महामते
सूत्रान्तः सर्वसत्त्वाशय[3]देशनार्थ[4]व्यभिचारिणी न सा तत्त्व-
प्रत्य[5]वस्थानकथा । तद्यथा[6] महामते मृगतृष्णिका मृगो-
ल्लापिन्यु[7]दकभावाभिनिवेशेनाभिनिविश्यते तस्यां चोदकं
नास्ति । एवमेव महामते सर्वसूत्रान्तदेशना धर्मा बा-
लानां स्वविकल्पसंतोषणं न तु सा तत्त्वार्यज्ञानव्यव-
स्थानकथा । तस्मात्तर्हि महामते अर्थानुसारिणा भवि-
तव्यं न देशनाभिलापा[8]भिनिविष्टेन ॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्त-
मेतदवोचत् । तथागतगर्भः पुनर्भगवता सूत्रान्तपाठे ऽनु-
वर्णितः । स च किल त्वया प्रकृतिप्रभास्वरविशुद्ध्यादि-
विशुद्ध एव वर्ण्यते द्वात्रिंशल्लक्षणधरः सर्वसत्त्वदेहान्त-
र्गतो महार्घमूल्यरत्न[9]मलिनवस्तुपरिवेष्टितमिव स्कन्धधा-
त्वायतनवस्तुवेष्टितो रागद्वेषमोहाभूतपरिकल्पमलमलिनो

[1] लाः ? [2] न is added in A. नु id. in C. K. न् id. in I. T. [3] र्या A. C. I. [4] स्या is added in A. C. I. [5] तत्त्वव्यव Tib. [6] Left out in T. [7] नी उद A. C. K. T. मृगः अत्रापि नी उद I. [8] प्य instead of पा in T. [9] रत्नं I. Chin. Tib.

नित्यो ध्रुवः शिवः[1] शाश्वतश्च[1] भगवता वर्णितः । तत्क=
थमयं भगवंस्तीर्थकरात्मवादतुल्यस्तथागतगर्भवादो न भ=
वति । तीर्थकरा अपि भगवन्नित्यः कर्ता निर्गुणो विभू[2]=
र्व्यय इत्यात्मवादोपदेशं कुर्वन्ति ॥

भगवानाह । न हि महामते तीर्थकरात्मवादतुल्यो मम
तथागतगर्भोपदेशः । किं तु महामते तथागताः शून्यता-
भूतकोटिनिर्वाणानुत्पादानिमित्ताप्रणिहिताद्यानां महा-
मते पदार्थानां तथागतगर्भोपदेशं कृत्वा तथागता अर्ह=
न्तः सम्यक्संबुद्धा बालानां[3] नैरात्म्यसंत्रासपदविवर्जितार्थं[4]
निर्विकल्पनिराभासगोचरं तथागतगर्भमुखोपदेशेन देश=
यन्ति । न चात्र महामते अनागतप्रत्युत्पन्नैः बोधिसत्त्वै=
र्महासत्त्वैरात्माभिनिवेशः कर्तव्यः । तद्यथा महामते कुम्भ=
कार एकस्मान्मृत्परमाणुराशेर्विविधानि भाण्डानि करोति
हस्तशिल्पदण्डोदकसूत्रप्रयत्नयोगात् एवमेव महामते त=
थागतास्तदेव धर्मनैरात्म्यं सर्वविकल्पलक्षणविनिवृत्तं वि=
विधैः प्रज्ञोपायकौशल्ययोगैर्गर्भोपदेशेन वा नैरात्म्योप=
देशेन वा कुम्भकारवच्चित्रैः पदव्यञ्जनपर्यायैर्देशयन्ते[5] ।
एतस्मात्कारणान्महामते तीर्थकरात्मवादोपदेश[6]तुल्यस्तथा=

[1] Left out in T. [2] भु A. I. T. भू C. K. [3] बाला left out in T. [4] जैना C. I. T. [5] यंत A. K. यत C. I. यत्य T. [6] शस्तु T. From शतुल्य till गर्भोपदे (before शेन निर्दिशन्ति in the next page) left out in K. till शन्ति id. in A.

गतगर्भोपदेशो न भवति । एवं हि महामते तथागतग-र्भोपदेशमात्मवादाभिनिविष्टानां[1] तीर्थकराणामाकर्षणार्थं तथागतगर्भोपदेशेन निर्दिशन्ति । कथं[2] वताभूतात्मवि-कल्पदृष्टिपतिताशया विमोक्षत्रयगोचरपतिताशयोपेताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्येरन्निति । एतदर्थं महामते तथागता अर्हन्तः सम्यक्संबुद्धास्तथागतगर्भोप-देशं कुर्वन्ति । अत एतन्न भवति तीर्थकरात्मवादतुल्यम् । तस्मात्तर्हि महामते तीर्थकरदृष्टिविनिवृत्त्यर्थं तथागतनै-रात्म्यगर्भानुसारिणा च ते[3] भवितव्यम् ॥

[4]अथ खलु भगवांस्तस्यां वेलायामिमां[5] गाथा[6]मभाषत ॥

पुद्गलः संततिः स्कन्धाः प्रत्यया अणवस्तथा ।
प्रधानमीश्वरः कर्ता चित्तमात्रं विकल्प्यते ॥१३०॥

अथ खलु महामतिर्बोधिसत्त्वोऽनागतां जनतां समा-लोक्य पुनरपि भगवन्तमध्येषते स्म । देशयतु मे[7] भग-वान्योगाभिसमयं यथा बोधिसत्त्वा महासत्त्वा महायो-[8]गयोगिनो भवन्ति । भगवानाह । चतुर्भिर्महामते धर्मैः समन्वागता बोधिसत्त्वा महायो[8]गयोगिनो भवन्ति । क-तमैश्चतुर्भिर्यदुत स्वचित्तदृश्यविभावनतया चोत्पादस्थि-

[1] तथागतास्तथागतगर्भमा° Tib. [2] त्व is added in K. [3] Left out in C. महा-मते is added after ते in I. [4] This passage and the following verse are left out in A. K. [5] मा C. I. मं T. [6] था अ C. I. T. [7] Left out in T. [8] योग left out in I.

तिभङ्गदृष्टिविवर्जनतया च बाह्यभा[1]वाभावोपलक्षणतया च स्वप्रत्यात्मार्यज्ञानाधिगमाभि[2]लक्षणतया च । एभिर्म=हामते चतुर्भिर्धर्मैः समन्वागता बोधिसत्त्वा महासत्त्वा महायोगयोगिनो भवन्ति ॥

तत्र कथं महामते बोधिसत्त्वो महासत्त्वः स्वचित्तदृ=श्यविभावना[3]कुशलो भवति । यदुत स एवं प्रत्यवेक्ष[4]ते स्वचित्तमात्रमिदं त्रैधातुकमात्मात्मीयरहितं निरीहमायू=[5]हनिर्यूहविगतमनादिकालप्रपञ्चदौष्ठुल्यवासनाभिनिवेश-वासितं त्रैधातुक[6]विचित्ररूपोपचारोपनिबद्धं देहभोगप्रति=ष्ठाग[7]तिविकल्पानुगतं विकल्प्य[8]ते ख्यायते च[9] । एवं हि महामते बोधिसत्त्वो महासत्त्वः स्वचित्तदृश्यविभावना=कुशलो भवति ॥

कथं पुनर्महामते बोधिसत्त्वो महासत्त्व उत्पादस्थि=तिभ[10]ङ्गदृष्टिविवर्जितो भवति । यदुत मायास्वप्नरूपजन्म=सदृशाः सर्वभावाः स्वपरोभयाभावान्नोत्पद्यन्ते । स्वचित्त-मात्रानुसारित्वाद्बाह्यभावाभावदर्शनाद्विज्ञानानामप्रवृत्तिं दृष्ट्वा प्रत्ययानामकूटराशित्वं च विकल्पप्रत्ययोद्भवं त्रैधा=

[1] वाभा left out in I. T. [2] ज्ञ is added in A. C. I. [3] न A. C. I. K. ना T.
[4] क्ष्य A. C. I. K. क्ष T. [5] हा in all MSS. [6] कं A. C. I. [7] गति left out in C. I.
[8] ल्प A. I. K. ल्पतं C. ल्प्य T. [9] ख्यायते Chin. without the two words before and after. ख्यायत इति विकल्पते Tib. [10] भंगा A. C. I. K. ग T.

तुकं पश्यन्तो[1] ऽध्यात्मबाह्यसर्वधर्मानुपलब्धिभिर्निःस्वभावदर्शनादुत्पाददृष्टिविनिवृत्तौ मायादिधर्मस्वभावानुगमानुत्पत्तिकधर्मक्षान्तिं प्रतिलभन्ते[2] । अष्टम्यां भूमौ स्थिताः चित्तमनोमनोविज्ञान[3]पञ्चधर्मस्वभावनैरात्म्यद्वयगतिपरावृत्त्यधिगमान्मनोमयकायं प्रतिलभन्ते ॥

महामतिराह[4] । मनोमयकाय इति भगवन्केन कारणेन । भगवानाह । मनोमय इति महामते मनोवदप्रतिहतशीघ्रगामित्वान्मनोमय इत्युच्यते । तद्यथा महामते मनो ऽप्रतिहतं गिरिकू[5]ड्यनदीवृक्षादि[6]ष्वनेकानि योजनशतसहस्राणि पूर्वदृष्टानुभूतान्विषयानन्[7]नुस्मरन् स्वचित्तप्रबन्धावि[8]च्छिन्नशरीरमप्रतिहतगति[9] प्रवर्तते एवमेव महामते मनोमयकायसहप्रतिलम्भेन[10] मायोपमसमेन समाधिना बलवशिताभिज्ञान[11]लक्षणकुसुमितमार्यगतिनि[12]काय[13]सहजो मन इव प्रवर्तते ऽप्रतिहतगतिः पूर्वप्रणिधानविषयान[14]नुस्मरन् सत्त्वपरिपाकार्थम् । एवं हि महामते बोधिसत्त्वो महासत्त्व उत्पादस्थितिभङ्गदृष्टिविवर्जितो भवति ॥

तत्र कथं महामते बोधिसत्त्वो महासत्त्वो बाह्यभा=

[1] पश्यतः in all MSS. but see प्रतिलभन्ते ll. 3 and 5. [2] भंते in all MSS., but I. [3] नं T. [4] Left out in C. T. [5] कु I. [6] दी A. I. K. [7] नि विषयानु A. C. I. [8] न्विर्णं A. [9] तिः C. [10] लभन A. लाभेन C. लभेन I. [11] °भिज्ञान A. C. °भिज्ञा T. but °भिज्ञाज्ञान Tib. [12] मित आर्यनि° Chin. Tib. [13] ताप instead of काय in A. [14] न left out in I.

वाभावोपलक्षणकुशलो भवति[1]। यदुत मरीचिस्वप्नकेशोण्डुकप्रख्या महामते सर्वभावा अनादिकालप्रपञ्चदौष्ठुल्य[2]विचित्रविपाक[3]विकल्पवासनाभिनिवेशहेतुकाः सर्वभावस्वभावा इति संपश्यन्प्रत्यात्मार्यज्ञानगतिविषय[4]मभिलप[5]ते। एभिर्महामते चतुर्भिर्धर्मैः समन्वागता बोधिसत्त्वा महासत्त्वा महायोगयोगिनो भवन्ति। अत्र ते महामते योगः करणीयः॥

अथ खलु महामतिर्बोधिसत्त्वः पुनरपि भगवन्तमध्येषते स्म। देशयतु मे भगवान्हेतुप्रत्ययलक्षणं सर्वधर्माणां येन हेतुप्रत्ययलक्षणावबोधेनाहं चान्ये च बोधिसत्त्वा महासत्त्वा सदसद्दृष्टिविकल्परहिताः सर्वभावनाक्रमं [6]युगपदुत्पत्तिं न कल्पयेयुः॥

भगवानाह। द्विप्रकारं महामते प्रतीत्यसमुत्पादहेतुलक्षणं सर्वधर्माणां यदुत बाह्यं चाध्यात्मिकं च। तत्र बाह्यप्रतीत्यसमुत्पादो महामते मृत्पिण्डदण्डचक्रसूत्रोदकपुरुषप्रयत्नादिप्रत्ययैर्महामते घट उत्पद्यते। यथा च महामते घटो मृत्पिण्डादेव[7] तन्तुभ्यः पटः वीरणेभ्यः कटा[8] बीजादङ्कुरः खण्डादि[9]पुरुषप्रयत्नयोगाद्दध्नो नवनीत उ-

[1] ला भवति A. ला भवन्ति C. I. K. [2] ष्ठु A. C. K. T. ष्ठू I. [3] विपाकविकल्प left out in I. [4] या A. I. K. [5] पं in all MSS. [6] सर्वभावानां क्रमयुग° Chin. Tib. [7] वं Chin. Tib. [8] कटाः in all MSS., but कटो? [9] मन्थादि Tib.

त्पद्यते एवमेव महामते बाह्यः प्रतीत्यसमुत्पादः पूर्वोत्तरोत्तरो[1] द्रष्टव्यम् ॥

तत्राध्यात्मिकः प्रतीत्यसमुत्पादो यदुताविद्या तृष्णा कर्मेत्येवमाद्या महामते धर्माः प्रतीत्यसमुत्पादसंज्ञां प्रतिलभन्ते । एभ्य उत्पन्ना महामते स्कन्धधात्वायतनाख्या धर्माः प्रतीत्यसमुत्पादसंज्ञां[2] प्रतिलभन्ते । ते चाविशिष्टाः [3]कल्प्यन्ते च बालैः ॥

तत्र हेतुर्महामते षड्विधो यदुत भविष्यद्धेतुः संबन्धहेतुर्लक्षणहेतुः[4] कारणहेतु[5]र्व्यञ्जनहेतुरु[6]पेक्षाहेतुर्महामते षष्ठः । तत्र भविष्यद्धेतुर्महामते हेतुकृत्यं करोत्यध्यात्म[7]बाह्योत्पत्तौ धर्माणाम् । संबन्धहेतुः पुनर्महामते आलम्बनकृत्यं करोत्यध्यात्मिकबाह्योत्पत्तौ स्कन्धबीजा[8]दीनाम् । लक्षणहेतुः पुनरपरं महामते अनन्तरक्रियालक्षणोपरिबद्धं[9] [10]जनयति । कारणहेतुः पुनर्महामते आधिपत्याधिकारकृत्यं करोति चक्रवर्तिनृपवत् । व्यञ्जनहेतुः पुनर्महामते उत्पन्नस्य विकल्पस्य भावस्य लक्षणोद्योतनं कृत्यं करोति प्रदीपवद्रूपादीनाम् । उपेक्षाहेतुः पुनर्महामते विनिवृत्तिकाले प्रव=

[1] पूर्वोत्तरो A. K. T.
[2] ज्ञा A. C. K. ज्ञां I. T.
[3] ल्प in all MSS.
[4] लक्षणहेतुः left out in I.
[5] कारणहेतुः left out in A.
[6] तु उपे in all MSS. तुः उपे I. ·तुरपे Chin. Tib.
[7] त्याध्यात्मिकवा° ?
[8] दी left out in A. K.
[9] द्धां A. C. पनिबद्धं Tib.
[10] ज left out in I.

न्धक्रियाव्युच्छित्तिं करोत्यविकल्पोत्पत्तौ ॥

एते हि[1] महामते स्वविकल्पकल्पिता बालपृथग्जनैर्न क्रमवृत्त्या न युगपत्प्रवर्तन्ते । तत्कस्य हेतोर्यदि पुनर्महामते युगपत्प्रवर्तेरन् कार्यकारणविभागो न स्यादप्रतिलब्धहेतुलक्षणत्वात् । अथ क्रमवृत्त्या प्रवर्तेरन् अलब्धस्य लक्षणात्मकत्वात्क्रमवृत्त्या न प्रवर्तते । अजातपुत्र[2]पितृशब्द[3]वन्महामते क्रमवृत्तिसंबन्धयोगा न घटन्ते[4] । तार्किकाणां[5] हेत्वारम्बण[6]निरन्तराधिपतिप्रत्ययादिभिर्जन्यजनकत्वान्महामते क्रम[7]वृत्त्या नोत्पद्यन्ते । परिकल्पितस्वभावाभिनिवेशलक्षणान्महामते युगपन्नोत्पद्यते स्वचित्तदृश्यदेहभोगप्रविष्टानत्वात्स्वसामान्यलक्षणबाह्यभावाभावान्महामते क्रमेण युगपद्वा नोत्पद्यन्ते । अन्यत्र स्वचित्तदृश्यविकल्पविकल्पिततत्वाद्विज्ञानं प्रवर्तते । तस्मात्तर्हि महामते हेतुप्रत्ययक्रियायोगलक्षणक्रमयुगपद्दृष्टिविगतेन ते[8] भवितव्यम् ॥ तत्रेदमुच्यते ॥

न[8] ह्यत्रोत्पद्यते[8] किंचित्प्रत्ययैर्न वि[9]रुध्यते ॥
उत्पद्यन्ते निरुध्यन्ते प्रत्यया एव कल्पिताः ॥१४०॥

[1] एते हि A. K. T. एतैर्हि C. एतर्हि I. [2] त्रं A. त्र C. I. K. [3] शब्दत् A. शब्दन् C. शब्दवद् I. शब्दवत् K. [4] Left out in A. K. [5] क्रमेण is added in A. K. [6] णा in all MSS. [7] व्या is added in C. [8] Left out in A. [9] नि Chin. Tib.

न भङ्गोत्पादसंक्लेशः[1] प्रत्ययानां निवार्यते।
यत्र बाला विकल्पन्ति प्रत्ययैः स निवार्यते ॥१४१॥
यच्चासतः[2] प्रत्ययेषु धर्माणां नास्ति संभवः।
वासनैर्भ्रामितं चित्तं त्रिभवे[3] ख्यायते यतः ॥१४२॥
नाभूत्वा[4] जायते किंचित्प्रत्ययैर्न वि[5]रुध्यते।
बन्ध्यासुताकाशपुष्पं यदा पश्यन्ति संस्कृतम् ॥१४३॥
तदा ग्राहश्च ग्राह्यं च भ्रान्तिं दृष्ट्वा[6] निवर्तते।
न चोत्पाद्यं न चोत्पन्नः प्रत्ययो[7] ऽपि न किं[8]चन[9]।
संविद्यन्ते क्वचित्केचिद्व्यवहा[10]रस्तु कथ्यते ॥१४४॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत्। देशयतु मे भगवान्वाग्विकल्पलक्षणहृदयं नाम धर्मपर्यायं येन वाग्विकल्पलक्षणहृदयेन भगवन्सुप्रतिविभागविनिबद्धे[11]नाहं चान्ये च बोधिसत्त्वा महासत्त्वा अभिलापाभिलाप्यार्थद्वयगतिंगताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्याभिलापाभिलाप्यार्थद्वयगतिं सर्वसत्त्वानां विशोधयेयुः। भगवानाह। तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु।

[1] क्ले (唐) Tib. [2] सदसतः (宋)(唐) Tib. [3] तः (宋)(唐) Tib. [4] न भूत्वा I.
[5] नि Chin. Tib. [6] ष्टा A. I. [7] ये I. [8] के A. I. K. किं C.
[9] प्रत्यया अपि केचन ? [10] हा left out in A. K. [11] न्ध T. According to Tib. निबुद्धे without वि ?

भाषिष्ये ऽहं ते। साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत्। भगवानस्यैतदवोचत्। चतुर्विधं महामते वाग्विकल्पलक्षणं भवति यदुत लक्षणवाक्स्वप्नवाग्दौष्ठुल्यविकल्पाभिनिवेशवागना[1]दिविकल्पवाक्॥

तत्र महामते लक्षणवाक्स्वविकल्परूपनिमित्ताभिनिवेशात्प्रवर्तते। स्वप्नवाक्पुनर्महामते पूर्वानुभूतविषयानुस्मरणात्प्रतिविबुद्धविषयाभावाच्च प्रवर्तते। दौष्ठुल्यविकल्पाभिनिवेशवाक्पुनर्महामते श[2]त्रुपूर्वकृ[3]तकर्मानुस्मरणात्प्रवर्तते। अनादिकालविकल्पवाक्पुनर्महामते अनादिकालप्रपञ्चाभिनिवेशदौष्ठुल्यस्वबीजवासनातः प्रवर्तते। एतद्धि महामते चतुर्वि[4]धवाग्विकल्पलक्षणमिति मे यदुक्तमिदं तत्प्रत्युक्तम्॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतमेवार्थमध्येषते स्म। देशयतु मे[5] भगवान्पुनरपि वाग्विकल्पाभिव्यक्तिगोचरं कुत्र कस्मात्कथं केन भगवन्नृणां वाग्विज्ञप्तिविकल्पः प्रवर्तते। भगवानाह। शिरउरोनासाकण्ठताल्वोष्ठजिह्वादन्तसमवायान्महामते वाक्प्रवर्तमाना प्रवर्तते। महामतिराह। किं पुनर्भगवन्वा=

[1] नादिकालवि Tib. [2] शत्रुन A. सुकृत C. सकृत् I. शत्रुत K. शत्रु T.
[3] कृत् in all MSS., but कृत (宋) (唐) Tib. [4] धं I. T. [5] Left out in T.

ग्विकल्पादन्योतानन्या[1] । भगवानाह । न हि महामते
वाग्विकल्पादन्या नानन्या । तत्कस्य हेतोर्यदुत तद्धेतूत्प=
त्तिलक्षणत्वान्महामते वाग्विकल्पः प्रवर्तते । यदि पुन=
र्महामते वाग्विकल्पादन्या स्यादविकल्पहेतुकी[2] स्यात् ।
अथानन्या स्यात् अर्थाभिव्यक्तित्वाद्वाग्न कुर्यात्सा च कु=
रुते । तस्मान्नान्या नानन्या ॥

पुनरपि महामतिराह । किं पुनर्भगवन्वचनमेव पर=
मार्थ उत यद्वचनेनाभिलप्यते स परमार्थः । भगवा=
नाह । न महामते वचनं परमार्थः न च यद्वचनेना=
भिलप्यते स परमार्थः । तत्कस्य हेतोर्यदुत परमार्थार्य-
सुखा[3]भिलाप[4]प्रवेशित्वात्परमार्थस्य वचनं न परमार्थः ।
परमार्थस्तु महामते आर्यज्ञानप्रत्यात्मगतिगम्यो न वा=
ग्विकल्पबुद्धिगोचरः तेन विकल्पो नो[5]द्भावयति[6] परमा=
र्थम्[7] । वचनं पुनर्महामते उत्पन्नप्र[8]ध्वंसि चपलं परस्परं[9]
प्रत्ययहेतुसमुत्पन्नं यच्च महामते परस्परं प्रत्ययहेतुसमु=
त्पन्नं तत्परमार्थं नोद्भावयति[6] स्वपरलक्षणाभावान्महा-
मते वाग्लक्षणं नोद्भावयति[6] ॥

[1] ०दन्या नानन्या Chin. Tib. [2] कां A. K. कीं C. की I. T. [3] न is added in all MSS., but T. [4] पं I. [5] ल्पे न्यो A. ल्पो नो C. K. T. ल्पेन I. [6] नोद्योतयति in all MSS., but follow Chin. Tib. [7] र्थं A. K. T. र्थं C. I. [8] ध्वं I. [9] र I. T.

पुनरपरं महामते स्वचित्तदृश्यमात्रानुसारित्वाद्विविध-विचित्रलक्षणं[1]बाह्य[2]भावाभावाद्वाग्विकल्पः परमार्थं न विकल्पयति[3][4]। तस्मात्तर्हि महामते वाग्विचित्रविकल्प[5]रहितेन ते[6] भवितव्यम्॥ तत्रेदमुच्यते॥

सर्वभावो ऽस्वभावो हि सद्वचनं[7] तथाप्यसत्।
शून्यताशून्यतार्थं वा बालो ऽपश्यन्[8]विधावति ॥१४५॥
सर्वभाव[9]स्वभावा च वचनमपि नृणाम्।[10]
कल्पना सापि नास्ति निर्वाणं[11] स्वप्नतुल्यम्[12]।
भवं परीक्षेत न[13] संसारे नापि[14] निर्वायात् ॥१४६॥
राजा श्रेष्ठी यथा पुत्रान्विचित्रैर्मृन्मयैर्मृगैः।
प्रलोभ्य क्रीडयित्वा च भूतान्दद्यात्ततो मृगान् ॥१४७॥
तथाहं लक्षणैश्चित्रैर्धर्माणां प्रतिबिम्बकैः।
प्रत्यात्मवेद्यां पुत्रेभ्यो भूतकोटिं वदाम्यहम् ॥१४८॥[15]

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि

[1] णं I. [2] ह्या A. K. [3] From visarga till ल्प left out in T. [4] उद्भावयति Chin. [5] कल्प्य is added in T. [6] Left out in T. [7] द्व in all MSS. [8] स्य A. श्यं C. I. स्यं K. T. [9] वा I. K. T. [10] The following three lines are incomplete. Tib. renders as a verse and a half, as follows: 'All things have no nature. And on examination of man's speech, even it does not exist. Like a flower, a dream, and a vision, on full examination neither one transmigrates nor enters eternal peace.' [11] निर्माण T. [12] ल्य T. [13] Left out in I. [14] संसरेन्नापि I.

[15] The above verses are printed in I. as proses.

भगवन्तमेतदवोचत् । देशयतु मे भगवान्नास्त्यस्तित्वैक=त्वान्यत्वोभयनोभय[1]नैवास्तिननास्तिनित्यानित्यवर्जितं स=र्वतीर्थ्य[2]गतिप्रचारमार्यप्रत्यात्मज्ञानगति[3]गम्यं परिकल्पित-स्वसामान्यलक्षणविनिवृत्तं परमार्थतत्त्वावतारं भूम्यनुसं=धिक्रमोत्तरो[4]त्तरविशुद्धिलक्षणं तथागतभूम्यनुप्रवेशलक्षण-मनाभोगपूर्वप्रणिधानविश्वरूपमणिसदृशविषयानन्तल=क्षणप्रचारं स्वचित्तदृश्यगोचरगतिविभागलक्षणं सर्वधर्मा=णां यथा चाहं चान्ये च बोधिसत्त्वा महासत्त्वा एव=मादिषु परिकल्पितस्वभाव[5]स्वसामान्यलक्षणविनिवृत्तदृष्ट=यः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्य सर्वसत्त्वानां सर्वगुणसंपत्तीः[6] परिपूरयेम ॥

भगवानाह । साधु साधु महामते साधु खलु पुनस्त्वं महामते य[7]स्त्वमेतमर्थमध्येषितव्यं मन्यसे बहुजनहिताय त्वं महामते प्रतिपन्नो बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च म=नुष्याणां च । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महा-मतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भग=

[1] त्कोनोभ A. K. त्वोभयनोभ C. [2] र्थ्या A. C. I. K. र्थ T. [3] गति left out in A. [4] रोत्त left out in T. [5] भावस्व left out in A. K. [6] संवर्त्ती C. [7] यस्त्व in all MSS.

वांस्तस्यैतदवोचत् । स्वचित्तदृश्यमात्रानवबोधान्महामते बालपृथग्जना बाह्यविचित्रभावाभिनिवेशेन च[1] नास्त्यस्तित्वैकत्वान्यत्वोभयनोभय[2]नैवास्तिननास्तिनित्यानित्यस्वभाववासनाहेतुविकल्पा[3]भिनिवेशेन विकल्पयन्ति । तद्यथा महामते मृगतृष्णोदकं मृगा उदकभावेन विकल्प्य ग्रीष्माभितप्ताः पातुकामतया प्रधावन्ति स्वचित्तदृष्टिभ्रान्त्यनवबोधान्न प्रजानन्ति नात्रोदकमिति एवमेव महामते[4] बालपृथग्जना अनादिकालविविधप्रपञ्चविकल्पवासितमतयो रागद्वेषमोहाग्नितापितमनसो विचित्ररूपविषयाभिलाषिण उत्पादभङ्गस्थितिदृष्ट्याशया अ[5]ध्यात्मिकबाह्यभावाभावा[6]कुशलास्त एकत्वान्यत्वनास्त्यस्तित्वग्राहे[7] प्रपतन्ति । तद्यथा महामते गन्धर्वनगरेऽविदुषामनगरं[8] नगरसंज्ञा भवति । सा च नगराकृतिरनादिकालनगरबी[9]जवासनाभिनिवेशात्ख्याति तच्च नगरं नानगरं न नगरम् एवमेव महामते अनादिकालतीर्थ्यप्रपञ्चवा[10]दवासनाभिनिविष्टा एकत्वान्य[11]त्वास्तित्वनास्ति[12]त्ववादानभिनिविशन्ते स्वचित्तदृश्यमात्रानवधारितमतयः ।

[1] Left out in T. [2] नोभय left out in A. K. [3] णा is added in T. [4] सर्वधर्मा is added in all MSS., but T. [5] अ in all MSS. [6] भावा left out in T. [7] ग्राहे left out in T. [8] नगरे is added in A. K. [9] वीजा in all MSS. [10] दि T. [11] न्यत्वा left out in A. [12] नास्तित्व left out in A.

तद्यथा महामते कश्चिदेव पुरुषः शयितः स्वप्नान्तरे स्त्रीपुरुषहस्त्यश्वरथपदातिग्रामनगरनिगमगो[1]महिषवनोद्यानविविधगिरिनदीतडागोपशोभितं जनपदमन्तःपुरं प्रविश्य प्रतिविबुध्येत स प्रतिविबुद्धः संस्तदेव जनपदमन्तःपुरं समनुस्मरेत्। तत्किं मन्यसे महामते अपि नु स पुरुषः पण्डितजातीयो भवेत् यस्तदभूतं स्वप्नवैचित्र्यमनुस्मरेत्। आह। नो हीदं भगवन्[2] ॥

भगवानाह। एवमेव महामते बालपृथग्जनाः कुदृष्टि[3]दृष्टास्तीर्थ्यमतयः स्वप्नतुल्यात्स्वचित्तदृश्यभावान्न[4] प्रतिविजानन्त एकत्वान्यत्वनास्त्यस्तित्वदृष्टिं समाश्रयन्ते। तद्यथा महामते चित्रकरकृतप्रदे[5]शा अनिम्नोन्नताः सन्तो[6] निम्नोन्नता बालैः कल्प्यन्ते एवमेव महामते भविष्यन्त्यनागते ऽध्वनि ती[7]र्थ्यदृष्टिवासनाशयप्रतिविकल्पपुष्टाः। त एकत्वान्यत्वोभयानुभयवादाभिनिविष्टाः स्वयं नष्टा अन्यानपि सदसत्पक्षविविक्तानुत्पादवादिनो नास्तिका[8] इति वक्ष्यन्ति। एते हेतुफलापवादिनो दुर्दर्शनोन्मूलितहेतुकुशलशुक्लपक्षाः। एते श्रेयोर्थिभिर्दूरतः परिवर्ज्या इति वक्ष्यन्ते। ते च स्वपरोभयदृष्टिपतिताशया नास्त्य=

[1] Left out in A. K. [2] Left out in A. [3] दृष्ट्या instead of दृष्टिदृष्टा in A. K. °दृष्टा (宋) (唐) Tib. [4] न T. [5] वे T. [6] बालैः is added in A. [7] र्थ A. K. [8] 無(宋) (唐) 不正見者(魏)

स्तित्व[1]विकल्पसमारोपापवादकुदृष्टिपतिताशया नरकपरा=
यणा भविष्यन्ति । तद्यथा महामते तैमिरिकाः केशो=
ण्डुकं दृष्ट्वा परस्परमाचक्षत इदं चित्रमिदं चित्रमिति
पश्यन्तु भो मार्षाः तच्च केशोण्डुकमभयानु[2]त्पन्नतया न
भावो नाभावो दर्शनादर्शनतः एवमेव महामते तीर्थ्य[3]-
कुदृष्टिविकल्पाशयाभिनिविष्टाः सदसत्पक्षैकत्वान्यत्वोभ=
यानुभयत्व[4]वादाभिनिविष्टाः सद्धर्मापवादका आत्मानं प=
रांश्च विनिपातयिष्यन्ति । तद्यथा महामते अचक्रमला=
तचक्रं बालैश्चक्रभावेन परिकल्प्यते न पण्डितैः एवमेव
महामते कुदृष्टितीर्थ्याशयपतिता एकत्वान्यत्वोभयानुभ=
यत्वं परिकल्पयिष्यन्ति सर्वभावोत्पत्तौ । तद्यथा महामते
देवे प्रवर्षति जलबुद्बुदकाः[5] स्फटिकमणिसदृशाः ख्याय=
न्ते । तत्र च बालाः स्फटिकमणिभावमभिनिवेश्य प्र=
धावन्ति । ते च महामते उदकबुद्बुदका न मणयो ना=
मणयो ग्रहणाग्रहणतः । एवमेव महामते तीर्थ्यदृष्टिवि=
कल्पाशयवासनावासिता असतश्चोत्पादं वर्णयिष्यन्ति
प्रत्ययैः सतश्च विनाशम्[6] ॥

पुनरपरं महामते प्रमाणत्रयावयवप्रत्यवस्थानं कृत्वा=

[1] त्वं T. [2] अभयान् left out in A. K. T. मत्पन्नानु Tib. [3] र्थ्या in all MSS., but T. [4] त्वे in all MSS., but T. [5] का A. C. I. K. काः T. [6] सम् A. I. K. शम् C. T.

र्यज्ञानप्रत्यात्माधिगम्यं स्वभावद्वयविनिर्मुक्तं वस्तु स्वभा=
वतो विद्यत इति विकल्पयिष्यन्ति। न च महामते चि=
त्तमनोमनोविज्ञानचित्त[1]पराावृत्त्याश्रयाणां स्वचित्तदृश्य-
ग्राह्यग्राहकविकल्पप्रहीणानां तथागतभूमिप्रत्यात्मार्यज्ञा=
नगतानां योगिनां भावाभावसंज्ञा प्रवर्तते ॥

यदि पुनर्महामते योगिनामेवं[2]गतिविषयाणां भावा=
भावग्राहः प्रवर्तते स एवैषामात्मग्राहः पोषग्राहः पुरु=
षग्राहः पुद्गलग्राहः स्यात् या पुनरेवं[3] महामते भाव-
स्वभाव[4]स्वसामान्यलक्षणदेशना एषा महामते नैर्मा=
णिकबुद्धदेशना न धर्मताबुद्धदेशना । देशना पुन=
र्महामते बालाशयगतदृष्टिप्रवृत्ता न च प्रत्यवस्थानग=
तिस्वभावधर्मार्यज्ञानप्रत्यात्माधिगमसमाधिसुखविहारमु=
द्भावयति । तद्यथा महामते जलान्तर्गता वृक्षच्छाया
ख्यायते सा च न च्छाया नाच्छाया वृक्षसंस्थानासं=
स्थानतः एवमेव महामते तीर्थ्यदृष्टिवासनावासितविक=
ल्पा एकत्वान्यत्वोभयत्वानुभयत्वनास्त्यस्तित्वं विकल्पयि=
ष्यन्ति स्वचित्तदृश्यमा[5]त्रानवधारितमतयः। तद्यथा महा-
मते दर्पणान्तर्गतानि सर्वरूपप्रतिविम्बकानि ख्यायन्ते

[1] चित्त left out in (魏) (唐) Tib. [2] व I. [3] षां A. C. I. K. षा T. वं Tib. [4] भावस्वभाव left out in C. I. T. [5] ना T.

यथाप्रत्ययतः स्वविकल्पनाच्च[1] न तानि विम्बानि नावि=म्बानि विम्बाविम्बदर्शनतः । अथ च ते महामते स्वचित्तदृश्यविकल्पाः ख्यायन्ते बालानां विम्बाकृतयः । एवमेव महामते स्वचित्तप्रतिविम्बानि ख्यायन्त एकत्वान्यत्वोभयानुभयदृष्ट्याकारेण । तद्यथा महामते [2]प्रतिश्रुत्का पुरुषनदीपवनसंयोगात्प्रवर्तमानानुश्रूयते सा च न भावा नाभावा घोषाघोषश्रवणतः एवमेव महामते नास्त्यस्तित्वैकत्वान्यत्वोभयनोभयदृष्टिस्वचित्तवासनाविकल्पाः ख्यायन्ते । तद्यथा महामते निस्तृणगुल्मलतावनायां मेदिन्यामादित्यसंयोगान्मृगतृष्णिकास्तरङ्गवत्स्यन्दन्ते ते च न भावा नाभावा लोभ्यालोभ्यतः[3] एवमेव महामते बालानामनादिकालप्रपञ्च[4]दौष्ठुल्यवासनावासितं विकल्पविज्ञानमुत्पादस्थितिभङ्गैकत्वान्यत्वोभयानुभयनास्त्यस्त्यार्यप्रत्यात्मज्ञानवस्तु[5]मुखेन मृगतृष्णिकावत्तरङ्गायते । तद्यथा महामते वेतालयन्त्रपुरुषौ निःसत्त्वौ [6]पिशाचयुक्तियोगात्स्पन्दनक्रियां कुर्वाते । तत्र चासद्विकल्पे बाला अभिनिविशन्ते गमनागमनतः । एवमेव महामते बा=

[1] According to Chin., this word ought to be ऽविकल्पानि I. reads यतः अविकल्पाः न च तानि

[2] From प्रति till महामते (before निस्तृण°) left out in I.

[3] लोभालोभतः (求) Tib.

[4] दौष्ठु A. C. K. T. दौष्ठू I.

[5] सु A. C. K.

[6]毗舍闍機關 (唐)

लपृथग्जनाः कुदृष्टितीर्थ्याशयपतिता एकत्वान्यत्ववादा=
नभिनिविशन्ते स चासद्भूतसमारोपः। तस्मात्तर्हि महा-
मते उत्पाद[1]स्थितिभङ्गैकत्वान्यत्वोभयानुभयनास्त्यस्त्यार्य-
प्रत्यात्मवस्त्वधिगमविकल्परहितेन भवितव्यम् ॥ तत्रेदमु=
च्यते ॥

[2]जलवृक्ष[3]च्छायासदृशाः स्कन्धा विज्ञानपञ्चमाः[4]।
मायास्वप्नोपमादृ[5]शा विज्ञप्त्या मा विकल्पयते[6]॥१४९॥
केशोण्डुकप्रख्यमिदं मरीच्युदकविभ्रमत्।
त्रिभवं स्वप्नमायाख्यं विभावे[7]न्तो विमुच्यते ॥१५०॥
मृगतृष्णा यथा ग्रीष्मे स्पन्दते चित्तमोहनी।
मृगा गृह्णन्ति पानीयं न चास्यां वस्तु विद्यते॥१५१॥
तथा विज्ञानवीजं हि स्पन्दते दृष्टिगोचरे।
बाला गृह्णन्ति[8] जायन्तं[9] ति[10]मिरं तैमिरा यथा ॥१५२॥
अनादिगतिसंसारे भावग्राहो[11]पगू[12]हितम्।
बालः[13] कीले यथा[14] कीलं प्रलोभ्य विनिवर्तयेत्॥१५३॥
मायावेतालयन्त्राभं स्वप्नविद्युद्घनं सदा।

[1] उत्पादानुत्पाद I. [2] These two verses are printed in I. as proses. [3] जले वृच्छा° or जले ऽगच्छा°? [4] पञ्चकाः (唐) Tib. [5] मं दृश्य T. पमादृश्या? [6] विकल्पते I. विकल्पय (魏) Tib. [7] व A. वे C. I. K. T. [8] गृह्णत्य A. C. K. गृह्णन्त्य I. गृह्णन्ति T. [9] यंत A. यंतं C. K. T. यंते I. [10] ति left out in A. [11] हाव Chin. Tib. [12] ही A. C. [13] लं (魏) (唐) Tib. [14] लकीलेत यथा A. बालः कीलेद्यथा C.

त्रि[1]संततिव्यवच्छिन्नं जगत्पश्य विमुच्यते ॥१५४॥
न ह्यत्र काचिद्विज्ञप्तिर्मरीचीनां यथा नभे ।
एवं धर्मान्विजानन्तो न किंचित्प्रतिजानते ॥१५५॥
विज्ञप्तिर्नाममात्रेयं[2] लक्षणेन न विद्यते ।
स्कन्धाः केशोण्डुकाकारा यत्र चासौ विकल्प्यते ॥१५६॥
चित्तं केशोण्डुकं मायास्वप्नगन्धर्वमेव च ।
अलातं मृगतृष्णा च असन्तः ख्याति वै नृणाम् ॥१५७॥
नित्यानित्यं तथैकत्वमुभयं नोभयं तथा ।
अनादिदोषसंबन्धा बालाः कल्पन्ति मोहिताः ॥१५८॥
दर्पणे उदके नेत्रे भाण्डेषु च मणीषु[3] च[3] ।
विम्बं हि दृश्यते तेषु विम्बं नास्ति च कुत्रचित् ॥१५९॥
भावाभासं तथा चित्तं[4] मृगतृष्णा यथा नभे ।
दृश्यते चित्ररूपेण स्वप्ने वन्ध्यौरसो यथा ॥१६०॥

पुनरपरं महामते चतुष्टयविनिर्मुक्ता तथागतानां धर्मदेशना यदुतैकत्वान्यत्वोभयानुभयपक्षविवर्जिता[5] नास्त्यस्तिसमारोपापवादविनिर्मुक्ता सत्यप्रतीत्यसमुत्पादनिरोध[6]मार्गविमोक्षप्रवृत्तिपूर्वका महामते तथागतानां धर्मदेशना । न प्रकृतीश्वरा[7]हेतुयदृच्छाणु[8]कालस्वभावोपनि=

[1] तृ in all MSS. [2] दं in all MSS. [3] Left out in A. [4] चित्तं (唐) Tib.
[5] तं T. [6] मार्ग is put in before निरोध in A. K. and left out in I. [7] श्वरहेतु in all MSS., but 無因 (宋) (魏) [8] च्छांड A. च्छान् C.

बद्धा महामते तथागतानां धर्मदेशना[1] ॥

पुनरपरं महामते क्लेशज्ञेयावरणद्वयविशुद्ध्यर्थं सार्थवाहवदानुपूर्व्या अष्टोत्तरे निराभासपदशते प्रतिष्ठापयन्ति यानभूम्यङ्गसुविभागलक्षणे च ॥

पुनरपरं महामते चतुर्विधं ध्यानं कतमच्च[2]तुर्विधं यदुत बालोपचारिकं ध्यानमर्थप्रविचयं ध्यानं तथतालम्बनं ध्यानं ता[3]थागतं चतुर्थं ध्यानम् । तत्र महामते बा[4]लोपचारिकं ध्यानं कतमद्यदुत श्रावकप्रत्येकबुद्धयोगयोगिनां पुद्गलनैरात्म्यभावस्वसामान्यविम्बसंक[5]लानित्यदुःखाशुभलक्षणाभिनिवेशपूर्वकमेवमिदं लक्षणं नान्यथेति पश्यतः पूर्वोत्तरोत्तर[6]त [7]आसंज्ञानिरोधाद्बालोपचारिकं भवति । तत्रार्थप्रविचयध्यानं पुनर्महामते कतमद्यदुत पुद्गलनैरात्म्यस्वसामान्यलक्षणबाह्यतीर्थ[8]करस्वपरोभयाभावं कृत्वा धर्मनैरात्म्यभूमिलक्षणार्थं प्रविचयानुपूर्वकमर्थप्रविचयध्यानं भवति । तत्र तथतालम्बनं ध्यानं[9] महामते कतमद्यदुत परिकल्पितनैरात्म्यद्वयविकल्पयथाभूतावस्थानादप्रवृत्तेर्विकल्पस्य तथतालम्बनमिति वदामि । ता=

[1] Left out in T. [2] त्त is added in C. K. [3] त A. K. ता C. I. T. [4] चा C. I. [5] कङ्काला Chin. Tib. [6] रा in all MSS., but T. [7] From आसं° till यदुत left out in T. [8] र्थ्य T. [9] पुनर् instead of ध्यानं in T. and the latter is put in after महामते in T. where it is repeated in A. I. K.

थागतं पुनर्महामते ध्यानं कतमद्यदुत ताथागतभूम्याकार=प्रवेशं प्रत्यात्मार्यज्ञानलक्षणत्रयसुखविहाराचिन्त्यसत्त्व-कृत्यकरणतया ताथागतं ध्यानमिति वदामि ॥ तत्रेद=मुच्यते ॥

अर्थप्रविचयं ध्यानं ध्यानं बालोपचारिकम् ।
तथतालम्बनं ध्यानं ध्यानं ताथागतं शुभम् ॥१६१॥
सोमभास्करसंस्थानं पद्मपातालसादृशम् ।
गगना[1]ग्निचित्रसदृशं योगी पुञ्जान्[2]प्रपश्यति ॥१६२॥
निमित्तानि च चित्राणि तीर्थमार्गं नयन्ति ते ।
श्रावकत्वे निपातन्ति प्रत्येकजिनगोचरे ॥१६३॥
विधूय सर्वाण्येतानि निराभासं यदा भवेत् ।
तदा बुद्धकरादित्याः सर्वक्षेत्रा समागताः ।
शिरो हितस्य मार्जन्ति निमित्तं तथतानुगम् ॥१६४॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत् । निर्वाणं निर्वाणमिति भगवन्नु=च्यते कस्यैतद्भगवन्नधिवचनं यदुत निर्वाणमिति । भग=वानाह । सर्वविज्ञानस्वभाववासनालयमनोमनोविज्ञा=नदृष्टिवासनापरावृत्ति[3]र्निर्वाणमित्युच्यते सर्वबुद्धैर्मया च निर्वा[4]णगतिस्वभावशून्यतावस्तुगोचरम्[5] ॥

[1] नभोग्नि° ? Chin. Tib. [2] पूजान् A. पूंजान् C. K. पुंजात् I. पुंज T. युञ्जन्प्र° Chin. Tib. [3] त्ति in all MSS., but Chin. [4] र्मा I. [5] र A. C. K. रं I. T.

पुनरपरं[1] महामते निर्वाणमार्यज्ञानप्रत्यात्मगतिगोचरं शाश्वतोच्छेदविकल्पभावाभावविवर्जितम् । कथं न शाश्वतं यदुत स्वसामान्यलक्षणविकल्पप्रहीणमतो न शाश्वतम् । तत्रानुच्छेदो यदुत सर्वार्या अतीतानागतं[2]प्रत्युत्पन्नाः प्रत्यात्ममपि[3] गच्छन्त्यतो नोच्छेदः ॥

पुनर्महामते महापरिनिर्वाणं न नाशो न मरणम् । यदि पुनर्महामते महापरिनिर्वाणं मरणं स्यात्पुनरपि जन्मप्रबन्धः स्यात् । अथ विनाशः स्यात्संस्कृतलक्षणपतितं स्यात् । अत एतस्मात्कारणान्महामते महापरिनिर्वाणं न नाशं[4] न मरणं च्युतिविगतं मरणमधिगच्छन्ति योगिनः । पुनरपरं महामते महा[5]परिनिर्वाणमप्रहीणासंप्राप्तितो ऽनुच्छेदाशाश्वतो नैकार्थतो नानर्थतो निर्वाणमित्युच्यते ॥

पुनरपरं महामते श्रावकप्रत्येकबुद्धानां निर्वाणं स्वसामान्यलक्षणावबोधादसंसर्गतो विषयाविपर्यासदर्शनाद्विकल्पो न प्रवर्तते । ततस्तेषां तत्र निर्वाणबुद्धिर्भवति ॥

पुनरपरं महामते द्विप्रकारं[6] स्वभावद्वय[7]लक्षणं भवति ।

[1] From पुन° till चरं left out in I. [2] ताः T. where प्रत्युत्पन्नाः is left out. [3] त्मममपि A. C. K. त्म अपि I. त्मगति T. त्मगतिं (宋) (唐) Tib. [4] शं न मरणं left out in I. र्वाण नास च्यु T. [5] महापरि left out in I. T. [6] प्रकारं left out in T. [7] यं T.

कतमद्द्विप्रकारं यदुताभिलापस्वभावाभिनिवेशतश्च वस्तु-स्वभावाभिनिवेशतश्च[1]। तत्र महामते अभिलापस्वभा-वाभिनिवेशो ऽनादिकालवाक्प्रपञ्चवासनाभिनिवेशा-त्प्रवर्तते। तत्र वस्तुस्वभावाभिनिवेशः पुनर्महामते स्व-चित्तदृश्यमात्रान[2]वबोधात्प्रवर्तते ॥

पुनरपरं महामते अधिष्ठानद्वयाधिष्ठिता बोधिसत्त्वा[3]-स्तथागतानामर्हतां सम्यक्संबुद्धानां चरणयोर्निपत्य प्र-श्नान्परिपृच्छन्ति। कतमेनाधिष्ठानद्वयेनाधिष्ठिता यदुत समाधिसमापत्त्यधिष्ठानेन सर्वकायमुखपाण्यभिषेकाधि-ष्ठानेन च। तत्र महामते बोधिसत्त्वा महासत्त्वाः प्रथ-मायां भूमौ बुद्धाधिष्ठानाधिष्ठिता महायानप्रभासं नाम बोधिसत्त्वसमाधिं समापद्यन्ते। समनन्तरसमापन्नानां च तेषां बोधिसत्त्वानां महासत्त्वानां महायानप्रभासं[4] [5]बो-धिसत्त्व[6]समाधिम् अथ दशदिग्लोकधातुव्यवस्थितास्तथा-गता अर्हन्तः सम्यक्संबुद्धा मुखान्युपद[7]र्श्य सर्वकायमु-खवाचा संदर्शनेनाधिष्ठानं कुर्वन्ति। यथा महामते व-ज्रगर्भस्य बोधिसत्त्वस्य महासत्त्वस्यान्येषां च तादृ[8]ग्लक्ष-

[1] This long compound left out in T. [2] न left out in A. K. [3] महासत्वा is added in T. [4] स A. C. K., सं I. T. [5] न is added in all MSS., but T. [6] सत्त्व left out in I. [7] द left out in A. K. [8] तदृग्ल A. तादृग्ल C. तादृशत्र I. तादृग्ल K. तादृ T.

णगुणसमन्वागतानां बोधिसत्त्वानां महासत्त्वानामेवं[1] महामते प्रथमायां भूमौ बोधिसत्त्वा महासत्त्वाः समाधिसमापत्त्यधिष्ठानं प्रतिलभन्ते। कल्पशतसहस्रं संचितैः कुशलमूलैरनुपूर्वेण भूमिपक्षविपक्ष[2]लक्षणगतिंगता[3] धर्ममेघायां बोधिसत्त्वभूमौ महापद्मविमानासनस्थस्य बोधिसत्त्वस्य महासत्त्वस्य[4] तदनुरूपैर्बोधिसत्त्वैर्महासत्त्वैः परिवृतस्य सर्वरत्नाभरणविभूषितकिरीटस्य हरितालकनकचम्पकचन्द्रांशुमयू[5]खपद्मसदृशा दशदिग्लोकधात्वा[6]गता जिनकरास्तस्य बोधिसत्त्वस्य महासत्त्वस्य [7]पद्मविमानासनस्थस्य मूर्धन्यभिषिञ्चन्ति वशवर्तिचक्रवर्तीन्द्रराजवत्सर्वकायमु[8]खपाण्यभिषेकेन। स च बोधिसत्त्वस्ते च बोधिसत्त्वाः पाण्य[9]भिषेकाधिष्ठानाधिष्ठिता इत्युच्य[10]ते। एतन्महामते बोधिसत्त्वानां महासत्त्वानामधिष्ठानद्वयं येनाधिष्ठानद्वयेनाधि[11]ष्ठिता बोधिसत्त्वा महासत्त्वाः सर्वबुद्धमुखान्यवलोकयन्ति। अन्यत्रा[12]व्यवलोक्यास्तथागता अर्हन्तः सम्यक्संबुद्धाः॥

पुनरपरं महामते यत्किंचिद्बोधिसत्त्वानां महासत्त्वानां

[1] व T. [2] विपक्ष left out in A. K. [3] गतस्य Chin. Tib. [4] Left out in A. K. [5] यु A. C. I. [6] त्वा in T. only. [7] महा is added in T. Tib. [8] सु A. I. K. [9] पाण्या in all MSS., but Tib. [10] च्यं I. [11] ष्ठानाधि left out in T. [12] त्र I.

प्रतिभाते[1] समाध्यृद्धिदेशनाकारेण तत्सर्वबुद्धाधिष्ठानद्वयाधिष्ठितानाम्[2]। यदि पुनर्महामते बोधिसत्त्वानां महासत्त्वानामधिष्ठानमन्तरेण प्रतिभानं प्रतिभायात्[3] बालपृथग्जनानामपि महामते प्रतिभानं[4] प्रतिभायात्। तत्कस्य हेतोर्यदुताधिष्ठाना[5]नधिष्ठितत्वात्। तृणगुल्मवृक्षपर्वता अपि महामते विविधानि च वाद्यभाण्डानि नगर[6]भवनगृहविमानासनस्थानानि तथागतप्रवेशाधिष्ठानेन प्रवाद्यन्ते। किं पुनर्महामते सचेतना मूकान्धबधिरा अपि महामते स्वदोषेभ्यो विमुच्यन्ते। एवं महागुणविशेषं[7] महामते तथागताधिष्ठानम्॥

पुनरपरं महामतिराह। किं पुनर्भगवंस्तथागता अर्हन्तः सम्यक्संबुद्धा बोधिसत्त्वानां महासत्त्वानां समाधिसमापत्त्यवस्थानकाले विशेषभूमौ चाभिषेकाधिष्ठानं प्रकुर्वन्ति। भगवानाह। मारकर्मक्लेशवियुक्तार्थं श्रावकध्यानभूम्यप्रपतनतया च तथागतभूमिप्रत्यात्माधिगमनतया च प्राप्त[8]धर्माधिगमविवृद्धाय[9] च। एतेन महामते कारणेन तथागता अर्हन्तः सम्यक्संबुद्धा बोधिसत्त्वानां[10] महासत्त्वाना[10]मधिष्ठानैरधितिष्ठन्ति। अनधिष्ठिताश्च महामते

[1] भान A. C. भाषते I. T. भाते K. Chin. Tib. [2] ष्ठितम् Tib. [3] भार्या T. [4] Left out in A. K. [5] नान in T. only. [6] भवन left out in A. [7] शोषं A. C. K. शेषं I. T. [8] प्ति in all MSS., but I. [9] विवृद्ध्या ? [10] त्वान् I. T.

बोधिसत्त्वा महासत्त्वाः कुतीर्थ्यश्रावकमाराशयपतिता[1][2] नानुत्तरां सम्यक्संबोधिमभिसंबुध्येरन् । अतस्तेन कारणेन बोधिसत्त्वा महासत्त्वास्तथागतैरर्हद्भिः सम्यक्संबुद्धैरनुगृह्यन्ते ॥ तत्रेदमुच्यते ॥

अधिष्ठानं[3] नरेन्द्राणां प्रणिधानैर्विशोधितम्[4] ।
अभिषेकसमाध्याद्याः प्रथमाद्दशमाय वै ॥१६५॥

अथ खलु महामतिर्बोधिसत्त्वः पुनरपि भगवन्तमेतदवोचत् । प्रतीत्यसमुत्पादं पुनर्भगवता देशयता कारणव्यपदेश एव कृतो न स्वनय[5]प्रकृत्यवस्थानकथा । तीर्थकरा अपि भगवन्कारणात उत्पत्तिं वर्णयन्ति यदुत प्रधानेश्वरपुरुषकालाणु[6]प्रत्ययेभ्यो भावानामुत्पत्तयः । किंतु[7] भगवता प्रत्ययपर्या[8]यान्तरेणोत्पत्तिर्वर्ण्यते भावानां न च सिद्धान्तविशेषान्तरम् । सदसतो हि भगवंस्तीर्थकरा अप्युत्पत्तिं वर्णयन्ति भूत्वा च विनाशं प्रत्ययैर्भा[9]वानाम् । यदप्युक्तं भगवताविद्याप्रत्ययाः संस्कारा यावज्जरामरणमिति अहेतुवादव्यपदेश एष भगवतानुवर्णितो न स हेतुवादः । युगपद्व्यवस्थितानां भगवन्नेतद्भवति । अस्मिन्सतीदं भवतीति न क्रमवृत्त्यपेक्षावस्थितानाम् । किंतु[7] ती=

[1] का in all MSS. [2] मार्गा T. [3] ष्ठानान्तरे Tib. [4] ता T. ताः Tib.
[5] न तु अनय I. [6] वृत्यादे is added in T. [7] Left out in Tib., is it not किंच ?
[8] पर्या left out in T. [9] व C. I. T.

[1]र्थकरव्यपदेश एव भगवन्विशिष्यते न त्वदीयम्[2] । तत्कस्य हेतोस्तीर्थकराणां हि भगवन्कारणमप्रतीत्यसमुत्पन्नं[3] कार्यमभिनिवर्तयति । तव[4] तु भगवन्कारणमपि कार्यापेक्षं कार्यमपि कारणापेक्षं हेतुप्रत्ययसंकर[5]श्चैवमन्योन्यानवस्था प्रसज्यते । अहेतुत्वं च भगवंल्लोकस्यास्मिन्सतीदं[6] ब्रुवतः । भगवानाह । न महामते ममाहे[7]तुककारणवादो हेतुप्रत्ययसंकरश्च प्रसज्यते । अस्मिन्सतीदं[8] ब्रुवतो ग्राह्यग्राहकाभावात्स्वचित्तदृश्यमात्रावबोधात् । ये तु महामते ग्राह्यग्राहकाभिनिविष्टाः स्वचित्तदृश्यमात्रं[9] नावबुध्यन्ते बाह्यस्व[10]विषय[11]भावाभावत्वेन तेषां महामते एष दोषः प्रसज्यते न तु मम प्रतीत्यकारणव्यपदेशं कुर्वतः ॥

पुनरपरं[12] महामतिराह । ननु भगवन्नभिलापसद्भावात्सन्ति सर्वभावाः । यदि पुनर्भगवन्भावा न[13] स्युरभिलापो न[14] प्रवर्तेत[15] च तस्मादभिलापसद्भावाद्भगवन्सन्ति सर्वभावाः । भगवानाह । असतामपि महामते भावानामभिलापः क्रियते यदुत शशविषाणकूर्मरोमबन्ध्यापुत्रादीनां

[1] र्थ्यं T. [2] यः T. [3] न्न A. C. I. K. न्नं T. [4] नय A. K. तव C. I. T. [5] संस्कार in all MSS., but (集) Tib. सत्कार I. [6] According to Tib., it ought to be °तीदं भवतीति [7] मम हे I. [8] According to Tib., it seems to be °न्सतीति [9] त्रा in all MSS., but T. [10] चित्त is added in all MSS., but T. [11] ये A. C. K. यो T. [12] रपि T. [13] From न till भावा (before नामभिलापः क्रियते below) left out in I. [14] प्रवर्तेत is added in Tib. [15] प्रवर्तते is repeated in C.

लोके ऽदृष्टो ऽभिलापः ते च महामते न भावा नाभावा अभिलाप्यन्ते च । तद्यदवोचस्त्वं महामते अभिलापसद्भावात्सन्ति सर्वभावा इति स हि वादः प्रहीणः । न च महामते सर्वबुद्धक्षेत्रेषु प्रसिद्धाभिलापः अभिलापो महामते कृतकः । क्वचिन्महामते बुद्धक्षेत्रे ऽनिमिषप्रेक्षया धर्मो देश्यते क्वचिदिङ्गितैः क्वचिद्भ्रूविक्षेपेण[1] क्वचिन्नेत्रसंचारेण क्वचिद्[2]दास्येन क्वचिद्विजृम्भितेन क्वचिदुत्कासनशब्देन क्वचित्क्षेत्रस्मृत्या क्वचित्स्पन्दितेन । यथा महामते अनिमिषायां गन्धसुगन्धा[3]यां च लोकधातौ समन्तभद्रस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य बुद्धक्षेत्रे ऽनिमिषैर्नेत्रैः प्रेक्ष[4]माणास्ते बोधिसत्त्वा महासत्त्वा अनुत्पत्तिकधर्मक्षान्तिं प्रतिलभन्ते ऽन्यांश्च समाधिविशेषान् । अत एवास्माकारणान्महामते नाभिलापसद्भावात्सन्ति सर्वभावाः । दृष्टं चैतन्महामते इह लोके कृमिमक्षिकैवमाद्या सत्त्वविशेषा अनभिलापेनैव स्वकृत्यं कुर्वन्ति ॥ तत्रेदमुच्यते ॥

आकाशशशशृङ्गं च वन्ध्यायाः पुत्र एव च ।
असन्तो ह्यभिलप्यन्ते तथा भावे[5]षु कल्पना ॥१६६॥
हेतुप्रत्ययसामग्र्यां बालाः कल्प[6]न्ति संभवम् ।

[1] विवरेण in all MSS., but I. T. [2] द्द हा I. द्दा Chin. Tib. [3] सुगन्धगन्धा T.
[4] क्ष्य C. [5] षे A. C. वे I. K. T. [6] ल्पे A. K. T.

अजानाना नयमिदं भ्रमन्ति त्रिभवालये ॥१६७॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत् । नित्यशब्दः पुनर्भगवन्कामभिहितः । भगवानाह । भ्रान्तौ[1] महामते यस्मादियं भ्रान्तिरार्याणामपि ख्यायते ऽविपर्यासतः । तद्यथा महामते मृगतृष्णालातचक्रकेशोण्डुकगन्धर्वनगरमायास्वप्नप्रतिबिम्बाक्षपुरुषा लोके ऽविद्वद्भिर्विपर्यस्यन्ते न तु विद्वद्भिर्न च पुनर्न ख्यायन्ते । सा[2] पुनर्भ्रान्तिर्महामते अनेकप्रकारा ख्यायान्त[3] भ्रान्तेरशाश्वततां[4] कुरुते । तत्कस्य हेतोर्यदुत भावाभावविवर्जितत्वात् । कथं पुनर्महामते भावाभावविवर्जिता भ्रान्तिर्यदुत सर्वबालविचित्रगोचरत्वात्समुद्रतरङ्गगङ्गोदकवत्प्रेतानां दर्शना[5]दर्शनतः । अत एतस्मात्कारणान्महामते भ्रान्तिभावो न भवति यस्माच्च तदुदकमन्येषां ख्यायते ऽतो ह्यभावो न भवति एवं[6] [7]भ्रान्तिरार्याणां विपर्यासाविपर्यासवर्जिता अतश्च महामते ऽ[8]स्मात्कारणाच्छाश्वता भ्रान्तिर्यदुत निमित्तलक्षणाभेदत्वात् । न हि महामते भ्रन्तिर्विविधविचित्रनिमित्तविकल्पेन[9] विकल्प्य=

[1] भ्रान्तो A. C. [2] तस्य A. K. [3] यंते A. K. यते C. I. यत्र T.
[4] सश्चेतता A. शाश्वततः C. सत् चेतो I. साश्वततो K. सास्वततां T. [5] दर्शना left out in A. K. [6] एव in all MSS., but T. [7] From भ्रान्ति° till न हि महामते left out in K.; and from रार्याणां till विधवि left out in A. [8] एत I. T.
[9] विकल्पेन left out in T.

माना भेदमुपयाति । अत एतस्मात्कारणान्महामते भ्रा=
न्तिः शाश्वता ॥

कथं[1] पुनर्महामते भ्रान्तिस्तत्त्वं भवति । येन पुनः का=
रणेन महामते आर्याणामस्यां भ्रान्तौ विपर्यासबुद्धिर्न
प्रवर्तते नाविपर्यासबुद्धि[2]र्नान्यत्र महामते आर्या[3] अस्यां
भ्रान्तौ यत्किंचित्संज्ञिनो भवन्ति[4] नार्यज्ञानवस्तुसंज्ञिनः ।
यत्किंचिदिति महामते बालप्रलाप एष नार्यप्रलापः ।
सा[5] पुनर्भ्रान्तिर्विपर्यासा[6]विपर्यासेन विकल्प्य[7]माना गोत्र-
द्वयावहा भवति यदुतार्यगोत्रस्य वा बालपृथग्जनगोत्रस्य
वा । आर्यगोत्रं पुनर्महामते त्रिप्रका[8]रमुपयाति यदुत श्रा=
वकप्रत्येकबुद्धबुद्धप्रभेदतः । तत्र कथं पुनर्महामते बालै=
र्भ्रान्तिर्विकल्प्यमाना श्रावकयानगोत्रं जनयति यदुत
महामते स्वसामान्यलक्षणाभिनिवे[9]शेनाभिनिविश्यमाना
श्रावकयानगोत्राय संवर्तते । एवं महामते [10]सा भ्रान्तिः
श्रावकयानगोत्रावहा भवति । तत्र कथं पुनर्महामते सैव
भ्रान्तिर्विकल्प्यमाना प्रत्येकबुद्धयानगोत्रावहा भवति य=
दुत [11]तस्या एव महामते भ्रान्तेः[12] स्वसामान्यलक्षणाभिनि=

[1] तत्कथं in A. only. [2] पि is added in A. K. [3] आर्याणाम् I. [4] भवति I.
[5] सो A. K. [6] विपर्यासा in T. only. [7] ल्प A. C. I. K. ल्प्य T. [8] रं T.
०रभेदम् I. [9] वेशेनाभिनि in T. only. [10] From सा भ्रान्तिः till महामते
(before भ्रान्तेः) left out in I. [11] ए T. [12] न्तः T.

वेशासंसर्गतः प्रत्येकबुद्धयानगोचरावहा भवति । तत्र कथं पुनर्महामते पण्डितैः सैव भ्रान्तिर्विकल्प्यमाना बुद्धयान-गोचरावहा भवति यदुत महामते स्वचित्तदृश्यमात्रावबोधाद्बाह्यभावाभावविकल्पनतयाविकल्प्यमाना[1] बुद्धयानगोचरावहा भवति । अत एवं[2] महामते गोचरमेष गोचरार्थः । विचित्रवस्तुभावनः[3] पुनर्महामते बालैर्भ्रान्तिर्विकल्प्यमाना संसारयानगोचरावहा भवति एवमिदं नान्यथेति । अत एतस्मात्कारणान्महामते भ्रान्तिर्विचित्रवस्तुत्वेन कल्प्यते बालैः । सा च न वस्तु नावस्तु सैव महामते भ्रान्तिरविकल्प्यमाना आर्याणां चित्तमनोमनोविज्ञानदौष्ठु[4]ल्यवासनास्वभावधर्मपरावृत्तिभावाद्भ्रान्तिरार्याणां तथतेत्युच्यते । अत एतदुक्तं भवति महामते तथतापि चित्तविनिर्मुक्तस्यै[5]व महामते पदस्याभिद्योतनार्थमिदमुक्तं मया कल्पनैश्च विवर्जितं सर्वकल्पनाविरहितमिति यावदुक्तं भवति ॥

महामतिराह । भ्रान्तिर्भगवन्विद्यते नेति । भगवानाह । मायावन्महा[6]मते न लक्षणाभिनिवेशतो भ्रान्तिर्विद्यते[7] । यदि पुनर्महामते भ्रान्तिर्लक्षणाभिनिवेशेन विद्यते अ=

[1] ल्प A. C. I. K. ल्प्य T. [2] एव I. एतत् T. [3] भावेन I. (宋) (唐) स्वभावेन Tib. [4] दौष्टु A. C. K. T. दौष्टू I. [5] क्तमित्य in all MSS., but follow (唐) Tib. [6] ०वत् स महा० I. [7] Left out in T.

व्यावृत्त एव महामते भावाभिनिवेशः स्यात्प्रतीत्यसमुत्पा=
दवत्तीर्थकरकारणोत्पादवदेतत्स्यान्[1]महामते । महामतिराह ।
यदि भगवन्मायाप्रख्या भ्रान्तिस्तेनान्यस्या भ्रान्तेः[2] का=
रणी भविष्यति । भगवानाह । न महामते माया भ्रा=
न्ति[3]कारणमदौष्ठुल्य[4]दोषावहत्वान्न हि महामते माया दौ=
ष्ठुल्य[4]दोषमावहते । अविकल्प्यमाना माया पुनर्महामते
परपुरुषविद्याधिष्ठानात्प्रवर्तते । न स्वविकल्पदौष्ठुल्य[4]वास=
नाधिष्ठानतः सा न दोषावहा भवति । चित्तदृष्टिमोह[5]मा=
त्रमेतन्महामते बालानां यत्किंचिदभिनिवेशतो न[6] त्वा=
र्याणाम् ॥ तत्रेदमुच्यते ॥

आर्यो न पश्यति भ्रान्तिं नापि तत्त्वं तदन्तरे ।
भ्रान्तिरेव भवेत्तत्त्वं यस्मा[7]त्तत्त्वं तदन्तरे ॥१६८॥
भ्रान्तिं विधूय सर्वां हि निमित्तं जायते यदि ।
सैव तस्य भवेद्भ्रान्तिरशुद्धं तिमिरं यथा ॥१६९॥

पुनरपरं महामते न माया नास्ति साधर्म्य[8]दर्शनात्स=
र्वधर्माणां मायोपमत्वं[9] भवति । महामतिराह । किं पुन=
र्भगवन्विचित्रमायाभिनिवेशलक्षणेन सर्वधर्माणां मायो=

[1] एतस्मात् instead of तीर्थ°स्यान् in I. [2] भ्रान्त्याः I. भ्रान्तिः in all other MSS. [3] न्तिः A. C. I. K. न्ति T. [4] ष्ठु I. [5] न is added in A. I. K. T., but left out in C. [6] शमा न A. K. शतो न C. T. शमानं I. [7] यत्त A. त I. [8] सार्धा in all MSS. सा धर्माद° I. साधर्म्यद° Chin. Tib. [9] न is added in (魏) Tib.

पमत्वं भवति अथ वितथाभिनिवेशलक्षणेन। तद्यदि भगवन्विचित्रमायाभिनिवेशलक्षणेन सर्वधर्माणां[1] मायोपमत्वं भवति हन्त[2] भगवन्न भावा मायोपमाः। तत्कस्य हेतोर्यदुत रूपस्य विचित्रलक्षणाहेतुदर्शनान्न हि भगवन्कश्चिद्धेतुरस्ति येन रूपं विचित्रलक्षणाकारं ख्यायते मायावत्। अत[3] एतस्मात्कारणाद्भगवन्न[4] विचित्रमायालक्षणाभिनिवेशसाधर्म्याद्भावा मायोपमाः॥

भगवानाह। न महामते विचित्रमायालक्षणाभिनिवेशसाधर्म्यात्[5]सर्वधर्मा मायोपमाः। किं तर्हि महामते वितथाशुविद्युत्सदृश[6]साधर्म्येण[7] सर्वधर्मा मायोपमाः। तद्यथा महामते विद्युल्लता[8]क्षणभङ्गदृष्टनष्ट[9]दर्शनं पुनर्बालानां ख्यायते एवमेव महामते[10] सर्वभावा स्वविकल्पसामान्यलक्षणाः[11] प्रविचयाभावान्न ख्यायन्ते रूपलक्षणाभिनिवेशतः॥ तत्रेदमुच्यते॥

न माया नास्ति साधर्म्याद्[12]भावानां कथ्यते ऽस्तिता।
वितथा[13]शुविद्युत्सदृशास्तेन मायोपमाः स्मृताः॥१७०॥

पुनरपरं महामतिराह। यत्पुनरेतदुक्तं भगवतानुत्पन्नाः

[1] सर्वभावानां Tib. [2] Left out in A. and it is put in after भगवन् in C. [3] Left out in A. [4] न् I. [5] र्म्या Tib. [6] तथास्व°त्सदृशा A. C. K. तथात्व°त्सादृश्य I. वितथाशु°त्सदृश T. [7] र्म्यै Chin. [8] ता left out in A. K. [9] नष्टदृष्टि in all MSS., but T. [10] Left out in I. [11] णस्य Tib. [12] र्मभा I. [13] वितथास्व A. I. K. तथास्व C. वितथाशु T.

सर्वभावा मायोपमाश्चेति ननु ते भगवन्नेवं ब्रुवतः पूर्वो=
त्तरवचनव्याघातदोषः प्रसज्यत[1] अनुत्पादं[2] भावानां[3] मा=
योपमत्वेनाभिलपतः[4]। भगवानाह। न महामते मायानु[5]=
त्पादं[2] भावानां[6] मायोपमत्वेनाभिलपतः पूर्वोत्तरवचन-
व्याघातदोषो भवति। तत्कस्य हेतोर्यदुतोत्पादानुत्पादस्व-
चित्तदृश्यमात्रावबोधात्सदसतोर्बाह्यभावाभावा[7]नुत्पत्तिदर्श=
नान्न महामते पूर्वोत्तरवचनव्याघातदोषः प्रसज्यते।
किंतु महामते तीर्थकरकारणपक्षोत्पत्तिव्युदासार्थमिदमु=
च्यते मायावदनुत्पन्नाः सर्वभावाः। तीर्थकरमोहवर्गा[8] हि
महामते सदसतोर्भावानामुत्पत्तिमिच्छन्ति न स्वविकल्प-
विचित्राभिनिवेशप्रत्ययतः। मम तु महा[9]मते न संत्रा=
[10]समुत्पद्यते। अत एतस्मात्कारणान्महामते अनुत्पादाभि=
धानमेवाभिधीयते। भावोपदेशः पुनर्महामते संसारपरि=
ग्रहार्थं च नास्तीत्युच्छेदनिवारणार्थं च मच्छिष्याणां वि=
चित्रकर्मोपपत्त्यायतनपरिग्रहार्थं भावशब्दपरिग्रहेण सं=
सारपरिग्रहः [11]क्रियते। मायाभावस्व[12]भावलक्षणनिर्देशेन
महामते भावस्वभावलक्षणव्यावृत्त्यर्थं बालपृथग्जनानां

[1] ज्ये I. [2] द T. [3] भावाना A. K. T. भावनां C. भावानां I.
[4] तः A. C. I. K. न T. [5] ममानु (宋) (魏) Tib. [6] भावाना A. K.
भावानां C. I. भाव T. [7] भावा left out in A. T. [8] गा T.
[9] महाम left out in I. [10] संत्रांसदु A. K. संत्रासमु C. सन्नासदु Chin. Tib.
[11] कृ T. [12] भाव left out in A. C. K.

कुदृष्टिलक्षणपतिताशयानां स्वचित्तदृश्यमात्रानवधारिणां हेतुप्रत्ययक्रियोत्पत्तिलक्षणाभिनिविष्टानां निवारणार्थं मायास्वप्नस्वभावलक्षणान्सर्वधर्मान्देशयामि एते[1] बालपृथग्जनाः कुदृष्टिलक्षणाशयाभिनिविष्टा आत्मानं परं च सर्वधर्मायथाभूतावस्थानदर्शनाद्विसंवादयिष्यन्ति । तत्र यथाभूतावस्थानदर्शनं महामते सर्वधर्माणां यदुत स्वचित्तदृश्यमात्रावतारः ॥ तत्रेदमुच्यते ॥

अनुत्पादे कारणाभावो भावे संसारसंग्रहः ।
मायादिसदृशं पश्येल्लक्षणं न विकल्पयेत् ॥१७१॥

पुनरपरं महामते नामपदव्यञ्जनकायानां लक्षणमुद्देक्ष्यामः यैर्नामपदव्यञ्जनकायैः सूपलक्षितैर्बोधिसत्त्वा महासत्त्वा अर्थ[2]पदव्यञ्जनानुसारिणः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्य तथैव सर्वसत्त्वानवबोधयिष्यन्ति । तत्र महामते कायो नाम[3] यदुत यद्वस्त्वाश्रित्य[4] नाम क्रियते स कायो वस्तु कायः शरीरमित्यनर्थान्तरम् । एष महामते नामकायः । पदकायः पुनर्महामते यदुत पदार्थकायसद्भावो निश्चयो निष्ठोपलब्धिरित्यनर्थान्तरम् । एष महामते पदकायोपदेशः कृतो मया । व्यञ्जनकायः

[1] च एते A. ॥ एते C. नो चेद् or न चेद् ? (魏) [2] र्घ T. [3] नामकायो Chin. Tib. [4] यद्वम्त्वासृत्य A. K. यद्वस्त्वासृत्य C. यद् वस्तु आश्रित्य I. यद्वस्तासृत्य T.

पुनर्महामते यदुत[1] येन नामपद[2]योरभिव्यक्तिर्भवति व्यञ्जनं लिङ्गं[3] लक्षणमुपलब्धिः प्रज्ञप्तिरित्यनर्थान्तरम् ॥

पुनरपरं महामते पदकायो यदुत पदकार्य[4]निष्ठा । नाम पुनर्महामते यदुताक्षराणां च नामस्व[5]भावभेदो ऽकारा=द्यावद्धकारः[6] । तत्र व्यञ्जनं[7] पुन[8]र्महामते यदुत ह्रस्वदीर्घ-प्लुत[9]व्यञ्जनानि । तत्र पदकायाः पुनर्महामते ये[10] पदवी=थीगामिनो हस्त्यश्वनरमृगपशुगोमहिषाजैडकाद्याः पद-कायसंज्ञां[11] लभन्ते । नाम च व्यञ्जनं च पुनर्महामते चत्वार आरूपिणः स्कन्धा नाम्ना[12]भिलप्यन्त इति कृत्वा नाम स्वलक्षणेन व्यञ्जन[13] इति कृत्वा व्यञ्जनम् । एतन्म=हामते नामपदव्यञ्जनकायानां ना[14]मपदाभिधानलक्षण=मत्र ते परिचयः करणीयः ॥ तत्रेदमुच्यते ॥

व्यञ्जने पदकाये च नाम्नि चापि विशेषतः ।
बालाः सज्जन्ति दुर्मेधा महापङ्के यथा गजाः ॥१७२॥

[1] Left out in T. [2] काय is added in all MSS., but T. [3] ङ्ग in all MSS., but T. [4] काय in all MSS., but I. reads पदस्य निष्ठा 句事究竟（魏） [5] स्वभाव left out in A. K. नाम id. in I. च नाम id. in T. °क्षराणां स्वनाम ? [6] वल्लक्षास् A. K. वद्धकारस् C. बद्धकारः I. वल्लकारः T. [7] व्यञ्जनकायः (魏) (唐) Tib. [8] पुनर् in T. only. [9] स्व is added in I. [10] In T. only. [11] ज्ञा A. C. K. T. ज्ञां I. [12] स्कंधानां ना I. स्कंधानां म्नानि T., but 以名説故(唐) [13] व्यज्यत Chin. Tib. [14] यानाम्ना A. K. या नाम C. यानां नाम I. T.

पुनरपरं महामते युक्तिहेतुबुद्धिवै[1]कल्पात्कुतार्किका दु=
र्विदग्धमतयो ऽनागते ऽध्वनि पृष्टा विद्वद्भिरेकत्वान्यत्वो=
भयानुभयदृष्टिलक्षणविनिर्मुक्तमन्तद्वय[2]विधिं पृच्छद्भिरेवं[3]
वक्ष्य[4]न्त्यप्रश्नमिदं नेदं योनिश इति[5] यदुत रूपादिभ्यो
ऽनित्यतान्यानन्येति । एवं निर्वाणं संस्कारेभ्यो लक्षणा=
ल्लक्ष्यं[6] गुणेभ्यो गुणी भूतेभ्यो भौतिकं दृश्याद्दर्शनं पां=
शुभ्यो अणवो ज्ञानाद्योगिन एवमाद्येनोत्तरोत्तरक्रम[7]ल=
क्षणविधिनाव्याकृतानि पृष्टाः स्था[8]पनीयं भगवताव्याकृ=
तमिति वक्ष्यन्ति । न तु ते मोहपुरुषा[9] एवं ज्ञास्यन्ति
यथा श्रो[10]तॄणां बुद्धिवैकल्यात् । तथागता अर्हन्तः सम्य=
क्संबुद्धा उत्त्रासपदविवर्जनार्थं सत्त्वानां न व्याकुर्वन्ति ।
अव्याकृतान्य[11]पि च महामते तीर्थकरदृष्टिवादव्युदासार्थं
नोपदिश्यन्ते[12] तथागतैः । तीर्थकरा हि महामते एवंवा=
दिनो यदुत स जीवस्तच्छरीरमन्यो जीवो ऽन्यच्छरीरमि=
त्येवमाद्ये ऽव्याकृतवादः । तीर्थकराणां हि महामते का=
रणविसंमूढानामव्याकृतं न तु मत्प्र[13]वचने । मत्प्रवचने[14] तु
महामते ग्राह्यग्राह[15]कविसंयुक्ते विकल्पो न प्रवर्तते । तेषां

[1] वै left out in T. [2] क्रमंतप A. क्रमद्वय C. क्रं अतदद्वय I. क्रमन्तये K. क्रमन्तद्वय T. [3] पृच्छतामेवं in all MSS., but पृच्छद्भिः एवं I. [4] वक्ष्यंति I. [5] Left out in I. [6] क्ष in all MSS. [7] जन for क्रम in K. [8] सहा for स्था in I. [9] न is added in T. [10] स्रो A. K. [11] न for नि अ in T. [12] ते in all MSS. [13] मंप्र A. [14] Left out in A. I. K. T. [15] ग्राह्यग्राह left out in A. I. K.

कथं स्थाप्यं भवेत् । ये तु महामते ग्राह्यग्राहकाभिनिविष्टाः स्वचित्तदृश्यमात्रानवधारितमतयस्तेषां स्थाप्यं भवति । चतुर्विधपदप्रश्नव्याकरणेन महामते तथागता अर्हन्तः सम्यक्संबुद्धाः सत्त्वेभ्यो धर्मं देशयन्ति । स्थापनीयमिति महामते कालान्तरदेशनैषा मया कृतापरिपक्वेन्द्रियाणां न तु[1] परिपक्वेन्द्रियाणां स्थाप्यं भवति ।

पुनरपरं महामते क्रियाकारकरहिताः[2] सर्वधर्मा नोत्पद्यन्ते ऽकारकत्वात्तेनोच्यन्ते ऽनुत्पन्नाः[3] सर्वधर्माः । निःस्वभावाः[4] पुनर्महामते सर्व[5]भावाः[6] केन कारणेन यस्मान्महामते स्वबुद्ध्या विचार्यमाणां[7] स्वसामान्यलक्षणाभावा नावधार्यते तेनोच्यन्ते निःस्वभावाः सर्वधर्मा इति । तत्रानायूहानिर्यूहाः पुनर्महामते सर्वधर्माः केन कारणेन यस्मान्महामते स्वसामान्यलक्षणमायूह्यमानं नायूह्यते निर्यूह्यमानं[8] न निर्यूह्यते ऽत एतस्मात्कारणान्महामते सर्वधर्मा आयूहनिर्यूहविगताः । अनिरुद्धाः पुनर्महामते सर्वधर्माः केन कारणेन यदुत भावस्वभावलक्षणासत्त्वात्सर्वधर्मा नोपलभ्यन्ते तेनोच्यन्ते ऽनिरुद्धाः सर्वधर्मा इति । तत्रानित्याः पुनर्महामते सर्वधर्माः केन कारणेनोच्यन्ते

[1] From तु till °णां left out in I. [2] ण C. I. [3] त्वेन । उच्यंते अनु° I.
[4] च is added in I. [5] र्वे C. I. K. [6] सर्वधर्माः Tib. [7] णाः I. णात् Chin. Tib. [8] ह in all MSS.

यदुत लक्षणो[1]त्पत्त्यनित्यभावात्तेनोच्यन्ते ऽनित्याः सर्वधर्मा इति । तत्र नित्याः पुनर्महामते सर्वधर्माः केन कारणेन यदुत लक्षणोत्पन्नानुत्पन्नाभावादनित्यतया[2] नित्यास्तेनो= च्यन्ते महामते नित्याः सर्वधर्मा इति ॥ तत्रेदमुच्यते ॥

चतुर्विधं व्याकरणमेकांशं परिपृच्छनम् ।
विभज्यं स्थापनीयं च तीर्थवादनिवारणम् ॥१७३॥
सदसतोर्ह्य[3]नु[4]त्पादः सांख्यवैशेषिकैः स्मृतः ।
अव्याकृतानि सर्वाणि तैरेव हि प्रकाशिता[4] ॥१७४॥
बुद्ध्या विवेच्यमानानां स्वभावो नावधार्यते ।
[5]तस्मादनभिलाप्यास्ते निःस्वभावाश्च देशिताः॥१७५॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भ= गवन्तमेतदवोचत् । देशयतु मे भगवान्स्रोतआपन्नानां स्रोतआपत्तिगति[6]प्रभेदनयलक्षणं येन स्रोतआपत्तिगतिप्र= भेदनयलक्षणेनाहं चान्ये च बोधिसत्त्वा महासत्त्वाः स्रो= तआपन्नानां स्रोतआपत्तिगतिप्रभेदनयलक्षणकुशला उ= त्तरोत्तरसकृदागाम्यनागाम्यर्हत्त्वोपायलक्षणविधिज्ञास्तथा सत्त्वेभ्यो धर्मं देशयेयुर्यथा नैरात्म्यलक्षणद्वयमावरणद्वयं

[1] लक्षणा नो° in all MSS., but I. T. [2] लक्षणोत्पन्नानुत्पन्नाभा° I. लक्षणो= त्पत्त्यनुत्पत्त्यभा° T. लक्षणोत्पत्तिरनुत्पन्नभा° (唐) लक्षणोत्पत्त्यनुत्पत्तिभावा नित्यतया Tib. [3] सच्चासतोर्ह्य उ° A. सदसतोर्ह्यनु° C. °सतोः समु° (魏) (唐) Tib. [4] तः A. C. ताः I. T. [5] यस्मात् is added in A. C. K. T. [6] प्रति is added in all MSS., but T.

च प्रतिविशोध्य भूमेर्भूमिलक्षणातिक्रमगतिंगतास्तथाग[1]ताचिन्त्यगति[2]विषयगोचरं प्रतिलभ्य विश्वरूपमणिसदृशाः सर्वसत्त्वोपजीव्यतामधिगच्छेयुः सर्वधर्मविषयगतिकायोप[3]भोग्यतोपजीव्याः स्युः ॥

भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भगवांस्तस्यैतदवोचत् । त्रय इमे महामते स्रोतआपन्नानां स्रोतआपत्तिफलप्रभेदाः । कतमे त्रयो यदुत हीनमध्यविशिष्टास्तत्र महामते हीनः सप्तजन्मभवपरमः मध्यः पुनर्महामते त्रिपञ्चभवपरिनिर्वायी भवति उत्तमः पुनर्महामते तज्जन्मपरिनिर्वायी भवति । एषां तु महामते त्रयाणां त्रीणि संयोजनानि मृदुमध्याधि[4]मात्राण्येव भवन्ति । तत्र महामते कतमानि त्रीणि संयोजनानि यदुत सत्कायदृष्टिर्विचिकित्सा शीलव्रतपरामर्शश्च । एतानि महामते त्रीणि संयोजनानि विशेषोत्तरोत्तरेणार्हतामर्हत्फलीभवन्ति । तत्र महामते सत्कायदृष्टिर्द्विविधा यदुत सहजा च परिकल्पिता च[5] परतन्त्रपरिकल्पितस्वभाववत्[6] ।

[1] ण is added in T. [2] गति left out in T. [3] मो Tib. [4] पि A. K. नि I.
[5] सहपुरुषपरि° A. सहजरूपपरि° C. सहस्ररूपपरि° I. सहरूपपरि° K. सहज च परिकल्पिता च T. [6] Left out in K.

तद्यथा महामते परतन्त्रस्वभावाश्रयाद्विचित्रपरिकल्पित-
स्वभावाभिनिवेशः प्रवर्तते । स च तत्र न सन्नासन्न सद्=
सन्नभूतपरिकल्पलक्षण[1]त्वादथ च बालैर्विकल्प्य[2]ते [3]विचि=
त्रस्वभावलक्षणाभि[4]निवेशेन मृगतृष्णिकेव मृगैः । इयं
महामते स्रोतआपन्नस्य परिकल्पिता सत्कायदृष्टिरज्ञाना=
च्चिरकालाभिनिवेशसंचिता । सा च तस्य पुद्गलनैरात्म्य-
ग्रहाभवतः प्रहीणा । सहजा[5] पुनर्महामते स्रोतआपन्नस्य
सत्कायदृष्टिः स्वपरकायसमतया चतुःस्कन्ध[6]रूपलक्षणत्वाद्रू=
पस्योत्पत्तिभूतभौतिकत्वात्परस्परहेतुलक्षणत्वाद्भूतानां रू=
पस्यासमुदय इति कृत्वा स्रोतआपन्नस्य सदसत्पक्षदृष्टि-
दर्शनात्सत्कायदृष्टिः प्रहीणा भवति । अत एवं[7] सत्काय-
दृष्टिप्रहीणस्य रागो न प्रवर्तते । एतन्महामते सत्काय-
दृष्टिलक्षणम् ॥

विचिकित्सालक्षणं पुनर्महामते यदुत प्राप्ति[8]धर्माधिग=
मसुदृष्टिलक्ष[9]णत्वात्पूर्वं सत्कायदृष्टिद्वयविकल्पप्रहीणत्वाच्च
विचिकित्सा धर्मेषु न भवति । न चास्यान्या शास्तृदृष्टि=
र्भवति शुद्धाशुद्धितः । एतन्महामते विचिकित्सालक्षणं

[1] कल्पेनणलक्ष A. कल्पनलक्ष C. कल्पालक्षण I. कल्पणलक्ष K. कल्पलक्ष T.
[2] ल्प A. C. K. ल्प्य I. T. [3] अ is added in I. [4] नि left out in A.
[5] सहंनाजा A. K. [6] न्धा Chin. Tib. [7] व in all MSS., but T.
[8] म Chin. Tib. [9] ण left out in A. C. K. T.

स्रोतआपन्नस्य ॥

शीलं पुनर्महामते कथं न परामृशति स्रोतआपन्नः यदुत दुःखोपपत्त्यायतनलक्षणसंदृष्टत्वान्न परामृशति । परामृष्टिः पुनर्महामते यदुत शीलव्रततपोनियमैर्बा[1]लपृथग्जना भोगसुखाभिला[2]षिणो भवोत्प[3]त्तिं प्रार्थयन्ते न च परामृशन्ति । एवमन्यत्र स्वप्रत्यात्माधिगमविशेषगाभितायां परिणामयन्ति निर्विकल्पानास्र[4]वधर्मलक्षणाकारेण[5] प्रसज्यन्ते शीलाङ्गैः । एतन्महामते स्रोतआपन्नस्य शील-व्रतपरामर्शलक्षणं भवति । न तु महामते स्रोतआपन्नस्य त्रिसंयोजनप्रहीणस्य रागद्वेषमोहा प्रवर्तन्ते ॥

महामतिराह । रागः पुनर्भगवता बहुप्रकार उपदिष्टः । तत्कतमस्तस्यात्र रागः प्रहीणो भवति । भगवानाह । विषयकामेन्द्रियः[6] स्त्रीसंयोगरागः[7] प्रत्युत्पन्नसुख आयत्या दुःखजन्महेतुकः खटचपेटलिङ्गितचुम्बितपरिष्वक्ताघ्रातकटाक्षेक्षितैः[8] । तस्य महामते रागो न प्रवर्तते । तत्कस्य हेतोर्यदुत समाधिसुखविहारलाभित्वात् । अत एष प्रहीणो भवति न निर्वाणाधिगमरागः ॥

[1] तषाणियमेवा A. तयानियमैर्वा C. तपोनियमैर वा I. तपानियमेर्वा K. तपोनियमैर्बा T. [2] रा A. K. [3] त्प left out in A. K. [4] श्र A. C. I. K. स्र T. [5] राणि I. [6] कामराग leaving the visarga, is added in T. [7] ज is added in T. विषयकायेन्द्रियरागः स्त्रीसंयोगजः Tib. [8] खट (打) चपेट (摑) लिङ्गित (=आ° ? 抱擁) चुम्बित (嗚) परिष्विक्ता (抱) घ्रात (嗅) कटाक्ष (眄) ईक्षित (視)

सकृदागामिफल[1]लक्षणं पुनर्महामते कतमद्यदुत सकृ-द्रूपलक्षणाभा[2]सविकल्पः प्रवर्तते । निमित्तदृष्टिलक्ष्यलक्ष-णाभावात् ध्या[3]नगतिलक्षणसुदृष्टत्वात् सकृदेतं[4] लोकमा-गम्य दुःखस्यान्त[5]क्रियायै[6] परिनिर्वास्यति[7] तेनोच्यते सकृ-दागामीति । तत्रानागामीति[8] महामते कथं भवति यदु-तातीतानागतप्रत्युत्पन्नस्य रूपलक्षणभावाभावप्रवृत्तेर्दृष्टि[9]-दोषानुशयविकल्पस्यानागामित्वादनागामिरूपप्रहीणत्वा-च्च संयोजनानामनागामीत्युच्यते । अर्हन्पुनर्महामते ध्या-[10]नध्येयसमाधिविमोक्षबलाभिज्ञाक्लेशदुःखविकल्पाभावाद-र्हन्नित्युच्यते ॥

महामतिराह । त्रयः पुनर्भगवतार्हन्तो ऽभिहिताः । तत्कतमस्यायं भगवन्नर्हच्छब्दो निपात्यते[11] । किं भगवञ्छ-मैकायनमार्गप्रतिलम्भिकस्योत बोधिप्रणिधानाभ्यस्तकुश-लमूलसंमूढस्योत निर्मितनैर्माणिकस्य । भगवानाह । श-मैकायनमार्गप्रतिलम्भिकस्य महामते श्रावकस्य न त्वन्ये-षाम् । अन्ये पुनर्महामते बोधिसत्त्वचर्याचरिताविनः बुद्धनिर्मि[12]तनैर्माणिकाश्चोपायकुशलमू[13]लप्रणिधानपूर्वकत्वा-

[1] फल left out in T. [2] व is added in T. [3] °वादया A. C. K. °वादयो I. °वाध्या T. [4] °न्नमं A. °च्चेमं C. I. [5] कृ T. [6] °यायाः Tib. [7] °न्ति T. [8] Left out in I. [9] वत्तेतेदृ A. वृत्तेदृ C. वः प्रवर्तते । दृ I. K. वृत्तदृ T. [10] ना in all MSS., but I. [11] नियोज्यते Tib. [12] ता T. [13] मूल left out in T.

त्पर्षन्मण्डलेषूपपत्तिं दर्शयन्ति बुद्धपर्षन्मण्डलोपशोभना=
र्थम् । विकल्पगतिसंस्थानान्तरविचित्रोपदेशो ऽयं[1] महा-
मते यदुत फलाधिगम[2]ध्यानध्यातृध्येयविविक्तत्वात्स्वचित्त-
दृश्योपगमात्फलप्राप्तिलक्षणमुपदिश्यते । पुनरपरं महा-
मते यदि[3] स्रोतआपन्नस्यैतदभविष्यत् इमानि संयोजना=
न्यहमोभर्न संयुक्त इति तद्द्वित्वप्रसंगत्वा[4]त्मदृष्टिपतितः[5] स्या=
दप्रहीणसंयो[6]जनश्च ॥

पुनरपरं महामते ध्यानाप्रमाणारूप्यधातुसमतिक्रमाय[7]
स्वचित्तदृश्यलक्षणव्यावृत्तिः करणीया । संज्ञावेदितनि=
रोधसमापत्ति[8]श्च महामते स्वचित्तदृश्यगतिव्यतिक्रमस्तस्य[9]
न युज्यते चित्तमात्रत्वात् ॥ तत्रेदमुच्यते ॥

ध्यानानि चाप्रमाणानि आरूप्याश्च[10] समाधयः ।
संज्ञानिरोधो निखिलश्चित्तमात्रे[11] न वि[12]द्यते ॥१७६॥
स्रोतापत्तिफलं चैव सकृदागामिनस्तथा ।
अनागामिफलं चैव अर्हत्त्वं चित्तविभ्रमः ॥१७७॥
ध्याता[13] ध्यानं च ध्ये[14]यं च प्रहाणं सत्यदर्शनम् ।
कल्पनामात्र[15]मेवेदं यो बुध्यति स मुच्यते ॥१७८॥

[1] °पदेशमिदं in all MSS. [2] मा T. [3] त्ति I. [4] प्रसंग आत्म° Tib.
[5] श्च T. [6] णं या A. णसंयो C. I. णं यो K. T. [7] क्रया I. [8] त्ते ? Tib.
[9] स्या ? Tib. [10] श्च left out in T. [11] त्रं A. K. त्रेण T. [12] द्यं A.
[13] ना in all MSS. [14] धे A. K. [15] त्रा in all MSS., but I.

पुनरपरं महामते द्विप्रकारा बुद्धिः प्रविचयबुद्धिश्च[1] विकल्पलक्षणग्राहाभिनिवेशप्रतिष्ठापिका[2][3][4] च । तत्र महामते प्रविचयबुद्धिर्नाम यदुत यया[5] बुद्ध्या भावस्वभावलक्षणं[6] प्रविचीयमानं[7] चतुष्कोटिकारहितं नोपलभ्यते सा प्रविचयबुद्धिः । तत्र महामते चतुष्कोटिका यदुतैकत्वान्यत्वोभयनोभयास्तिनास्तिनित्यानित्यरहितां चतुष्कोटिकामिति[8] वदामि । एतया चतुष्कोटिकया महामते रहिताः सर्वधर्मा इत्युच्यते[9] । इयं महामते चतुष्कोटिका[10] सर्वधर्मपरीक्षायां[11] प्रयोक्तव्या । तत्र महामते विकल्पलक्षणग्राहाभिनिवेशप्रतिष्ठापिका[2][3] बुद्धिः कतमा यदुत येन[12] महामते चित्तविकल्पलक्षणग्राहाभिनिवेशेनोष्णद्रवचलकठिनानुभूतपरिकल्पलक्षणान्महाभूतान्प्रतिज्ञाहेतुलक्षण-[13] दृष्टान्ताभिनिवेशादसद्भूतसमारोपेण[14] समारोपयति सा विकल्पलक्षणग्राहाभिनिवेशप्रतिष्ठापिका[3] बुद्धिः । एतन्महामते बुद्धिद्वयस्य लक्षणं येन बुद्धिद्वयलक्षणेन समन्वागता[15] बोधिसत्त्वा[16] धर्मपुद्गलनैरात्म्यलक्षणगतिंगता[17]

[1] ये A. [2] ग्र T. [3] ष्टा K. [4] ता T. [5] मया T. [6] ण A. K.
[7] ची T. च in other MSS. [8] चा T. [9] च्य A. K. च्यं C. इत्युच्यते left out in I. T. [10] चा in all MSS. [11] धर्मा A. C. K. धर्म I. T. [12] इत्युच्यंते is added in I. [13] ल्प T. ल्पा in other MSS. कठिनानभू°ल्पना Chin. Tib.
[14] स left out in A. K. [15] तो A. K. [16] महासत्त्वा is added in T. [17] धर्मे I.

निराभासबुद्धिप्रविचय[1]चर्याभूमिकुशलाः प्रथमां[2] भूमिं[3] प्रतिलभन्ते समाधिशतं च समापद्यन्ते । बुद्धबोधिसत्त्वशतं च समाधिविशेषप्रतिलम्भेन पश्यन्ति कल्पशतं च पूर्वान्ताप[4]रान्ततो ऽनुप्रविशन्ति क्षेत्रशतं चावभासयन्ति क्षेत्रशतं चावभास्योत्तरोत्तरभूमिलक्षणविधिज्ञाः प्रणिधानवैशेषिकतया विक्रीडन्तो धर्ममेघाभिषेकाभिषिक्तास्तथागतप्रत्यात्मभूमिमधिगम्य दशनिष्ठापद[5]सुनिबद्धधर्मा[6]णाः सत्त्वपरिपाकाय विचित्रैर्निर्मा[7]णकिरणैर्विराजन्ते प्रत्यात्मगतिसुखसमाहिताः[8] ॥

पुनरपरं महामते बोधिसत्त्वेन महासत्त्वेन महाभूत[9]भौतिककुशलेन भवितव्यम् । कथं च महामते बोधिसत्त्वो महाभूतभौतिककुशलो भवति । तत्र महामते बोधिसत्त्वो महासत्त्व इतः प्रतिसंशिक्षते[10] तत्सत्यं यत्र महाभूतानामसंभवो ऽसंभूतानि चेमानि महामते भूतानीति प्रतिविपश्यति । एवं प्रतिविपश्यन्नाम विकल्पमात्रं स्वचित्तदृश्यमात्रावबोधाद्बाह्य[11]भावाभावान्नाम चित्त[12]दृश्यविकल्पमात्रमिदं यदुत त्रैधातुकं महाभूतभौतिकरहितं प्रतिविपश्यति

[1] च is added in T. [2] मा T. [3] मि T. [4] न्तोप A. K. न्ताप C. I. T. [5] दशनिष्ठापद 十無盡句 (宋) 十無量 (魏) 十無盡 (唐) But निष्ठा 究竟 अनिष्ठा 無盡? [6] र्म K. [7] र्वा I. [8] तान A. तान् C. K. ताम् I. ताः T. [9] भूति A. I. K. [10] संक्षिते T. [11] ह्या A. K. [12] स्वचित्त (宋) Tib.

चातुष्कोटिकनयविशुद्धि[1]मात्मात्मीयरहितं यथाभूतस्वलक्ष=
णावस्थानावस्थितमनुत्पादस्वलक्षणसिद्धम् । तत्र महा-
मते महाभूतेषु कथं भौतिकं[2] भवति यदुत स्नेहविकल्प-
महाभूतं महामते अब्धातुं[3] निष्पादयत्यध्यात्मबाह्यम् ।
[4]उत्साहविकल्पमहाभूतं महामते तेजोधातुं निष्पादयत्य=
ध्यात्मबाह्यम् । समुदीरणविकल्पमहाभूतं महामते वायु-
धातुं निष्पादयत्यध्यात्मबाह्यम् । रूपपरिच्छेदविकल्पमहा-
भूतं पुनर्महामते पृथिवीधातुं जनयत्याकाशसहितमध्या=
त्मबाह्यम् । मिथ्यासत्याभिनिवेशात्पञ्चस्कन्ध[5]कदम्बकं म=
हाभूतभौतिकं प्रवर्तते । विज्ञानं पुनर्महामते विचित्रप=
दविषयाभिनिवेशाभिला[6]षहेतुत्वाद्विज्ञानं प्रवर्तते ऽन्यग=
तिसंधौ । पृथिवीभूतभौतिकानां महामते कारणमस्ति
महाभूतानि न तु महाभू[7]तानाम् । तत्कस्य हेतोर्यदुत भा=
वलिङ्गलक्षणग्रह[8]णसंस्थान[9]क्रियायोगवतां महामते [9]क्रिया=
संयोगोत्पत्तिर्भवति नालिङ्गवताम् । तस्मादेतन्महामते
महाभूतभौति[10]कलक्षणं तीर्थ[11]करैर्विकल्प्यते न तु मया ॥

पुनरपरं महामते स्कन्धानां स्कन्धस्वभावलक्षणं निर्दे=
क्ष्यामः । तत्र महामते पञ्चस्कन्धाः कतमे यदुत रूपवे=

[1] द्ध C. T. [2] क T. [3] तु T. [4] उष्णत्व for उत्साह ? (魏) (唐) Tib.
[5] न्धा T. [6] प T. [7] भूतं for भूतानाम् in I. [8] णं T. [9] कृ T.
[10] का A. C. K. क I. T. [11] र्थं T.

दनासंज्ञासंस्कारविज्ञानानि । तत्र महामते चत्वारः स्क=
न्धा अरूपिणो वेदना संज्ञा संस्कारा विज्ञानं च । रूपं
महामते चातुर्महाभौतिकं भूतानि च परस्परविलक्षणा[1]=
नि । न[2] च महामते अरूपिणां चतुष्कसंख्या[3] भवत्या=
काशवत् । तद्यथा महामते आकाशं संख्यालक्षणातीं[4]=
तमथ च[2] विकल्प्यत एवमाकाशमिति एवमेव महामते
स्कन्धाः संख्यालक्षणगणनातीता भावाभावविवर्जिताश्चा[5]=
तुष्कोटिकरहिताः संख्यागणनानिर्देशेन निर्दिश्यन्ते बा=
लैर्न त्वार्यैः ॥

आर्यैः पुनर्महामते मायाविचित्ररूपाकृतिवदन्यानन्य-
वर्जिताः प्रज्ञाप्यन्ते स्वप्नबिम्बपुरुषवत् । आश्रयानन्यत्वा=
दार्यज्ञानगतिसंमोहान्महामते स्कन्धविकल्पः ख्यायते ।
एतन्महामते स्कन्धानां[6] स्कन्धस्वभावलक्षणम् । स च
विकल्पस्त्वया व्यावर्तनीयः व्यावृत्य विविक्तधर्मोपदेशः
करणीयः । सर्वबुद्धपर्षन्मण्डलेषु तीर्थ्य[7]दृष्टिनिवारणाय
विविक्तधर्मोपदेशेन महामते क्रिय[8]माणेन धर्मनैरात्म्यद=
र्शनं विशुध्यते दूरं[9]गमाभूमिप्रवेशश्च भवति । स दूरंगमां
महाभूमिमनुप्रविश्यानेकसमाधिवशवर्ती भवति । मनो-

[1] परस्य A. C. I. K. परस्पर T. [2] Left out in I. [3] संज्ञा C.
[4] ख्य A. C. K. ख्या I. T. [5] ताः चा A. C. K. ताः च I. T. [6] Left out in I.
[7] र्थ्य A. C. I. K. र्थ्य T. [8] कृ T. [9] र A. K.

मयकायप्रतिलम्भाच्च समाधिं मायोपमं प्रतिलभते । बलाभिज्ञावशितागतिंगतः[1] सर्वसत्त्वोपजीव्यो भवति पृ=थिवीवत् । यथा महामते महा[2]पृथिवी सर्वसत्त्वोपजीव्या भवति एवमेव महामते बोधिसत्त्वो महासत्त्वः सर्वस=त्त्वोपजीव्यो भवति ॥

पुनरपरं महामते चतुर्विधं निर्वाणम् । कतमच्चतुर्विधं यदुत भावस्वभावाभाव[3]निर्वाणं लक्षणविचित्रभावाभाव-निर्वाणं स्वलक्षणभावाभावावबोध[4]निर्वाणं स्कन्धानां स्व-सामान्यलक्षणसं[5]ततिप्रबन्धव्युच्छेदनिर्वाणम् । एतन्महा-मते चतुर्विधं तीर्थकराणां निर्वाणं न तु मत्प्रवचने । मत्प्रवचने पुनर्महामते विकल्पकस्य मनोविज्ञानस्य व्या=वृत्तिर्नि[6]र्वाणमित्युच्यते ॥

महामतिराह । ननु भगवताष्टौ विज्ञानानि व्यवस्था=पितानि । भगवानाह । व्यवस्थापितानि महामते । म=हामतिराह[7] । तद्यदि भगवन्व्यवस्थापितानि तत्कथं म=नोविज्ञानस्यैव व्यावृत्तिर्भवति न तु सप्तानां विज्ञाना=नाम् । भगवानाह । तद्धेत्वालम्बनत्वान्महामते सप्तानां विज्ञानानां प्रवृत्तिर्भवति । मनोविज्ञानं पुनर्महामते विषयपरिच्छेदाभिनिवेशेन प्रवर्तमानं वासनाभि[8]रालय-

[1] ताः A. [2] महा in T. only. [3] अभाव left out in I. T. [4] धो A. C. K. ध I. T. [5] स T. [6] नि T. [7] Left out in T. [8] श्चा in all MSS., but T.

विज्ञानं प्रपुष्णाति । मनः सहितमात्मात्मीयग्राहाभिनिवेशमन्यनाकारेणानुप्रवर्तते[1] । अभिन्नशरीरलक्षणमालयविज्ञानहेत्वालम्बनं[2] स्वचित्तदृश्यविषयाभिनिवेशाच्चित्तकलापः प्रवर्तते ऽन्योन्यहेतुकः । उदधितरङ्ग इव महामते स्वचित्तदृश्यविषयपवनेरिताः प्रवर्तन्ते निवर्तन्ते च । अतस्तेन महामते मनोविज्ञानेन व्यावृत्तेन सप्तानां विज्ञानानां व्यावृत्तिर्भवति ॥ तत्रेदमुच्यते ॥

नाहं निर्वामि भावेन क्रियया[3] लक्षणेन च ।
विकल्पहेतु[4]विज्ञाने निर्वृते निर्वृतो ह्यहम् ॥१७९॥
तद्धेतुकं तदालम्ब्य[5] मनोगतिसमाश्रयम् ।
हेतुं[6] ददाति चित्तस्य विज्ञानं च समाश्रितम् ॥१८०॥
यथा क्षीणे महाओघे[7] तरङ्गाणामसंभवः ।
तथा विज्ञान[8]वैचित्र्यं निरुद्धं न[9] प्रवर्तते ॥१८१॥

पुनरपरं महामते परिकल्पितस्वभावप्रभेदनयलक्षणमुपदेक्ष्यामो येन परिकल्पितस्वभावप्रभेदनयलक्षणेन सुप्रतिविभागविद्धेन त्वं चान्ये च बोधिसत्त्वा महासत्त्वा विकल्पकल्प[10]रहिताः प्रत्यात्मार्यस्वगतितीर्थ्य[11]नयगतिसुदृष्ट-

[1] तुमन्यना is added in all MSS., but T. [2] °ज्ञानं हेत्वालम्ब्नन° in all MSS., but T. [3] कृ T. [4] के T. [5] लंब्य I. [6] तु T. [7] महाओघ A. K. T. महाओघे C. महौघे हि I. [8] न left out in A. K. [9] त्यन्निरुद्धन्न A. च्यं निरुद्धन्न C. K. T. च्यनिरुद्धं न I. [10] कल्प left out in A. K. ल्प for ल्प in T. [11] र्थे A.

बुद्ध्या ग्राह्यग्राहक[1]विकल्पप्रहीणाः परतन्त्रविविधविचित्र-
लक्षणं परिकल्पितस्वभावाकारं न प्रति[2]विकल्पयिष्यन्ति।
तत्र महामते कतमत्परिकल्पितस्वभावप्रभेदनयलक्षणं
यदुताभिलापविकल्पो ऽभिधेयविकल्पो लक्षणविकल्पो
ऽर्थविकल्पः स्वभावविकल्पो हेतुविकल्पो दृष्टिविकल्पो
युक्तिविकल्प उत्पादविकल्पो ऽनुत्पादविकल्पः संबन्ध-
विकल्पो बन्धाबन्ध[3]विकल्पः। एतन्महामते परिकल्पित-
स्वभावप्रभेदनयलक्षणम् ॥

तत्र महामते अभिलापविकल्पः कतम[4]द्यदुत विचित्र-
स्वरगीतमाधुर्याभिनिवेशः एष महामते अभिलापविक-
ल्पः। तत्र महामते अभिधेयविकल्पः कतम[5]द्यदुतास्ति
[6]तत्किंचिदभिधेयवस्तु स्वभावकमार्य[7]ज्ञान[8]गतिगम्यं यदा-
श्रित्या[9]भिलापः प्रवर्तत इति विकल्पयति[10]। तत्र लक्षण-
विकल्पः कतम[5]द्यदुत तस्मिन्नेवाभिधेये मृगतृष्णाख्ये लक्ष-
णवैचित्र्याभिनिवेशेनाभिनिवेशते[11] यदुतोष्णद्रवचलकठि-
नलक्षणात्सर्वभावान्विकल्पयति। तत्रार्थविकल्पः कतम-
[5]द्यदुत सुवर्णरूप्यविविधरत्नार्थविषयाभिलापः[12]। तत्र
स्वभावविकल्पः कतम[5]द्यदुत भावस्वभावावधारणमिदमे-

[1] क left out in A. K. [2] वि left out in A. K. [3] बन्धो A. K. [4] म य A. K. मद्य C. मः य I. मो य T. [5] मः य I. T. [6] यु Tib. [7] गति is added in T. [8] नं T. [9] सृत्यो A. K. [10] ल्पते I. [11] विसेत T. [12] लाषस् I.

वमिदं[1] नान्यथेति तीर्थ्य[2]विकल्पदृष्ट्या विकल्पयन्ति । तत्र हेतुविकल्पः कतमद्यदुत[3] यद्येन हेतुप्रत्ययेन सदसतोर्विभज्यते[4] हेतुलक्षणोत्पत्तितः स हेतुविकल्पः । तत्र दृष्टिविकल्पः कतमद्यदुत[3] नास्त्यस्तित्वैकत्वान्यत्वोभयानुभयकुदृष्टितीर्थ्यविकल्पाभिनि[5]वेशः । तत्र युक्तिविकल्पः कतम[3]द्यदुतात्मात्मीयलक्षणयुक्तिविग्रहोप[6]देशः । तत्रोत्पादविकल्पः कतमद्यदुत[3] प्रत्ययैः सदसतोर्भावस्योत्पादाभिनिवेशः । तत्रानुत्पादविकल्पः कतमद्यदुतानुत्पन्नपूर्वाः[3] सर्वभावा अभूत्वा प्रत्ययैर्भवन्त्यहेतुशरीराः । तत्र संबन्धविकल्पः कतमद्यदुत[3] सह संबन्ध्यते सुवर्णतन्तुवत् । तत्र बन्धाबन्धविकल्पः कतमद्यदुत[3] बन्धहेतुबन्ध्याभिनिवेशवत् । यथा पुरुषः पाशसंयोगाद्रज्जुग्रन्थिः[7] क्रियते मुच्यते च । एवं महामते परिकल्पितस्वभावप्रभेदनयलक्षणं यस्मिन्परिकल्पितस्वभावप्रभेदनयलक्षणे सर्व[8]बालपृथग्जना अभिनिविशन्ते । सदसतः परतन्त्राभिनिवेशाभिनिविष्टा महामते परिकल्पितस्वभाववैचित्र्यमभिनिविशन्ते मायाश्रयवैचित्र्य[9]दर्शनवदन्यमायादर्शनबुद्ध्या बालैर्विकल्प्यन्ते[10] ।

[1] इमेवमि left out in T. [2] र्थ A. I. K. र्थ्य C. कु for तीर्थ्य in T.
[3] मः य I. T. [4] त A. C. K. T. ते I. where सज्यते is added. विकल्पनं (宋) (唐) विभावनं (魏) Tib. [5] नि in I. only. [6] गृह्यो in all MSS., but T.
[7] ज्जग्रन्थ कृ T. [8] सर्व left out in A. K. [9] त्र्यं T. [10] ल्पां A. ल्प C. ल्पं I. ल्प्यं K. T.

माया च महामते वैचित्र्यान्नान्या नानन्या । यद्यन्या स्याद्वैचित्र्यं मायाहेतुकं न स्यात् । अथानन्या स्याद्वैचित्र्यान्मायावैचित्र्ययोर्विभागो[1] न स्यात्स च दृष्टो विभागस्तस्मान्नान्या नानन्या । अत एतस्मात्कारणान्महामते त्वयान्यैश्च बोधिसत्त्वैर्महासत्त्वैर्माया[2] नास्त्यस्तित्वेन नाभिनिवेष्टव्या ॥ तत्रेदमुच्यते ॥

चित्तं विषयसंबन्धं[3] ज्ञानं तर्के प्रवर्तते ।
निराभासे विशेषे च प्रज्ञा वै संप्रवर्तते ॥१८२॥
परि[4]कल्पितस्वभावो ऽस्ति परतन्त्रे[5] न विद्यते ।
कल्पितं गृह्यते भ्रान्त्या पर[6]तन्त्र्यं[7] न कल्प्य[8]ते ॥१८३॥
[9]विविधाङ्गा[10]भिनिर्वृत्त्या[11] यथा माया न सिध्यति ।
निमित्तं हि[12] तथा चित्रं[13] कल्प[14]मानं न सिध्य[15]ति ॥१८४॥
निमित्तं[16] दौष्ठुल्यनयं[17] बन्धनं चित्तसंभवम् ।
परि[4]कल्पितं ह्यजानानं[18] परतन्त्रैर्वि[19]कल्प्यते ॥१८५॥
यदे[20]तत्कल्पितं भावं[21] परतन्त्रं तदेव हि ।

[1] विभागा in T. only. [2] न is added in I. [3] बंध A. K. बद्धं C. T. बंधं I. [4] वि for परि Chin. Tib. [5] मंत्रो I. त्रा T. न्त्रो Tib. [6] पार ? [7] तंप्र A. तंत्र्यं C. T. तंत्रे I. तंच्य K. [8] ल्प A. [9] The following two verses are left out in A. K. [10] ङ्गो ऽभि Tib. [11] त्या C. I. त्ता T. त्तो Tib. [12] Left out in I. [13] त्रं C. त्रं I. T. [14] ल्प्य T. [15] ध्य C. I. ध्य T. [16] त्त T. [17] नयं C. नय I. मयं T. [18] नैः T. नां Chin. Tib. [19] तंत्रे वि I. तंत्र्यं वि T. [20] यस्यैत Chin. Tib. [21] भवं I. भावः Chin. Tib.

कल्पितं हि विचित्राभं परतन्त्रे[1] विकल्प्यते[2] ॥१८६॥
संवृतिः[3] परमार्थश्च तृतीयं नास्तिहेतुकम्[4] ।
कल्पितं संवृतिर्ह्युक्ता[5] तच्छेदादार्यगोचरम्[6] ॥१८७॥
यथा हि योगिनां वस्तु चित्रमेकं विराजते ।
न ह्यस्ति[7] चित्रता तत्र तथा कल्पितलक्षणम् ॥१८८॥
यथा हि तैमिरैश्चित्रं[8] कल्प्यते रूपदर्शनम् ।
तिमिरं न रूपं नारूपं[9] परतन्त्रं[10] तथाबुधैः[11] ॥१८९॥
हैमं स्यात्तु यथा शुद्धं जलं कलुषवर्जितम्[12] ।
गगनं हि घनाभावात्तथा शुद्धं विकल्पितम् ॥१९०॥
नास्ति वै कल्पितो[13] भावः परतन्त्रश्च विद्यते ।
समारोपापवादं हि विकल्पन्तो[14] विनश्यति ॥१९१॥
कल्पितं यद्यभावं[15] स्यात्परतन्त्रस्वभावतः ।
विना भावेन वै भावो[16] भावश्चाभावसंभवः ॥१९२॥
परिकल्पितं[17] समाश्रित्य[18] परतन्त्रोपलभ्यते ।
निमित्तनामसंबन्धाज्जायते[19] परिकल्पितम्[20] ॥१९३॥
अत्यन्तं चाप्यनिष्पन्नं कल्पितं न परोद्भवम् ।

[1] तंत्रे A. तंत्रे C. K. T. तंत्रो I. [2] ल्प A. K. [3] ति A. I. K. तिः C. T. [4] तुदम् I. [5] क्तं I. [6] रः T. [7] ह्यत्रस्ति A. K. [8] तं is added in A. K. [9] तिमिरं नारूपारूपं ? [10] न्त्र A. K. [11] य in all MSS., but T. [12] तरूप A. K. जलकरक I. [13] ल्प्य K. [14] ल्पा A. C. I. [15] वः A. C. I. [16] भावो left out in A. K. [17] त T. [18] सृ A. K. [19] त्तन्ना A. C. त्तात्ता I. [20] तः I.

तदा प्रज्ञायते शुद्धं स्वभावं पारमार्थिकम् ॥१९४॥
परिकल्पितं दशविधं[1] परतन्त्रं च षड्विधम् ।
प्रत्यात्मतथताज्ञेयमतो नास्ति विशेषणम्[2] ॥१९५॥
पञ्चधर्मा भवेत्तत्त्वं स्वभावा हि त्रयस्तथा ।
एतद्विभावयेद्योगी[3] तथतां नातिवर्तते ॥१९६॥
निमित्तं परतन्त्रं हि यन्नाम[4] तत्प्रकल्पितम् ।
परिकल्पितं[5]निमित्तं[6] तु पारतन्त्र्यात्[7]प्रवर्तते ॥१९७॥
बुद्ध्या[8] विवे[9]च्यमानं तु न तन्त्रं[10] नापि कल्पितम्[11] ।
[12]निष्पन्नो नास्ति वै भावः कथं बुद्ध्या[13] विकल्प्यते ॥१९८॥
निष्पन्नो विद्यते भावो भावाभावविवर्जितः[14] ।
भावाभावविनिर्मुक्तो[15] द्वौ स्वभावौ कथं नु तौ ॥१९९॥
परिकल्पितस्वभावे द्वौ[16] स्वभावौ द्वौ प्रतिष्ठितौ ।
कल्पितं दृश्यते चित्रं विशुद्धं चार्य[17]गोचरम् ॥२००॥
कल्पितं हि विचित्राभं परतन्त्रै[18]र्विकल्प्यते ।
अन्यथा कल्प[19]मानं हि तीर्थ्यवादं समाश्रयेत् ॥२०१॥
कल्पना कल्पितेत्युक्तं दर्शनाद्धेतुसंभवम् ।

[1] कल्पितं द्वादशविधं (leaving परि) ? [2] षतः I. [3] यम्यो T. [4] नामयत्र T. [5] तं A. C. K. T. त I. [6] Left out in T. [7] न्त्वा in all MSS. [8] ध्या T. [9] वि C. [10] त्रे I. [11] ते A. K. [12] From नि° till परिकल्पित (in v. 200) left out in A. K. [13] ध्या T. [14] तम् I. [15] क्तं I. क्तौ ? [16] स्वभावे द्वौ left out in I. वै ? [17] वार्य A. C. I. K. चार्य T. [18] तंत्रेर्वि A. तंत्रैर्वि C. K. तंत्रें वि I. T. [19] ल्प्य T.

विकल्पद्वयनिर्मुक्तं निष्पन्नं[1] स्यात्तदेव हि ॥२०२॥

पुनरपि महामतिराह । देशयतु मे भगवान्[2]प्रत्यात्मार्यज्ञानगतिलक्षणमेकयानं च येन भगवन्प्रत्यात्मैकया[3]नगतिलक्षणेनाहं चान्ये च बोधिसत्त्वा महासत्त्वाः प्रत्यात्मार्यज्ञानैकयानकुशला अपरप्रणे[4]या भविष्यन्ति बुद्धधर्मेषु ॥

भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगव[5]न्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भगवांस्तस्यैतदवोचत् । प्रमाणाप्तोपदे[6]शविकल्पाभावान्महामते बोधिसत्त्वो महासत्त्व एकाकी रहोगतः स्वप्रत्यात्मबुद्ध्या[7] विचारयत्यपरप्रणेयो दृष्टिविकल्पविवर्जित उत्तरोत्तरतथागतभूमिप्रवेशनतया व्यायमते[8] । एतन्महामते [9]स्वप्रत्यात्मार्यज्ञानगतिलक्षणम् । तत्रैकयानगतिलक्षणं[10] कतमद्यदुतैकयानमार्गाधिगमावबोधादेकयानमिति वदामि । एकयानमार्गाधिगमावबोधः कतमो यदुत ग्राह्यग्राहकविकल्पयथाभूतावस्थानादप्रवृत्ते[11]र्विकल्प[12]स्यैकयानावबोधः[13] कृतो भवति । एष एकयानावबोधो[14] महामते

[1] ष्पंनं A. C. K. T. ष्पणं I. [2] वा A. K. व C. I. T. [3] ज्ञा T. [4] णि A. K. णे C. I. ने T. [5] वा A. I. K. व C. T. [6] शं T. [7] ध्या A. K. T. [8] Left out in C. [9] स्व left out in T. [10] Left out in I. [11] वृत्तैः वि A. वृत्तेर्वि C. वृत्तैः वि I. वृत्तेर्वि K. वृत्तः वि T. [12] ल्पा A. ल्प्य C. K. ल्प I. T. [13] धे T. [14] धौ I. T.

नान्यतीर्थ्यश्रावकप्रत्येकबुद्धब्रह्मादिभिः प्राप्तपूर्वो ऽन्यत्र मया । अत एतस्मात्कारणान्महामते एकयानमित्युच्यते ॥

महामतिराह । किं कारणं भगवता यान[1]त्रयमुपदिष्टमेकयानं [2]नोपदिश्यते । भगवानाह । स्वयमप[3]रिनिर्वाणधर्मत्वान्महामते सर्वश्रावकप्रत्येकबुद्धाना[4]मेकयानं [5]न वदामि यस्मान्महामते सर्वश्रावकप्रत्येकबुद्धा[6]स्तथागतवि[7]नयविवेकयोगोपदेशेन विमुच्यन्ते न स्वयम् ॥

पुनरपरं महामते ज्ञेयावरणकर्मवासनाप्रहीणत्वात्सर्वश्रावकप्रत्येकबुद्धानां नैकयानं[8] [9]धर्मनैरात्म्यानवबो[10]धाच्चाचिन्त्यपरिणामच्युते[11]रप्राप्तित्वाच्च यानत्रयं[12] देशयामि श्रावकाणाम् । यदा तेषां महामते सर्वदोषवासनाः प्रहीणा भवन्ति धर्मनैरात्म्यावबोधात्तदा ते[13] वासनादोषसमाधिम[14]दाभावाद[15]नास्र[16]वधातौ प्रतिविबुध्यन्ते । पुनरपि लोकोत्तरानास्र[17]वधातुपर्यापन्नान्संभारा[18]न्परिपूर्याचिन्त्यधर्मकायवशवर्तितं[19] प्रतिलप्स्यन्ते ॥ तत्रेदमुच्यते ॥

देवयानं ब्रह्मयानं श्रावकीयं तथैव च ।

[1] यान्यान A. यान C. T. यानानां I. यान्यान K. [2] यानमु C. [3] सपि A. K. मपरि C. I. T. [4] ज्ञान् ए I. [5] Left out in I. [6] ज्ञान् I. [7] ष C. I. [8] न A. K. नं C. I. T. [9] From धर्म° till भवंति left out in K. [10] रो A. त्म्यावबो I. [11] णाम उच्यते न प्रा in all MSS., but T. [12] य T. [13] धात् दान्ते I. [14] महा A. C. I. मदा K. सहा T. [15] ना A. न C. I. K. द T. [16] श्र in all MSS. [17] नाश्रव A. C. I. K. णास्रव T. [18] न्नात् संभावात् I. [19] ता T.

ताथागतं च[1] प्रत्येकं यानानेतान्[2]वदाम्यहम् ॥२०३॥
यानानां नास्ति[3] वै निष्ठा यावच्चित्तं प्रवर्तते।
चित्ते तु वै परावृत्ते न यानं न च यानिनः[4] ॥२०४॥
यानव्यवस्थानं[5] नैवास्ति यानभेदं[6] वदाम्यहम्।
परि[7]कर्षणार्थं बालानां यानभेदं वदाम्यहम् ॥२०५॥
विमुक्तयः[8]स्तथा तिस्रो[9] धर्मनैरात्म्यमेव च।
समताज्ञानक्लेशाख्या विमुक्त्या ते विवर्जिताः ॥२०६॥
यथा हि काष्ठमुदधौ तरङ्गैर्विप्रवाह्यते।
तथा हि श्रावको मूढो[10] लक्षणेन प्रवाह्यते ॥२०७॥
वासनाक्लेशसंबद्धाः पर्युत्थानैर्विसंयुताः[11]।
समाधिमदम[12]त्तास्ते धातौ तिष्ठन्त्यनास्र[13]वे ॥२०८॥
निष्ठागतिर्न तस्यास्ति[14] न च भूयो निवर्तते।
समाधिकायं संप्राप्य[15] आ कल्पान्[16] प्रबुध्यते ॥२०९॥
यथा हि म[17]त्तपुरुषो मद्याभावाद्विबुध्यते।
तथा ते बुद्धधर्माख्यं कायं प्राप्स्यन्ति मामकम् ॥२१०॥
इति[18] लङ्कावतारे[19] षट्त्रिंशत्साहस्रे सर्व[20]धर्मसमुच्चयो नाम द्वितीयः परिवर्तः ॥२॥

[1] In C. only. [2] यानान्येता I. यान्यन्येता T. [3] नास्ति A. K. [4] नि A. पि C. I. K. T. [5] स्था (without नं) ? [6] यानमेकं Chin. Tib. [7] प्र for परि ? [8] ये A. K. [9] स्त्रिमा A. [10] गू T. [11] ता I. [12] मत्ता A. K. [13] श्र in all MSS. [14] नभसोऽस्ति I. [15] प्त T. [16] त्तं A. न्तं C. I. [17] त्तः T. [18] In C. only. [19] र A. [20] लङ्कावताराद्षट्त्रिंशत्साहस्रात्सर्व Tib.

अथ खलु भगवान्पुनरपि महामतिं बोधिसत्त्वं म=
हासत्त्वमेतदवोचत् । मनोमयकायगतिप्रभेदनय[1]लक्षणं
महामते उपदेक्ष्यामि । तच्छृणु साधु च सुष्ठु च मन=
सिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामति=
र्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भगवांस्त=
स्यैतदवोचत् । त्रिप्रकारो महामते कायो मनोमयः ।
कतमस्त्रिप्रकारो यदुत समाधिसु[2]खसमापत्तिमनोमयो
धर्म[3]स्वभावावबोधमनोमयो निकायसहज[4]संस्कार[5]क्रियाम=
नोमयश्च प्रथमोत्तरोत्तरभूमिलक्षणपरिज्ञानादधिगच्छन्ति
योगिनः । तत्र कतमो महामते समाधिसु[2]खसमापत्ति-
मनोमयः कायो यदुत त्रिचतुर्थ[6]पञ्चम्यां[7] भूमौ स्वचित्त-
विविधविवेकविहारेण चित्तोदधिप्रवृत्तितरङ्गविज्ञानल=
क्षणसुखसमापत्तिमनसो ऽ[8]प्रवृत्तिः स्वचित्तदृश्यविषया[9]=
भावाभा[10]वपरिज्ञानान्मनसो[11] मनोमयः काय[12] इत्युच्यते ।

[1] नय left out in Tib. [2] मु T. [3] सर्व T. [4] जा Chin. [5] कृ T. [6] तृचतुर्थ A. K. त्रिचतुर्थ C. त्रिचतुर्थः I. त्रिचतुः T. [7] म्यां I. त्यां K. [8] सो प्र A. C. K. T. सः प्र I. [9] य Tib. [10] वाभा left out in A. [11] मनसो left out in Tib. [12] कायो is put in before मनोमयः in C.

तत्र [1]धर्मस्वभावावबोधमनोमयः कायः[2] कतमो यदुताष्टम्यां[3] भूमौ मायादिधर्मनिराभासप्रविचयावबोधेन चित्ताश्रयपरा[4]वृत्तस्य मायोपमसमाधिप्रतिलम्भादन्येषां च समाधिमु[5]खानां प्रतिलम्भादनेकलक्षणवशिताभिज्ञा[6]कुसुमितं मनोजवसदृशं मायास्वप्नबिम्बप्रख्यम[7]भौतिकं भूतभौतिकसदृशं[8] सर्वरूपविचित्राङ्गसमुदितं[9] सर्वबुद्धक्षेत्रपर्षन्मण्डलानुगतं कायं[10] धर्मस्वभावगतिंगतत्वान्मनोमय इत्युच्यते। तत्र निकायसहज[11]संस्कारक्रि[12]यामनो[13]मयः कायः[14] कतमो यदुत सर्वबु[15]द्धधर्मप्रत्यात्माधिगमसुखलक्षणावबोधान्निकायसहज[11]संस्कारक्रि[12]यामनोमय[16] इत्युच्यते। अत्र ते महामते कायत्रयलक्षणप्रविचयावबोधे योगः करणीयः॥ तत्रेदमुच्यते॥

न मे यानं महायानं न घोषो न च अक्षराः।
न सत्या न विमोक्षा वै न निराभासगोचरम्॥१॥
किंतु यानं महायानं समाधिवशवर्तिता[17]।
कायो मनोमयश्चित्रो[18] वशितापुष्प[19]मण्डितः॥२॥

[1] सर्व is added in T. [2] कायः left out in T. [3] भ्यां I. [4] परा left out in A. I. K. [5] सु I. [6] ज्ञ A. C. K. ज्ञा I. T. [7] म् भौ I. [8] सदृशं left out in A. C. I. K. [9] सम्मिदतं A. K. [10] Left out in T. कायस्वभा° I. [11] जा Chin. [12] कृ T. [13] मनो left out in T. [14] Left out in T. [15] बुद्ध in T. only. [16] मयः काय Chin. Tib. [17] ताम् I. [18] त्रो A. C. I. K. चो T. [19] पुण्य I.

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत् । पञ्चानन्तर्याणि भगवता निर्दिष्टानि । कतमानि तानि[1] भगवन्पञ्चानन्तर्याणि यान्यध्यापद्य कुलपुत्रो वा कुलदुहिता वावीचिको भवति । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भगवाने[2]तदवोचत् । तत्र महामते पञ्चानन्तर्याणि कतमानि यदुत मातृ[3]पित्र[4]र्हद्[5]वधसं[6]घभेदाः तथागतकाये दुष्टचित्तरुधिरोत्पादश्च ॥

तत्र महामते माता कतमा सत्त्वानां यदुत तृष्णा पौनर्भविकी नन्दीरागसहगता मातृत्वेनोत्ति[7]ष्ठते । अविद्या पितृत्वेनायतनग्रामस्योत्पत्तये[8] । अनयोरुभयोर्मातापित्रोरत्यन्तमूलोपच्छेदान्मातृपितृवधो भवति । तत्रानुशयानामरि[9]प्रख्याणां मूषिकाविषवत्प्रकोपधर्मिणामत्यन्तसमु[10]द्घा[11]तादर्हद्वधो भवति । तत्र संघभेदः कतमो यदुत भिन्नान्यो[12]न्यलक्षणस्य स्कन्धसंघातस्यात्यन्तमूलोपघातात्संघभेद इत्युच्यते । स्वसामान्यबाह्यस्वचित्तदृश्यमात्रावबोधकानां

[1] Left out in T. [2] नस्मै T. [3] ता I. [4] तु A. K. [5] त्व A. K.
[6] धर्मसं A. K. [7] पति I. त्ति (宋) (魏) Tib. [8] त्य T. [9] यात् परि I.
[10] न्ता T. [11] द्धा I. [12] न्यो left out in I.

महामते अष्टानां विज्ञानकायानां विमोक्षत्रया[1]नास्रवदु=
ष्टविकल्पेनात्यन्तोपघाताद्विज्ञानबुद्धस्य दुष्टचित्तरुधिरो=
त्पादनादानन्तर्यकारीत्युच्यते । एतानि महामते अ[2]ध्या=
त्मिकानि पञ्चानन्तर्याणि यान्यध्यापद्य कुलपुत्रो वा
कुलदुहिता वानन्तर्यकारी भवत्यभिसमितधर्मः ॥

पुनरपरं महामते बाह्यानि ते[3] आनन्तर्याण्युपदेक्ष्या=
मि यैरुपदिष्टैः त्वं चान्ये च बोधिसत्त्वा अनागतेऽध्वनि
संमोहं न गमिष्यन्ति । तत्र कतमानि तानि[4] यदुत
यानि देशनापाठेऽनुसंव[5]र्णितान्यानन्तर्याणि यान्यध्यापद्य
तिसृणां विमुक्तीनामन्यतरान्यतरस्यां [6]नाभिसमेता भव=
न्ति[7] अन्यत्र निर्मिताधिष्ठानाभिसमयात् । निर्मिताधि=
ष्ठानश्रावको हि महामते बोधिसत्त्वाधिष्ठानेन वा त=
थागताधिष्ठानेन[8] वा[8] यस्य कस्यचिदन्यस्यानन्तर्यकारि=
णः कौकृत्यं[9] तस्य कौकृत्यदृष्टिविनिवर्तनार्थं निक्षिप्तधुर=
स्य[10] कौकृत्यदृ[11]ष्ट्यभावार्थम् । पुनरपि प्रोत्साहनां करि=
ष्यत इति कृत्वा निर्मिताधिष्ठानाभिसमयः प्रदर्श्यते मया ।
नास्त्येकान्ते[12]न महामते आनन्तर्यकारिणो ऽभिसमयः

[1] नाश्र A. C. I. K. णास्र T. [2] आ ? [3] त ? [4] Left out in T.
[5] र्णि T. [6] तरस्यात्रा A. C. K. तराणि अन्यतरस्य अन्ता I. तरस्यां ना T.
[7] ति I. [8] Left out in I. [9] त्य T. [10] धूरस्य A. C. K. धुरः स्यात् I.
धुरस्य T. [11] ष्ट्या A. [12] ते A. K.

अन्यच्च स्वचित्तदृश्यभावना[1]मात्रतावबोधाद्देहभोगप्रतिष्ठागतिविकल्पात्मात्मीयग्राह[2]विविक्तदर्शनात्कदाचित्कर्हिचित्कल्याणमित्रमासा[3]द्यान्यगतिसंधौ स्वविकल्पदोषैर्विमुच्यते ॥ तत्रेदमुच्यते ॥

तृष्णा हि माता इत्युक्ता अविद्या च पिता तथा ।
विषयावबोधा[4]द्विज्ञानं[5] बुद्ध इत्युपदिश्यते ॥३॥
अर्हन्तो ह्यनुशयाः पञ्च[6] संघाः स्कन्धकदम्बकः ।[7]
निरन्तरान्तर[8]च्छेदात्कर्मस्यानन्तरं भवेत् ॥४॥

पुनरपि महामतिराह । देशयतु मे भगवान्बुद्धानां भगवतां[9] कथं भगवान्बुद्धानां बुद्धता भवति । भगवानाह । धर्मपुद्गलनैरात्म्यावबोधान्महामते आवरणद्वयपरिज्ञानावबोधाच्च च्युतिद्वयाधिगमात्क्लेशद्वयप्रहाणाच्च महामते बुद्धानां भगवतां बुद्धता भवति । एतेषामेव महामते धर्माणामधिगमाच्छ्रावकप्रत्येकबुद्धसंबु[10]द्धता भवति । अत[11] एतस्मान्महामते एकयानं देशयामि ॥ तत्रेदमुच्यते ॥

नैरात्म्यस्य द्वयं क्लेशास्तथैवावरणद्वयम्[12] ।
अचिन्त्यपरिणामिन्याश्च्युतेर्लाभा[13]त्तथागतः ॥५॥

[1] भावना left out in Tib. [2] हे A. [3] सा left out in T. [4] बोद्धि A. बोद्वि K. [5] विषयबोधविज्ञानं ? [6] : पंच left out in T. [7] अर्हन्तो ऽनुशयाः संघः पञ्चस्कन्धकदम्बकम् ? [8] रानन्तर A. C. K. रानंततछे I. [9] बुद्धतां T. (乘) Tib. [10] संबुद्ध in T. only, बुद्धानां बु Tib. [11] अथ T. [12] यः T. [13] न्याः च्यूतेर्लाभात्त A. K. न्याश्च्यूतेर्लाभात्त C. न्याः च्युतेर्लाभात I. त्याः च्युत्या लाभात्त T.

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत् । किं संधाय भगवता पर्षन्मध्यगतेन वाग्भाषिता । अहमेव सर्वबुद्धा ये ऽतीता जातकोपपत्तिवैचित्र्यं च[1] अहमेव च[2] तेन कालेन तेन समयेन राजा मान्धाता[3] गजः शुक इन्द्रो व्यासः सुनेत्र इत्येवमाद्यानि भगवता जातकशतसहस्रा[4]ण्युपदिष्टानि । भगवानाह । चतुर्विधां समतां संधाय महामते तथागता अर्हन्तः सम्यक्संबुद्धाः पर्षन्मध्यगता वाचं निश्चारयन्ति यदुताहमेव तेन कालेन तेन समयेन क्रकुच्छन्दः[5] कनकमुनिः काश्यपश्चाभवम् । [6]कतमां चतु[7]र्विधसमतां संधाय यदुताक्षरसमतां वाक्समतां धर्मसमतां[8] कायसमतां च । इमां महा[9]मते चतुर्विधां समतां संधाय तथागता अर्हन्तः सम्यक्संबुद्धाः पर्षन्मध्यगता[10] वाचं निश्चारयन्ति । तत्र महामते कतराक्षरसमता यदुत यैरक्षरैर्मम नाम बुद्ध इति तै[11]रेवाक्षरैस्तेषां बुद्धानां भगवतां तान्यक्षराणि[12] महामते निर्विशिष्टान्यक्षरा[13]ण्यक्षरस्वभावत्वेन इयं महामते अक्षरसमता । तत्र महामते कतमा वाक्समता तथागतानाम=

[1] च्यश्च A. C. K. Tib. च्यं च I. T. [2] ते is added in I. अहमद्वचनेन तेन T. [3] 漫陀轉輪王(宋) 頂生王(魏)(唐) [4] स्र left out in A. K. [5] कुसंन्दः T. [6] वङ्क A. C. K. वम् । क I. वं क T. [7] धां T. [8] Left out in T. [9] महा is repeated in I. [10] गती A. K. [11] र for रेवा in T. [12] तानि अस्थिराणि I. [13] न्यक्षराणि left out in T. क्षराण्य left out in Tib.

र्हतां सम्यक्संबुद्धानां यदुत म[1]मापि चतुष्षष्ट्याकारो ब्रह्मस्वररुतघोषवाग्विकल्पः प्रवर्तते तेषामपि महामते तथागतानामर्हतां सम्यक्संबुद्धानामेवमेव चतुष्षष्ट्याकारो ब्रह्मस्वररुतघोषो वाग्विकल्पः प्रवर्तते ऽनूनानधिका निर्विशिष्टाः कलविङ्कब्रह्म[2]स्वररुतघोषस्वभावेन । तत्र कतमा कायसमता यदुताहं च ते च[3] तथागता [4]अर्हन्तः सम्यक्संबुद्धा धर्मकायेन च रूपलक्षणानुव्यञ्जनकायेन च समा निर्वि[5]शिष्टा अन्यत्र वैनेयवशमुपादाय तत्र तत्र सत्त्वगतिविशेषेण[6] तथागता रूपवैचित्र्यमादर्शयन्ति । तत्र धर्मसमता महामते कतमा यदुत ते चाहं च सप्तत्रिंशतां बोधिपक्ष्या[7]णां धर्माणामधिगन्तारः । इमां महामते चतुर्विधां समतां संधाय तथागता अर्हन्तः सम्यक्संबुद्धाः पर्षन्मध्यगता वाचं निश्चारयन्ति ॥ तत्रेदमुच्यते ॥

काश्यपः क्र[8]कुच्छ[9]न्दश्च कोना[10]कमुनिरप्यहम् ॥
भाषामि जिनपुत्राणां समतायां समुद्गतः[11] ॥६॥

पुनरपि महामतिराह । यदिदमुक्तं भगवता यां च रात्रिं तथागतो ऽभिसंबुद्धो यां च रात्रिं परिनिर्वास्यति

[1] स T. [2] रुत for ब्रह्म in I. [3] ते च left out in T. [4] From अर्हन्तः till षेण तथागता left out in I. [5] धिवि A. K. निवि C. निर्वि T. [6] गन्धगतिविशेषणा T. [7] क्षा A. पा T. [8] क A. K. [9] च्छ A. सै T. [10] कोनानक A. कोनाक C. K. T. कानक I. cf. p. 29, l. 1. [11] समंततः T. समंगतः Tib.

अत्रान्तर एकमप्यक्षरं तथागतेन नोदाहृतं न प्रव्याहरि=
ष्यति अवचनं बुद्धवचनमिति तत्किमिदं संधायोक्तं त=
थागतेनार्हता सम्यक्संबुद्धेनावचनं बुद्धवचनमिति । भ=
गवानाह । धर्मद्वयं महामते संधाय मयैतदुक्तं कतम=
द्धर्मद्वयं यदुत प्रत्यात्मधर्मतां च संधाय पौराणस्थितिध=
र्मतां च । इदं महामते धर्मद्वयं संधाये[1]दमुक्तं मया । तत्र
स्वप्रत्यात्मधर्मतानुसंधिः कतमत्तै[2]स्तथागतैरधिगतं त[3]न्मया=
प्यधिगतमनूनमन[4]धिकं स्वप्रत्यात्मगतिगोचरं वाग्विकल्प-
रहितमक्षरगतिद्वयविनिर्मुक्तम् । तत्र पौराणस्थिति[5]धर्मता
कतमा यदुत पौराणमिदं महामते धर्मताव[6]न्मे हिरण्य[7]-
रजतमुक्ता[8]करवन्महामते धर्मधातुस्थितितोत्पादाद्वा तथा=
गतानामनुत्पादाद्वा तथागतानां स्थितैवैषां[9] धर्माणां[10] ध=
र्मता धर्मस्थितिता धर्मनियामता पौराणनगरपथवन्महा-
मते । तद्यथा[11] महामते[11] कश्चिदेव पुरुषो ऽटव्यां पर्यटन्पौरा[12]=
णं नगरमनुपश्येदवि[13]कलपथप्रवेशं स तं नगरमनुप्रविशे=
त्तत्र प्रविश्य [14]प्रतिनिविश्य नगरं नगरक्रि[15]यासुखमनुभवे=

[1] संधाय यद् इदम् I. [2] मयैत्तै A. मद्यत्तै C. मत् तै I. मय्यत्तै K. मः यत्तै T. कतमा यदुत यत्तैस्त Tib. [3] तं A. C. K. T. तद् I. [4] ना for नमन in I. [5] ता is added in T. [6] धर्माधर्म T. धर्मतावर्त्म Tib. [7] ण्या T. [8] क्ता T. [9] षा I. [10] Left out in T. [11] Left out in I. [12] पय्यटन्पौ A. पर्यटनपौ C. पर्य्यटन् पौ I. पर्यटन्पौ K. T. [13] श्यन् वि I. [14] प्रतिविश्य is added in I. [15] कृ T.

त् । तत्किं मन्यसे महामते अपि नु तेन पुरुषेण स प=न्था उत्पादितो येन पथा तं नगरमनुप्रविष्टो नगरवै=चित्र्यं च[1] । आह । नो भगवन् । भगवानाह[2] । एवमेव महामते यन्मया तैश्च[3] तथागतैरधिगतं स्थितैवैषा धर्मता धर्म[4]स्थितिता[5] धर्मनियामता तथता भूतता सत्यता । अत एतस्मात्कारणान्महामते मयेदमुक्तं यां च रात्रिं तथा=गतो ऽभिसंबुद्धो यां च रात्रिं परिनिर्वास्यति अत्रान्तर एकमप्यक्षरं तथागतेन नोदाहृतं नोदाहरिष्यति[6] ॥ तत्रे=दमुच्यते ॥

यस्यां च रात्र्यां[7] धिगमो यस्यां च परिनिर्वृतः ।
एतस्मिन्नन्तरे नास्ति मया किंचित्प्रकाशितम् ॥७॥
प्रत्यात्मधर्म[8]स्थितितां संधाय कथितं मया ।
तैश्च बुद्धैर्मया चैव न च किंचिद्विशेषितम् ॥८॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमध्येषते स्म । देशयतु मे भगवा[9]न्नास्त्यस्तित्वल=क्षणं सर्वधर्माणां यथाहं[10] चान्ये च बोधिसत्त्वा महासत्त्वा[11] नास्त्यस्तित्व[12]वर्जिताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबु=

[1] वा for च in I. [2] Left out in A. [3] धर्मयाभि for यन्मया तै in T. [4] धर्म left out in I. [5] धर्मतास्थितिता I. which ends with this word in p. 144. [6] ष्यामि A. C. K. ष्यति T. [7] त्र्या A. K. त्र्य C. त्र्यां T. cf. धिष्ठित=अधिष्ठित [8] ता is added in A. K. [9] व in all MSS. [10] यथा चाहं A. C. K. यथाहं T. [11] Left out in T. [12] त्व in T. only.

ध्येरन् । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भगवानेतदवोचत् । द्वयनिश्रि[1]तो ऽयं महामते लोको यदुतास्तित्वनिश्रि[2]तश्च नास्तित्वनिश्रि[2]तश्च भावाभावच्छन्द-दृष्टिपतितश्चानिःशरणे[3] निःशरणबुद्धिः । तत्र महामते क[4]थमस्तित्वनिश्रितो लोको यदुत विद्यमानैर्हेतुप्रत्ययैर्लोक उत्पद्यते नाविद्यमानैर्विद्यमानं चोत्पद्यमानमुत्पद्यते नाविद्यमानम् । स चैवं ब्रुवन्[5]महामते भावानामस्तित्वहेतुप्रत्यया[6]नां लोकस्य च हेत्वस्तिवादी भवति । तत्र महामते कथं नास्तित्वनिश्रितो भवति यदुत रागद्वेषमोहाभ्युपगमं[7] कृत्वा पुनरपि रागद्वेषमोहभावाभावं[8] विकल्पयति यश्च महामते भावानामस्तित्वं नाभ्युपै[9]ति भावलक्षणविविक्तत्वाद्यश्च बुद्ध[10]श्रावकप्रत्येकबुद्धानां रागद्वेषमोहान्नाभ्युपैति[11] भावलक्षणविनिर्मुक्तत्वाद्विद्यन्ते[12] नेति ॥

कतमो ऽत्र महामते वैनाशि[13]को भवति । महामतिराह । य एष भगवन्नभ्युपगम्य रागद्वेषमोहान्[14] पुनरभ्युपैति[15] ।

[1] सृ A. K. स्सृ C. सि T. [2] सृ T. [3] अनिःसृतस्य T. [4] कथा A. C. K. कप T. [5] भगवन् A. [6] यि C. T. [7] व्युपसमं A. व्युपगमं C. K. भ्युपगमं T. [8] मोहाभावं T. [9] प A. पे C. K. T. [10] बुद्ध in T. only. [11] हन्नाभ्युपेति A. K. हं ना° C. हान्ना° T. [12] भाव°त्वात् left out in T. [13] सि A. T. [14] न T. [15] पेति A. C. K. T.

भगवानाह । साधु साधु महामते साधु खलु पुनस्त्वं म=
हामते य[1]स्त्वमेवं प्रभाषितः[2] केवलं महामते न[3] रागद्वेष-
मोहभावाभावाद्वैनाशिको भवति बुद्ध[4]श्रावकप्रत्येकबुद्धवै=
नाशिको ऽपि भवति । तत्कस्य हेतोर्यदुताध्यात्मबहिर्धा=
नुपलब्धित्वादन्यानन्यत्वाच्च क्लेशानां न हि महामते रा=
गद्वेषमोहा अध्यात्मबहिर्धोपलभ्यन्ते ऽशरीरत्वादनभ्युप=
गमत्वाच्च महामते रागद्वेषमोहा[5]भावानां बुद्धश्रावकप्रत्येक[6]-
बुद्धवैनाशिको भवति प्रकृतिविमुक्तास्ते बुद्धश्रावकप्रत्येक-
बुद्धा बन्ध्यबन्धहेत्वभावाद्बन्ध्ये सति महामते बन्धो[7] भवति
बन्धहेतुश्च । एवमपि ब्रुवन्महामते वैनाशिको भवति । इदं
महामते नास्त्यस्तित्वस्य लक्षणम् । इदं च[3] महामते सं=
धायोक्तं मया वरं खलु सुमेरुमात्रा पुद्गलदृष्टिर्न त्वेव
नास्त्यस्तित्वाभिमानिकस्य शून्यतादृष्टिः । नास्त्यस्तित्वाभि=
मानिको हि महामते वैनाशिको भवति । स्वसामान्य-
लक्षणदृष्टिपतिताशयः स्वचित्तदृश्यमात्राभावान्न प्रतिजा=
नन्नप्रति[8]ज्ञानाद्बाह्यभावा[9]न्नित्यदर्शनात्क्षणपरंपराभेदभिन्ना=
नि स्कन्धधात्वायतनानि संततिप्रबन्धेन [10]विनिर्वृत्य वि=

[1] यस् left out in T. [2] त A. C. K. न T. यत्त्वमेवं प्रभासितः Chin. Tib. [3] Left out in T. [4] बुद्ध in T. only. [5] हभा T. (朱) Tib. [6] प्रत्येक left out in T. [7] बंध्यो K. [8] नं न प्रतिज्ञा left out in T. [9] नि Chin. Tib. [10] प्र for विनि in T.

निवर्तन्त[1] इति कल्पाक्षररहितानि प्रतिविकल्पयन्पुनरपि वैनाशिको भवति ॥ तत्रेदमुच्यते ॥

अस्तिनास्तीत्युभावन्तौ यावच्चित्तस्य गोचरः ।
गोचरेण निरुद्धेन सम्यक्चित्तं निरुध्यते ॥९॥
विषये ग्रहणाभावान्निरोधो[2] न च नास्ति च ।
विद्यते तथतावस्तु आर्याणां गोचरो यथा ॥१०॥
अभूत्वा यस्य उत्पादो भूत्वा वापि विनश्यति ।
प्रत्ययैः सदसच्चापि न ते मे शासने स्थिताः ॥११॥
न तीर्थिकैर्न[3][4] बुद्धैश्च न मया न च केनचित् ।
प्रत्ययैः साध्यते ऽस्तित्वं कथं नास्ति भविष्यति[5] ॥१२॥
केन प्रसाधितास्तित्वं[6] प्रत्ययैर्यस्य नास्तिता ।
उत्पादवाद[7]दुर्दृष्ट्या नास्त्यस्तीति विकल्प्यते[8] ॥१३॥
यस्य नोत्पद्यते[9] किंचिन्न च किंचिन्निरुध्यते[10] ।
तस्यास्तिनास्ति नोपैति[11] विविक्तं पश्यतो जगत् ॥१४॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमध्येषते । देशयतु मे भगवान्देशयतु मे सुगतो देशयतु मे[12] तथागतो ऽर्हन्सम्यक्संबुद्धो वदतां वरिष्ठः[13] सि=

[1] वृत्तन्न A. K. वर्त्तन्त C. वर्त्तन्ते T. [2] ये गहना A. K. ये गहणा C. य ग्रहणो T. [3] र्थि T. [4] न is added in T. while च in other MSS. [5] भ A. K. T. भँ C. [6] धित्वां A. K. तास्तिता ? [7] वादु ? [8] क left out in T. [9] ते left out in T. [10] किंचनि T. [11] न तस्यास्तित्वनास्तित्वे without नोपैति in T. [12] देशयतु मे सुगतो देशयतु मे left out in C. [13] तां चरिष्ट A. तां चरिंस्त C. तां चरिष्ठ K. ता ́वरिष्ठ T. ष्ठां ?

द्धान्तनयलक्षणं येन सिद्धान्तनयलक्षणेन सुप्रतिविभा=
गविद्धेनाहं चान्ये च बोधिसत्त्वा महासत्त्वाः सिद्धान्त-
नयलक्षणगतिंगताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसं=
भोत्स्यन्ते ऽपरप्रणेयाश्च भविष्यन्ति सर्वतार्किकतीर्थकरा=
णाम् । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु
च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति म=
हामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भ=
गवांस्तस्यै[1]तदवोचत् । द्विविधं महामते सिद्धान्तनयलक्ष=
णं सर्वश्रावकप्रत्येकबुद्धबोधिसत्त्वानां यदुत सिद्धान्तनयश्च
देशनानयश्च । तत्र सिद्धान्तनयो महामते यदुत प्रत्या=
त्माधिगमविशेषलक्षणं वाग्विकल्पाक्षररहितमनास्र[2]वधा=
तुगतिप्रापकं प्रत्यात्मगतिभूमिग[3]तिस्वलक्षणं सर्वतर्कती=
र्थ्यमारवर्जितं विनिहत्य च तांस्ती[4]र्थ्यमारान्प्रत्यात्मगतिर्वि[5]=
राजते । एतन्महामते सिद्धान्तनयलक्षणम् । तत्र देश=
नानयः कतमो यदुत नवाङ्गशासनविचित्रोपदेशो ऽन्या=
नन्यसदसत्पक्षवर्जित उपायकुशलविधिपूर्वकः सत्त्वेषु द=
र्शनावतारो यद्यद्ये[6]नाधिमुच्यते तत्तस्य[7] देशयेत् । एतन्म=
हामते देशनानयलक्षणम् । अत्र महामते त्वयान्यैश्च बो=

[1] वानेत A. C. K. वांस्तस्यैत T. Tib. [2] श्र in all MSS. [3] भूमिगति left out in A. [4] र्थ T. [5] वि T. [6] ते for द्ये in C. यद्येना Tib.
[7] तस्य for तत्तस्य in T.

धिसत्त्वैर्महासत्त्वैर्योगः करणीयः ॥ तत्रेदमुच्यते ॥

सिद्धान्तश्च नयश्चापि प्रत्यात्मशासनं च वै[1] ।
ये पश्यन्ति विभागज्ञा न ते तर्कवशं गताः ॥१५॥
न भावो विद्यते सत्यं[2] यथा बालैर्विक[3]ल्प्यते ।
अभावेन तु वै मोक्षं कथं नेच्छन्ति तार्किकाः ॥१६॥
उत्पाद[4]भङ्गसंबद्धं संस्कृतं प्रतिपश्यतः ।
दृष्टिद्वयं प्रपु[5]ष्णन्ति न [6]पश्यन्ति विपर्ययात् ॥१७॥
एकमेव भवेत्सत्यं निर्वाणं मन[7]वर्जितम् ।
कदलीस्कन्ध[8]मायाभं लोकं पश्येद्विकल्पितम् ॥१८॥
रागो न विद्यते द्वेषो मोहश्चापि न पुद्गलः ।
तृष्णाया [9]ह्युदिताः स्कन्धा विद्यन्ते स्वप्नस[10]दृशाः ॥१९॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमध्येषते स्म । देशयतु मे भगवान्देशयतु मे सुगतो ऽभूतपरिकल्पस्य लक्षणं कथं किं केन [11]कस्य भगवन्नभूतपरिकल्पः प्रवर्तमानः प्रवर्तते ऽभूतपरिकल्पो ऽभूतपरिकल्प इति भगवन्नुच्यते । कतम[12]स्यैतद्भगवन्धर्मस्याधिवचनं यदुताभूतपरिकल्प इति किं वा प्रतिविकल्पयन्नभूतपरि=

[1] वै left out in A. K. [2] सत्ये ? Tib. [3] ल्पा A. [4] दं T. [5] पू A. पू C. [6] प left out in A. K. [7] मनष A. K. मलव C. [8] This compound is rendered into 芭蕉莖 elsewhere. [9] ह A. K. ह्य C. ह्य T. [10] मभा A. C. भमाया K. मस T. सा ? [11] त C. [12] म left out in A. K.

कल्पो भवति । भगवानाह । साधु साधु महामते साधु खलु पुनस्त्वं महामते यस्त्वमेतमर्थम[1]ध्येषितव्यं[2] मन्यसे बहुजनहिताय त्वं महामते प्रतिपन्नो बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । अर्थ[3]विविधवैचि[4]त्र्याभूतपरिकल्पाभिनिवेशान्महामते विकल्पः प्रवर्तमानः प्रवर्तते । नृणां ग्राह्यग्राहकाभिनिवेशा[5]भिनि[6]विष्टानां च महामते स्वचित्तदृश्यमात्रानवधारितम[7]तीनां च सदसद्दृष्टिपक्षपतितानां च महामते तीर्थकरदृष्टिप्रतिविकल्पवासनाप्रतिपुष्टानां बाह्यविचित्रार्थोपलम्भाभिनिवेशाच्चित्तचैत्तकलापो विकल्पसंशब्दितः प्रवर्तमानः प्रवर्तत आत्मात्मीयाभिनिवेशात् । महामतिराह[8] । तद्यदि भगवन्नर्थविविधवैचित्र्याभूतपरिकल्पाभिनिवेशा[9]न्नृणां विकल्पः प्रवर्तमानः प्रवर्तते सदसद्दृष्टिपक्षपतितानां ग्राह्यग्राहकतीर्थकरदृष्टिप्र=

[1] म left out in A. K. [2] र्थमध्येषयित T. [3] य T. [4] त्य K. [5] निवेशाभि left out in T. [6] वे A. K. [7] ता is added in T. [8] त्महामते आह A. K. न्महामते ॥ आह C. त्महामतिराह T. [9] न्नृ C. नृ T.

तिविकल्पपुष्टानां बाह्यविचित्रार्थोपलम्भाभि[1]निवेशाच्चि=
त्तचैत्तकलापो विकल्पसंश[2]ब्दितः स्वचित्तदृश्यमात्रान=
वबोधात्स[3]न्तासन्तविचित्रभावाभिनिवेशात्प्रवर्तमानः प्रव=
र्तते । तद्यथैव[4] भगवन्बाह्यार्थविचित्रलक्षणः सदसत्पक्ष-
पतितलक्षणो भावाभावविविक्तो दृष्टिलक्षणविनिवृत्त=
स्तथैव भगवन्परमार्थप्रमाणेन्द्रियावयव[5]दृष्टान्तहेतुलक्षण-
विनिवृत्तः । तत्कथं भगवन्नेकत्र विचित्रविकल्पो ऽभूता=
र्थविचित्रभावाभिनिवेशं प्रतिविकल्पयन्प्रवर्तते । न पुनः
परमार्थलक्षणाभिनिवेशं[6] प्रतिविकल्पयन्प्रवर्तते विकल्पः ।
ननु भगव[7]न्विषयमहेतुवादस्तव प्रसज्यत एकत्र प्रवर्तत
एकत्र नेति ब्रुवतः सदसत्प[8]क्षाश्रयाभिनिवेशश्चाभूतप्रति=
विकल्पदृष्टिप्रवृत्तिं[9] ब्रुवतो विविधमायाङ्गपुरुषवैचित्र्या=
[10]न्निष्पन्नैकरूपवत्प्रतिविकल्पयन्विकल्पेन लक्षणवैचित्र्य-
भावाभावं च विकल्पस्य विनिवृत्तेर्लोकायतिकदृष्ट्याश्र=
यपतितश्च । भगवानाह । न हि महामते विकल्पः प्र=
वर्तते निवर्तते[11] वा । तत्कस्य हेतोर्यदुत सदसतो विकल्प=
स्याप्रवृत्तित्वाद्बाह्यदृश्यभावाभावात्स्वचित्तदृश्यमात्रावबो=

[1] दि T. [2] ब्द A. K. [3] धादसन्तासन्त A. C. K. धात्सदसद्वि T. धात्सन्तासन्तवि Tib. [4] येदं C. [5] यावचय for यावयव in A. K. [6] श T. [7] वद्वि A. K. व वि C. वन्वि T. वन्विषमहेतु ([illegible]) Tib. [8] क्ष A. C. K. क्षा T. पक्षाभि° Tib. [9] त्ति A. C. K. त्तिं T. [10] च्यानिष्टानै A. च्यां निष्टानै C. K. च्यान्निष्पन्नै T. Tib. [11] In T. only.

धान्महामते विकल्पो न प्रवर्तते न[1] निवर्तते । अन्यच्च महामते बालानां स्वचित्तवैचित्र्यविकल्पकल्पितत्वात्प्रक्रि[2]=यप्रवृत्तिपूर्वको विकल्पो[3] वैचित्र्यभावलक्षणाभिनिवेशा=त्प्रवर्तत इति वदामि । कथं खलु महामते[4] बालपृथग्जनाः स्वविकल्पचित्तमात्रावबोधादात्मा[5]त्मीयाभिवि[6]निवृत्तदृष्टयः कार्यकार[7]णप्र[8]त्ययविनिवृत्तदोषाः स्वचित्तमात्रावबोधात्प=रावृत्तचित्ताश्रयाः सर्वासु[9] भूमिषु कृतविद्यास्तथागतस्वप्र=त्यात्मगतिगोचरं पञ्चधर्मस्वभाववस्तुदृष्टिविकल्पविनिवृत्तिं प्रतिल[10]भेरन् । अत एतस्मात्कारणान्महामत इदमुच्यते मया विकल्पोऽभूतार्थवैचित्र्यादभि[11]निवेशात्प्रवर्तते स्ववि=कल्पवैचित्र्यार्थयथाभूतार्थपरिज्ञाना[12]द्विमुच्यत इति ॥ तत्रे=दमुच्यते ॥

कारणैः प्रत्ययैश्चापि येषां लोकः प्रवर्तते ।
चातुष्कोटिकया युक्ता[13] न ते मन्नयकोविदाः ॥२०॥
असन्न[14] जायते लोको न[15] सन्न सदसन्क्वचित् ।
प्रत्ययैः कारणैश्चापि यथा बालैर्विकल्प्यते ॥२१॥
न सन्नासन्न सदसद्यदा[16] लोकं प्रपश्यति ।

[1] In T. only. [2] क्रु T. [3] ल्प्यो C. K. ल्पा T. [4] Left out in T. [5] त्मा in C. only. [6] वि in T. only. भिनिवेशविनिवृ° Tib. [7] रे A. K. [8] वृ is added in T. [9] सर्वा A. K. सर्वासु C. सर्वे T. [10] लं A. K. [11] च्याभि Chin. Tib. [12] ना left out in T. [13] युक्तय A. K. युक्ता C. क्ताः T. [14] सदसच्च A. C. असच्च K. Tib. [15] ना A. C. K. न T. Tib. [16] नासन्न सच्च सदसन्यथा Tib.

तदा व्यावर्तते चित्तं नैरात्म्यं चाधिगच्छति ॥२२॥
अनुत्पन्नाः सर्वभावा यस्मा[1]त्प्रत्ययसंभवाः ।
कार्यं हि प्रत्ययाः सर्वे न कार्याज्जायते भवः ॥२३॥
कार्यान्न जायते कार्यं[2] द्वित्वं कार्ये[3] प्रसज्यते[4] ।
न च द्वित्व[5]प्रसंगेन कार्याद्भावोपलभ्यते ॥२४॥
आलम्बालम्ब्यविगतं यदा पश्यति संस्कृतम् ।
निश्चितं चित्तमात्रं हि चित्तमात्रं वदाम्यहम् ॥२५॥
मात्रा स्वभावसंस्थानं प्रत्ययैर्भाव[6]वर्जितम् ।
निष्ठाभावः परं ब्रह्म एतां[7] मात्रां वदाम्यहम् ॥२६॥
प्रज्ञप्तिसत्यतो ह्यात्मा द्रव्यं[8]सन्न हि विद्यते ।
स्कन्धानां स्कन्धता तद्वत्प्रज्ञप्त्या न तु द्रव्यतः ॥२७॥
चतुर्विधा वै समता लक्षणं हेतुभावजम् ।
नैरात्म्यसमता चैव चतुर्थं[9] योग[10]योगिनाम् ॥२८॥
व्यावृत्तिः सर्वदृष्टी[11]नां कल्प्य[12]कल्पनवर्जिता ।
अनुपलम्भो ह्यजातिश्च[13] चित्तमात्रां वदाम्यहम् ॥२९॥
न भावं नापि चाभावं भावाभा[14]वविवर्जितम् ।
तथता[15] चित्तवि[16]निर्मुक्तं चित्तमात्रं वदाम्यहम् ॥३०॥

[1] स्या A. C. K. स्मा T. [2] र्यं A. [3] र्यं A. C. K. र्ये T. [4] प्रयुक्तते T.
[5] त्वम्प्र T. [6] प्रत्ययभाव Tib. [7] एता T. [8] व्यं A. C. व्य K. T.
[9] र्थे A. K. र्थं C. T. र्था ? [10] योग left out in A. योगियोगि° C. K. योगयो° T.
[11] ष्टि A. K. [12] ल्प A. C. K. ल्प्य T. [13] °पलम्भ्यजातिश्च (宋) (唐) Tib.
[14] वाभा left out in A. [15] तयता left out in A. तया (魏) (唐) Tib. [16] वि left out in C.

तथताशून्यताकोटि निर्वाणं[1] धर्मधातुकम्[2] ।
कायं मनोमयं चित्रं[3] चित्तमात्रं[4] वदाम्यहम् ॥३१॥
विकल्पवासनाबद्धं विचित्रं चित्तसंभवम् ।
बहिराख्यायते नृणां[5] चित्तमात्रं हि लौकिकम्[6] ॥३२॥
दृश्यं न विद्यते[7] बाह्यं चित्तं चित्रं[8] हि दृश्यते ।
देहभोगप्रतिष्ठानं चित्तमात्रं[9] वदाम्यहम् ॥३३॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । यत्पुनरेतदुक्तं भगवता यथारुतार्थग्रहणं न कर्तव्यं बोधिसत्त्वेन महासत्त्वेनान्यैश्चेति । कथं च भगवन्बोधिसत्त्वो महासत्त्वो यथा[10]रुतार्थग्राही न भवति । किं च रुतं को ऽर्थः । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् । भगवांस्तस्यैतदवोचत् । तत्र रुतं महामते कतमद्यदुत वागक्षरसंयोगविकल्पो दन्तहनुतालुजिह्वौष्ठपुटविनिःसृत[11]परस्परजल्पो विकल्प[12]वासनाहेतुको रुतमित्युच्यते । तत्रार्थः[13] पुनर्महामते कतमो यदुत श्रुतचिन्ता=

[1] टिर्नि Tib. [2] तुवच्च A. K. तुकं C. तु च T. [3] त्तं A. C. K. त्रं T. [4] त्र A. C. K. T. [5] नृ C. T. [6] लो A. K. वदाम्यहम् ? [7] ते left out in A. K. [8] चित्रं left out in A. त्तं C. K. त्रं T. [9] त्र T. [10] यथा left out in T. [11] तः T. [12] ल्पः T. [13] न is added in T.

भावानामय्या प्र[1]ज्ञयैको रहोगतो निर्वाणपुरगामि[2]मार्गः
स्वबुद्ध्या वासनाश्रयपरावृत्तिपूर्वकः[3] स्वप्रत्यात्मगतिगोच=
रभूमिस्थाना[4]न्तरविशेषार्थलक्षणगतिं प्रविचारयन्बोधिस=
त्त्वो महासत्त्वोऽर्थकुशलो भवति ॥

पुनरपरं महामते रुतार्थकुशलो बोधिसत्त्वो महासत्त्वो
रुतमर्थादन्यन्नान्यदिति[5] समनुपश्यति अर्थं च रुतात् ।
यदि च पुनर्महामते अर्थो रुतादन्यः स्यादरुतार्थाभिव्य=
क्तिहेतुकः स्यात् स चार्थो रुतेनानुप्रविश्यते प्रदीपेनेव
धनम् । तद्यथा महामते कश्चिदेव पुरुषः प्रदीपं गृहीत्वा
धनमवलोक[6]येदिदं मे धनमेवंविधमस्मिन्प्रदेश इति एव=
मेव महामते वाग्विकल्परुतप्रदीपेन बोधिसत्त्वा महास=
त्त्वा वाग्विकल्परहिताः स्वप्रत्यात्मार्य[7]गतिमनुप्रविशन्ति ॥

पुनरपरं महामते अनिरुद्धा अनुत्पन्नाः प्रकृतिपरिनि=
र्वृतास्त्रियानमेकयानं च प[8]ञ्चचित्तस्वभावादिषु यथा[9]रुता=
र्थाभिनिवेशं प्रतीत्याभिनिवेशतः समारोपापवाददृष्टिपति=
तो भवति । अन्यथा व्यवस्थितानन्यथा प्रतिविकल्पय=
न्मायावैचित्र्यदर्शनविकल्पनवत् । तद्यथा महामते अन्य=

[1] प्र left out in A. K. [2] मा left out in A. K. [3] परा°कः left out in T.
[4] न is added in A. K. [5] न्यंनान्यमिति A. C. न्यंनानन्यमिति K. °दिति Chin. Tib. [6] के य A. C. के ये K. क य T. कये (魏) (唐) Tib. [7] म A. C. K. ग T.
[8] पञ्च left out in T. पञ्चधर्मचि (魏) (唐) Tib. [9] यथा left out in A. K.

था हि[1] मायावैचित्र्यं द्रष्टव्यमन्यथा प्रतिकल्प्यते[2] बालैर्न त्वार्यैः ॥ तत्रेदमुच्यते ॥

यथारुतं विकल्पित्वा समारोपेन्ति[3] धर्मताम्[4] ।
ते च वै तत्समारोपात्पतन्ति नरकालये ॥३४॥
न ह्यात्मा विद्यते स्कन्धैः[5] स्कन्धाश्चैव[6] हि नात्मनि ।
न ते यथा विकल्पन्ते[7] न च ते वै न[8] सन्ति च[9] ॥३५॥
अस्तित्वं सर्वभावानां यथा बालैर्विकल्प्यते ।
यदि ते भवेद्यथा दृष्ट्याः[10] सर्वे स्युस्तत्त्वदर्शिनः ॥३६॥
अभावात्[11]सर्वधर्माणां संक्लेशो नास्ति शुद्धिश्च[12] ।
न ते तथा यथा दृष्टा[13] न च ते[14] वै न सन्ति च ॥३७॥

पुनरपरं महामते ज्ञानविज्ञान[15]लक्षणं त उपदेक्ष्यामि येन ज्ञान[16]विज्ञानलक्षणेन सुप्रतिविभागविद्धेन त्वं चान्ये च बोधिसत्त्वा महासत्त्वा ज्ञानविज्ञानलक्षणगतिंगताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यन्ते[17] । तत्र महामते त्रिप्रकारं ज्ञानं लौकिकं[18] लोकोत्तरं च[19] लोकोत्तरतमं च ॥

[1] कि T. [2] ल्प A. C. K. ल्प्य T. [3] रोत्पर्त्ति A. रोत्पत्ति C. K. रोपेन्ति T.
[4] ता A. C. K. तां T. [5] स्कंधः T. [6] चैव A. C. K. श्चै T. [7] ल्प्य T.
[8] Left out in A. K. [9] संनिव च A. [10] ष्टः T. स्युर्यथा दृष्टाः ?
[11] व A. वाः C. वा K. वात्त T. Tib. [12] शुद्धि च T. शुद्धितः in other MSS. [13] ष्टा A. K. [14] Left out in A. K. [15] विज्ञान left out in A. K.
[16] ज्ञान left out in T. [17] भोत्स्येथ T. [18] लो A. K. [19] Left out in C. T.

तत्रोत्पन्नप्रध्वंसि विज्ञानम[1]नुत्पन्नप्रध्वंसि [2]ज्ञानम् । पुनरपरं महामते निमित्तानिमित्तपतितं विज्ञानं नास्त्यस्ति[3]वैचित्र्यलक्षणहेतुकं च निमित्तानिमित्तव्यतिक्रान्त[4]लक्षणं ज्ञानम् । पुनरपरं महामते उपचयलक्षणं[5] विज्ञानमपचय[6]लक्षणं[5] ज्ञानम् । तत्र त्रिविधं ज्ञानं[7] स्वसामान्यलक्षणावधारकं चोत्पादव्ययावधारकं चानुत्पादानिरोधावधारकं च ॥

तत्र लौकिकं[8] ज्ञानं सदसत्पक्षाभिनिविष्टानां सर्वतीर्थकरबालपृथग्जनानां च[9]। तत्र लोकोत्तरं ज्ञानं सर्वश्रावकप्रत्येकबुद्धानां च[9] स्वसामान्यलक्षणपतिताशयाभिनिविष्टानां। तत्र लोकोत्तरतमं[10] ज्ञानं बुद्धबोधिसत्त्वानां निराभासधर्मप्रविचयादनिरोधानुत्पाददर्शनात्सद[11]सत्पक्षविगतं तथागतभूमिनैरात्म्याधिगमात्प्रवर्तते ॥

पुनरपरं महामते असङ्गलक्षणं ज्ञानं विषयवैचित्र्यसङ्गलक्षणं च विज्ञानम् । पुनरपरं महामते त्रिसङ्[12]तिक्षयोत्पादयोगलक्षणं विज्ञानमसङ्गस्वभावलक्षणं ज्ञानम् । पुनरपरं महामते अप्राप्तिलक्षणं ज्ञानं स्वप्रत्यात्मार्यज्ञा=

[1] नं T. [2] वि is added in A. K. [3] पतितं is added in all MSS., but left out in Chin. [4] न्ति C. [5] णं T. [6] ज्ञानपंच A. ज्ञानमपचय C. K. ज्ञानं अपचय T. [7] विज्ञान C. ज्ञानं T. [8] क C. [9] Left out in T. [10] मं T. [11] र्शनात् सद left out in A. [12] ग is added in A. C. K.

नगतिगोचरमप्रवेशानिर्गमत्वादुदकचन्द्रवज्जले[1] ॥ तत्रेदमु=
च्यते ॥

चित्तेन चीयते कर्म ज्ञानेन च[2] विधीयते ।
प्रज्ञया च निराभासं प्रभावं चाधिगच्छति ॥३८॥
चित्तं विषयसंबद्धं[3] ज्ञानं तर्के[4] प्रवर्तते ।
निराभासे[5] विशेषे च प्रज्ञा वै संप्रवर्तते ॥३९॥
चित्तं मनश्च विज्ञानं संज्ञावैकल्पवर्जिताः[6] ।
[7]विकल्पधर्मतां प्राप्ता[8] श्रावका न जिनात्मजाः ॥४०॥
शान्ते क्षान्तिविशेषे वै ज्ञानं ताथागतं शुभम् ।
संजायते विशेषार्थे[9] समुदाचारवर्जितम् ॥४१॥
प्रज्ञा हि त्रिविधा[10] मह्यं आर्या येन प्रभाविता[11] ।
लक्षणं कल्प्यते[12] येन यश्च भावान्वृणोति[13] च ॥४२॥
यानद्वयविसंयुक्ता प्रज्ञा ह्यभाव[14]वर्जिता[15] ।
सद्भावाभिनिवेशेन श्रावकानां प्रवर्तते ।
चित्त[16]मात्रावतारेण प्रज्ञा ताथागती मता ॥४३॥

पुनरपरं महामते नवविधा[17] परिणामवादिनां तीर्थक=
राणां परिणामदृष्टिर्भ[18]वति यदुत संस्थानपरिणामो लक्ष=

[1] चंद्रकर्जले A. [2] Left out in A. K. [3] बु A. K. [4] र्कै A. K.
[5] षे T. [6] ता A. C. K. ताः T. तं ? [7] अ is added in all MSS., but follow (魏) Tib. [8] प्ताः ? [9] र्थै A. K. [10] धां A. K. [11] ताः ? [12] ल्पा A.
[13] वामवृशो A. वात्वृणो C. वाम् वृणो K. वान्वृणो T. [14] हि भा ?
[15] तः A. [16] च A. K. त्व C. T. [17] य is added in T. [18] भ A. K.

णपरिणामो हेतुपरिणामो युक्तिपरिणामो दृष्टिपरिणाम उत्पादपरिणामो भावपरिणामः प्रत्ययाभिव्यक्तिपरिणामः क्रियाभिव्यक्तिपरिणामः[1] । एता महामते नवपरिणामदृष्टयो याः[2] संधाय सर्वतीर्थकराः सदसत्पक्षोत्पादपरिणामवादिनो भवन्ति ॥

तत्र महामते संस्थानपरिणामो यदुत संस्थानस्यान्यथाभावदर्शनात्सुवर्णस्य भूषणविकृतिवैचित्र्यदर्शनवत् । तद्यथा महामते सुवर्ण[3]कटकरुचकस्वस्त्यादिपरिणामेन[4] परिणाम्यमानं विचित्रसंस्थानपरिणतं दृश्यते न[5] सुवर्णं भावतः परिणमति एवमेव महामते सर्वभावानां परिणामः कैश्चित्तीर्थ[6]करैर्विकल्प्यते ऽन्यैश्च कारणतो न च ते तथा न चान्यथा परिकल्पमुपादायैवं सर्वपरिणामभेदो द्रष्टव्यो द[7]धिक्षीरमद्यफलपाकवत् । तद्यथा महामते एवं दधिक्षीरमद्यफलादीनामेकैकस्य परिणामो विकल्पस्य[8] परिणामो[8] विकल्प्यते तीर्थकरैर्न चात्र[9] कश्चित्परिणमति[10] सदसतोः स्वचित्तदृश्यबाह्यभावाभावा[11]त् एवमेव महामते बालपृथग्जनानां स्वचित्तविकल्पभाव[12]नाप्रवृत्तिर्द्र[13]ष्टव्या

[1] क्रिया°मः left out in T. [2] या A. K. याः C. यां T. [3] र्णं T.
[4] म्ये A. C. K. मे T. [5] Left out in T. [6] र्थ्यं T. [7] धी A.
[8] In A. only. Left out in Tib. also. [9] रैर्वरात्र A. [10] णमयति T.
[11] भावा left out in all MSS., but T. (宋)(魏) Tib. [12] भावानां T. [13] द्र A. K.

नात्र महामते कश्चिद्धर्मः प्रवर्तते वा निवर्तते वा माया-
स्वप्नप्रवृत्त[1]रूपदर्शनवत् । तद्यथा महामते स्वप्ने प्रवृत्ति-
निवृत्ती[2] उपलभ्यते बन्ध्यापुत्र[3]मृतजन्मवत् । तत्रेदमुच्यते ॥

परिणामं कालसंस्थानं भूतभावेन्द्रियेषु च ।
अन्तरा[4]भवसंग्राह्यो[5] ये कल्पे[6]न्ति न ते बुधाः[7] ॥४४॥
न प्रतीत्यसमुत्पन्नं लोकं कल्पे[6]न्ति वै जिनाः ।
किंतु प्रत्यय एवेदं लोकं[8] गन्धर्वसंनिभम् ॥४५॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तं सर्वधर्मसंध्यर्थ[9]परिमोचनार्थमध्येषते स्म । देशयतु मे भगवान्देशयतु मे[10] तथागतो ऽर्हन्सम्यक्संबुद्धः सर्वधर्माणां संध्य[11]संधिलक्षणं येन संध्यसंधिलक्षणेन सुप्रतिविभागाभिविद्धे[12]नाहं चान्ये च बोधिसत्त्वा महासत्त्वाः सर्वसंध्यसंध्युपायकुशला यथारुतार्थाभिनिवेशसंधौ न प्रपतेयुः सर्वधर्माणां संध्यसंधिकौशलेन[13] वागक्षरप्रतिविकल्पनं च वि[14]निहत्य बुद्ध्या[15] सर्वबुद्धक्षेत्र[16]पर्षच्चारिणो [17]बलवशिताभिज्ञाधारणीमुद्रा[18]सुमुद्रिता विचित्रै[19]र्निर्माणकिरणैर्दर्शनि-

[1] वृत्ति A. प्रवृत्त C. प्रवृत्ति K. T. [2] निर्वृत्त A. निवृत्ती C. निवृर्त्त K. निवृत्ति T. [3] पुत्र left out in T. [4] भा in all MSS., but T. [5] ह्यो T. ह्यं ? [6] ल्प A. C. ल्पे K. T. [7] द्धाः A. K. धाः C. T. [8] कं T. Chin. Tib. के in other MSS. [9] ए is added in T. [10] Left out in T. [11] संध्य left out in A. [12] गाद्विद्धे A. गाभिविद्धे C. K. T. [13] च is added in T. [14] नि left out in T. [15] ध्या A. K. T. द्धा C. [16] च T. [17] बल left out in T. [18] स in all MSS. सु (魏) Tib. [19] नि A. K.

ष्ठामादे[1] सुनिवद्धबुद्धयो ऽनाभोग[2]चन्द्रसूर्यमणिमहाभूतच=
र्यागतिसमाः सर्वभूमिषु[3] स्वविकल्पलक्षणविनिवृत्तदृष्टयः
स्वप्नमायादिसर्वधर्मानुदर्शनाद्बुद्धभूम्याश्रयानुप्रविष्टाः सर्व-
सत्त्वधातुं[4] यथार्हद्धर्मदेशनयाकृष्य[5] स्वप्नमायादिसर्वधर्मस=
दसत्पक्षवर्जिते भङ्गोत्पादविकल्परहिते एतान्यथापर्याय[6]-
वृत्त्याश्रयतया[7] प्रतिष्ठापयेयुः । भगवानाह । साधु साधु
महामते तेन हि महामते शृणु साधु च सुष्ठु च मन=
सिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामति=
र्बोधिसत्त्वो महासत्त्वो[8] भगवतः[9] प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । अपरिमितो महामते सर्वध=
र्माणां यथारुतार्थाभिनिवेशसंधिः । लक्षणाभिनिवेशसं=
धिः प्रत्ययाभिनिवेशसंधिर्भावाभावाभिनिवेशसंधिरुत्पादा=
नुत्पादविकल्पाभिनिवेशसंधिर्निरोधानिरोधाभिनिवेशप्र=
तिविकल्पसंधिर्यानायानाभिनिवेशप्रतिविकल्पसंधिः संस्कृ=
तासंस्कृत[10]प्रतिविकल्पाभिनिवेशसंधिर्भूम्यभूमिस्वलक्षणवि=
कल्पाभिनिवेशसंधिः स्वविकल्पाभिसमयविकल्पसंधिः स=
दसत्पक्षतीर्थ्याश्रय[11]प्रतिविकल्पसंधिस्त्रियानैकयानाभिसम=
य[12]विकल्पसंधिः । एते चान्ये च महामते बालपृथग्जना=

[1] द C. T. [2] आना A. K. [3] सर्वधर्मेषु Tib. [4] तु T.
[5] त्व is added in T. [6] र्या A. K. [7] त्याश A. K. [8] Left out in C.
[9] वं A. C. K. T. [10] ता A. C. K. त T. [11] श्र A. K. [12] ये A. K.

नां स्वविकल्पसंधयो यां[1] संधिं संधाय बालपृथग्जनाः प्रतिविकल्पयमानाः कौशेयक्रिमय इव स्वविकल्पदृष्टिसं= धिसूत्रेणात्मानं परांश्च स्वविकल्पदृष्टिसंधिसूत्ररो[2]चनतया परिवेष्टयन्ति भावाभावसंधिलक्षणाभिनिवेशाभिनिवि= ष्टाः । न चात्र महामते कश्चित्संधिर्न[3] संधिलक्षणं विवि= क्तदर्शनात्सर्वधर्माणां विकल्पस्या[4]प्रवृत्त[5]त्वान्महामते बोधि- सत्त्वो महासत्त्वः सर्वधर्मेषु विविक्तदर्शी विहरति ॥

पुनरपरं महामते बाह्यभावाभावस्वचित्तदृश्यलक्षणा= वबोधान्निराभास[6]चित्तमात्रानुसारित्वात्सदसतोः सर्वभाव- विकल्पसंधिविविक्तदर्शनान्न संधिर्ना[7]संधिलक्षणं सर्वधर्मा= णां नात्र कश्चिन्महामते बध्यते न च मुच्यते अन्यत्र वि= तथपतितया बुध्या[8] बन्धमोक्षौ प्रज्ञायेते । तत्कस्य हेतो= र्यदुत सदसतोः[9] सन्ध्यनुपलब्धित्वात्सर्वधर्माणाम् ॥

पुनरपरं महामते त्रयः संधयो बालानां[10] पृथग्जनानां यदुत रागो द्वेषो मोहश्च तृष्णा[11] च पौनर्भविकी[12] नन्दी- रागसहगता यां[13] संधाय गति[14]संधयः[15] प्रजायन्ते । तत्र सं= धिसंधानं[16] सत्त्वानां गतिपञ्चकं संधेर्व्यु[17]च्छेदान्महामते न

[1] यास A. यान्सं C. यां सं K. T. [2] रा A. K. [3] र्ना ? see l. 10 below. [4] स्य A. C. K. स्या T. [5] त्ति T. [6] स्व is added in (宋) (魏) Tib. [7] र्न्न for र्ना in T. र्न (魏) Tib. [8] रुध्या A. वुद्धा C. वुध्या K. T. [9] शतशतोः A. K. [10] बाल T. [11] हस्तृ T. [12] द A. K. [13] या A. K. [14] ग left out in A. [15] ज्ञा in all MSS. जा Chin. Tib. [16] नां C. [17] सधर्व्यु A. सत्वेव्यु C. T. संधेव्यु K.

संधिर्ना[1]संधिलक्षणं प्रज्ञायते ॥ पुनरपरं महामते त्रिसंगतिप्रत्यय[2]क्रियायोगाभिनिवेशाय[3] संधिर्वि[4]ज्ञानानां नैरन्तर्यात्प्रवृत्तियोगेनाभिनिवेशतो भव[5]संधिर्भवति । [6]त्रिस[7]ङ्गतिप्रत्ययव्यावृत्तेर्वि[8]ज्ञानानां विमोक्षत्रयानुदर्शनात्सर्वसंध[9]यो न प्रवर्तन्ते ॥ तत्रेदमुच्यते ॥

अभूतपरिकल्पो हि संधिलक्षणमुच्यते ।
तस्य भूतपरिज्ञानात्संधिजालं प्रसीदति ॥४६॥
भावज्ञानकृतग्राहात्कौशे[10]यक्रि[11]मयो यथा ।
ब[12]ध्यन्ते स्ववि[13]कल्पेन बालाः संध्यविपश्चिताः ॥४७॥

पुनरपि महामतिराह । यत्पुनरेतदुक्तं भगवता येन येन[14] विकल्पेन ये ये भावा विकल्प्यन्ते न हि स तेषां स्वभावो भवति परिकल्पित एवासौ तद्यदि भगवन्परिकल्पित एवासौ न भावस्वभावलक्षणावधारणं ननु ते भगवन्नेवं ब्रुवतः संक्लेशव्य[15]वदानाभावः प्रसज्यते परिकल्पितस्वभावभावि[16]तत्वात्सर्वधर्माणाम् । भगवानाह । एवमेतन्महामते यथा वदसि [17]न महामते यथा बालपृथग्जनै[18]र्भावस्वभावो विकल्प्यते तथा भवति । परिकल्पित

[1] धिर्न T. (縶) Tib. [2] क्रिया in T. Tib. only. [3] शात् Tib. [4] र्वि T. Tib. [5] त is added in A. K. [6] तृ in all MSS. [7] सा T. [8] त्ववि A. K. [9] ध्य A. K. ध C. स T. [10] श्रा A. K. [11] कृ T. [12] बा T. [13] स्वचित्त A. K. स्ववि C. T. [14] Left out in A. [15] व left out in A. K. [16] त in T. only. [17] Left out in T. [18] ने भा A. नै भा K.

एवासौ महामते न भावस्वभावलक्षणावधा[1]रणम् । किंतु यथा[2] महामते आर्यैर्भा[3]वस्वभावो ऽव[4]धार्यत आर्येण ज्ञानेनार्येण दर्शनेनार्येण[5] प्रज्ञाचक्षुषा तथा भावस्वभावो भवति ॥

महामतिराह । तद्यदि भगवन्यथार्यैरार्येण ज्ञानेनार्येण दर्शनेनार्येण प्रज्ञाचक्षुषा न दिव्यमांसचक्षुषा भावस्वभावो ऽव[4]धार्यते तथा भवति न तु[6] यथा बालपृथग्जनैर्विकल्प्यते भावस्वभावः । तत्कथं भगवन्बालपृथग्जनानां[7] विकल्प[8]व्यावृत्तिर्भविष्यत्यार्यभाववस्त्वनवबोधान्न च[9] ते भगवन्विपर्यस्ता नाविपर्यस्ताः[10] । तत्कस्य हेतोर्यदुतार्यवस्तुभावस्वभा[11]वानवबोधात्सदसतोर्लक्षणस्य वृत्तिदर्शनात् । आर्यैरपि भगवन्यथा वस्तु विकल्प्यते न तथा भवति स्वलक्षणविषयागोचरत्वात् । स तेषामपि भगवन्भावस्वभावलक्षणः परिकल्पितस्वभाव एव ख्यायते हेत्वहेतुव्यपदेशाद्यदुत भावस्व[12]लक्षणदृष्टिपतित[13]त्वात् अन्येषां गोचरो भवति । न यथा तेषामित्ये[14]वमनवस्था प्रसज्यते भगवन्भावस्वभावलक्षणानवबोधान्न च भगवन्परिकल्पितस्वभावहेतुको भावस्वभावलक्षणः । स च कथं परिकल्पेन प्र=

[1] ता T. [2] Left out in T. [3] र्यै भा A. यै भा K. [4] भावाव T. [5] Left out in T. [6] च T. [7] ना T. [8] ल्प्य A. K. [9] Left out in A. K. [10] Left out in T. [11] स्व left out in (魏) (唐) Tib. [12] व A. [13] त left out in A. C. [14] त्यु A.

तिविकल्प्यमानो न तथा भविष्यति यथा परिकल्प्यते । अन्यदेव भगवन्प्रतिविकल्पस्य लक्षणमन्यदेव स्वभावल=क्षणं विसदृशहेतुके च भगव[1]न्विकल्पस्वभावलक्षणे ते च परस्परं परिकल्प्य[2]माने बालपृथग्जनैर्न तथा भविष्यतः । किंतु सत्त्वानां विकल्पव्यावृत्त्यर्थमिदमुच्यते यथा प्रति=विकल्पेन वि[3]कल्प्यन्ते तथा न विद्यन्ते ॥

किमिदं भगवन्सत्त्वानां त्वया नास्त्यस्तित्वदृष्टिं[4] विनि=वार्य वस्तुस्वभावाभिनिवेशेनार्यज्ञानगोचरविषयाभिनि=वेशान्[5]नास्तित्वदृष्टिः पुनर्निपात्यते विविक्तधर्मोपदेशाभा=व[6]श्च क्रि[7]यत आर्यज्ञानस्वभाववस्तुदेशनया[8] । भगवा=नाह । न मया महामते विविक्तधर्मोपदेशाभावः क्रि[7]=यते न चा[9]स्तित्वदृष्टिर्निपात्यते आर्यवस्तुस्वभावनिर्देशेन । किंतूत्त्रासपदविवर्जनार्थं सत्त्वानां महामते मयानादि=कालं[10] भावस्वभावलक्षणाभिनिवि[11]ष्टानामार्यज्ञानवस्तु-स्वभावाभिनिवेशलक्षणदृष्ट्या विविक्तधर्मोपदेशः क्रियते न मया महामते भावस्वभावोपदेशः क्रियते । किंतु महामते स्वयमेवाधिगतया[12]थातथ्यविविक्तधर्मविहारिणो भविष्यन्ति भ्रान्तेर्निर्निमित्तदर्शनात्स्वचित्तदृश्यमात्रमव=

[1] व left out in A. [2] ल्प A. [3] नि T. [4] ष्टि T. [5] ना T. द (宋) (唐) Tib. [6] स्वभाव is added in all MSS., but T. Tib. [7] कृ T. [8] दर्शनतया in all MSS., but T. Tib. [9] ना (魏) [10] ल T. [11] वि left out in A. [12] य A.

तीर्थ बाह्यदृश्य[1]भावाभावविनिवृत्तदृष्टयो विमोक्षत्रयाधिगतयाथातथ्य[2]विविक्तधर्मविहारिणो भविष्यन्ति भ्रान्तेर्निर्निमित्तदृष्टयो विमोक्षत्रयाधिगतयाथातथ्यमुद्रा[3]सुमुद्रिता भावस्वभावेषु प्रत्यात्माधिगतया बुद्ध्या प्रत्यक्षविहारिणो भविष्यन्ति नास्त्यस्तित्ववस्तुदृष्टिविवर्जिताः ॥

पुनरपरं महामते अनुत्पन्नाः सर्वधर्मा इति बोधिसत्त्वेन महासत्त्वेन प्रतिज्ञा न करणीया[4]। तत्कस्य हेतोः प्रतिज्ञायाः सर्वस्वभावभावित्वात्त[5]द्धेतुप्रवृत्तिलक्षणत्वाच्च अनुत्पन्नान्सर्वधर्मान्[6]प्रतिज्ञाय प्रतिब्रुवन्महामते बोधिसत्त्वो महासत्त्वः प्रतिज्ञाया हीयते। या प्रतिज्ञानुत्पन्नाः सर्वधर्मा इति सास्य[7] प्रतिज्ञा हीयते प्रतिज्ञायास्तदपेक्षोत्पत्तित्वात्। अथ सापि प्रतिज्ञानुत्पन्ना सर्वधर्माभ्यन्तरादनुत्पन्न[8]लक्षणानुत्पत्तित्वात्प्रतिज्ञाया अनुत्पन्नाः सर्वधर्मा इति स वादः प्रहीयते। प्रतिज्ञावयवकारणेन सदसतो ऽनुत्पत्तिः प्रतिज्ञायाः। सा हि महामते प्रतिज्ञा सर्वभावाभ्यन्तरा सदसतोरनुत्पत्तिलक्षणात्। यदि महामते तया प्रतिज्ञयानुत्पन्नया[9]नुत्पन्नाः सर्वभावा इति

[1] बाह्य° °दृश्य in T. Tib. only. [2] From विविक्तधर्म till याथातथ्य left out in T. Tib. [3] स T. [4] याः A. C. K. T. [5] सर्वभावाभ्यन्तरात्त Tib. [6] सर्वभाव for सर्वधर्म in Tib. [7] सात्म A. C. सास्य K. T. [8] अभिन्न for अनुत्पन्न in T. (宋) (魏) Tib. [9] अत्यंतया A.

प्रतिज्ञां कुर्वन्ति एवमपि प्रतिज्ञाहानिः[1] प्रसज्यते । प्रतिज्ञायाः सदसतोर्[2]नुत्पत्तिभावलक्षणत्वात्प्रतिज्ञा न करणीया । अनुत्पन्नस्वभावलक्षणा हि महामते तेषां प्रतिज्ञा भवति । अतस्ते महामते प्रतिज्ञा न[3] करणीया बहुदोषदुष्टत्वादवयवानां परस्परहेतुविलक्षण[4]कृतकत्वाच्चावयवानां प्रतिज्ञा न करणीया यदुतानुत्पन्नाः सर्वधर्मा एवं शून्या अस्वभावाः सर्वधर्मा इति महामते बोधिसत्त्वेन महासत्त्वेन प्रतिज्ञा न करणीया । किंतु महामते बोधिसत्त्वेन महासत्त्वेन मायास्वप्नवत्सर्वभावोपदेशः करणीयो दृश्यादृश्यलक्षणत्वाद्दृष्टिबुद्धिमोहनत्वाच्च सर्वधर्माणां मायास्वप्नवद्भावोपदेशः करणीयो ऽन्यत्र[5] बालानामुत्त्रासपदविवर्जनतया । बालाः[6] पृथग्जना हि महामते नास्त्यस्तित्वदृष्टिपतितानां[7] तेषामुत्त्रासः स्यान्मेति[8] उत्त्रास्यमाना महामते दूरीभवन्ति महायानात् ॥ तत्रेदमुच्यते ॥

न स्वभावो न विज्ञप्तिर्न वस्तु न च आलयः ।
बालैर्विकल्पिता[9] ह्येते शव[10]भूतैः कुतार्किकैः ॥४८॥

[1] रिः A. नि C. K. T. [2] र left out in T. [3] Left out in T. [4] णा in all MSS., but T. [5] नान्यत्र in all MSS. [6] लाः A. C. ला K. ल T. [7] पतितास् ? [8] स्यान्मा इति A. C. स्यादिति K. T. [9] ह्ये A. C. T. ह्यै K. [10] सर्व in all MSS., but Chin. Tib. read 死屍

अनुत्पन्नाः सर्वधर्माः सर्वतीर्थ्यप्रसिद्धये[1] ।
न हि कस्यचिदुत्पन्ना भावा वै प्रत्ययान्विताः ॥४९॥
अनुत्पन्नाः सर्वधर्माः प्रज्ञया[2] न विकल्पयेत् ।
तद्धेतुमत्त्वात्तत्सिद्धेर्[3]बुद्धिस्तेषां प्रहीयते ॥५०॥
केशोण्डुकं यथा मिथ्या गृह्यते तैमिरैर्जनैः ।
तथा भावविकल्पो ऽयं मिथ्या बालैर्विकल्प्यते[4] ॥५१॥
[5]प्रज्ञप्तिमात्रा[6]न्त्रिभवं[7] नास्ति वस्तुस्वभावतः ।
[8]प्रज्ञप्ति[9]वस्तुभावेन कल्पयिष्यन्ति तार्किकाः ॥५२॥
निमित्तं वस्तु विज्ञप्तिं मनोविस्पन्दितं च तत्[10] ।
अतिक्रम्य तु पुत्रा मे निर्विकल्पाश्चरन्ति ते[11] ॥५३॥
अजले च जलग्राहो मृगतृष्णा यथा नभे[12] ।
दृश्यं[13] तथा हि बालानामार्याणां च विशेषतः ॥५४॥
आर्याणां दर्शनं शुद्धं[14] विमोक्षत्रयसंभवम् ।
उत्पादभङ्गनिर्मुक्तं निराभासप्रचारिणाम्[15] ॥५५॥
[16]निराभासो हि[16] भावनामभवे[17] नास्ति योगिनाम् ।
भावाभावसमत्वेन आर्याणां जायते फ[18]लम् ॥५६॥

[1] यो A. ये C. K. T. [2] ति is added in T. [3] त्तत्सिद्धेर् left out in T.
[4] ल्प K. [5] वि A. C. T. प्र K. [6] त्राचींद्र A. त्रान्त्रि C. त्रान्तृ K. त्रं तृ T. [7] मात्रं त्रिभवं or मात्रात्त्रिभवं ? [8] वि K. [9] प्तिं T.
[10] तभ A. तत् C. K. यत् T. [11] तो A. तत K. [12] भवेत् T.
[13] दूस्येत T. [14] द्धं T. Tib. द्धि in other MSS. [15] णां A. C. णे K. ण T.
[16] नि हि left out in T. [17] According to Tib. भावश्च अभवो ? [18] ह A.

कथं ह्यभावो भावानां कुरुते समतां कथम्।
यदा चित्तं न जानाति बाह्यमध्यात्मिकं चलम्।
तदा तु कुरुते नाशं समता चित्तदर्शनम् ॥५७॥

पुनरपि महामतिराह। यत्[1]पुनरिदमुक्तं भगवता यदा
त्वालम्ब्यमर्थं नोपलभं[2]ते ज्ञानं तदा विज्ञप्तिमात्रव्यव=
स्थानं भवति विज्ञप्तेर्ग्राह्याभावाद्ग्राहक[3]स्याप्यग्रहणं भव=
ति[4]। तदग्रहणान्न प्रवर्तते ज्ञानं विकल्पसंशब्दितम्।
तत्किं पुनर्भगवन्भावानां स्वसामान्यलक्षणानन्यवैचित्र्या=
नवबोधान्नोपलभं[5]ते ज्ञानम्। अथ स्वसामान्यलक्षण-
वैचित्र्यभावस्वभावाभिभ[6]वान्नोपलभते ज्ञानम्। अथ कु=
ड्य[7]कट[8]वप्र[9]प्राकार[10]भूजलपवनाग्निव्यवहितातिदूरसामीप्या=
न्नोपलभं[11]ते ज्ञानं ज्ञेयम्। अथ[12] बालान्धवृद्धयोगादि=
न्द्रियाणां ज्ञेयार्थं नोपलभते ज्ञानम्। तद्यदि भगव=
न्स्वसामान्यलक्षणानन्यवैचित्र्यानवबोधान्नोपलभते ज्ञानं
न तर्हि भगवन्[13] ज्ञानं[14] वक्तव्यमज्ञानमेतद्भगवन्यद्विद्य=
मानमर्थं[15] नोपलभं[5]ते। अथ स्वसामान्यलक्षणवैचित्र्य-
भाव[16]स्वभावाभिभवान्नोपलभते ज्ञानं तदज्ञानमेव भ=

[1] यत् left out in K. T. [2] भ्य in all MSS., but Tib. [3] क in T. only.
[4] भवित A. [5] भ्य in all MSS., but T. Tib. [6] भा A. [7] कुच्य in all MSS.
墻(魏) [8] 幕(魏) 幢幔帷帳(唐) [9] 山巖 Chin. [10] 石壁 Chin.
[11] भ A. C. T. Tib. भ्य K. [12] र्थ T. [13] Left out in T. [14] न K.
[15] र्थं A. [16] भाव left out in T.

गवन्न ज्ञानं[1] ज्ञाये[2] सति भगवन् ज्ञानं[3] प्रवर्तते नाभा=वात्तद्योगाच्च ज्ञेयस्य ज्ञानमित्युच्यते[4]। अथ कुड्यकटवप्र-प्राकारभूजलपवनाग्निव्यवहितातिदूरसामीप्यान्नोपलभते बालवृद्धान्धयोगवद्वैकल्यादिन्द्रियाणां[5] ज्ञानं नोपलभते तद्यदेवं नोपलभते न तद्भगवन् ज्ञानमज्ञानमेव[6] तद्वि=[7]द्यमानमर्थं बुद्धिवैकल्यात्[8] ॥

भगवानाह । न हि तन्महामते एवमज्ञानं भवति ज्ञानमेव । तन्महामते नाज्ञानं न चैतत्संधायोक्तं मया। यदा त्वालम्ब्यमर्थं नोपलभते[9] ज्ञानं[1] तदा विज्ञप्तिमा=त्रव्यवस्थानं भवतीति । किंतु स्वचित्तदृश्यमात्रावबोधा=[10]त्सदसतोर्बाह्यभावाभावाज्ज्ञानमप्यर्थं नोपलभते[11] तदनु=पलम्भाज्ज्ञानज्ञेययोरप्रवृत्तिर्विमोक्षत्रयानुगमाज्ज्ञानस्या=प्यनुपलब्धिः । न च तार्किका अनादिकालभावाभाव-प्रपञ्चवासितमतय एवं प्रजानन्ति ते चाप्रजानन्तो बा=ह्यद्रव्यसंस्थानलक्षणभावाभावं कृत्वा[12] विकल्पस्याप्रवृत्तिं चित्तमात्रतां निर्देक्ष्यन्ति । आत्मात्मीयलक्षणग्राहाभिनि=वेशाभिनिविष्टाः स्वचित्तदृश्यमात्रानवबोधाज्ज्ञानं[13] ज्ञेयं

[1] न T. [2] य T. [3] Left out in A. [4] नं तद्रु A. C. नं तमित्यु K. नमित्यु T. [5] वद्धै A. C. वद्धै K. वुद्धै T. [6] हा is added in A. [7] द्य is added in T. [8] If विद्य° °कल्यात् are put in next to तद्यदेवं, it agrees with Tib. [9] भ्य A. C. [10] दृश्य left out in K. [11] ये A. C. [12] ज्ञे A. [13] ज्ञा A. T. ज्ञा C. त्ता K.

प्रतिविकल्पयन्ति । ते च ज्ञानज्ञेयप्रतिविकल्पनया[1] बाह्यभावाभावप्रविचयानुपलब्धेरुच्छेददृष्टिमाश्रियन्ते[2][3] ॥ तत्रेदमुच्यते ॥

विद्यमानं हि आलम्ब्यं यदि ज्ञानं न पश्यति ।
अज्ञानं तद्धि न ज्ञानं तार्किकाणामयं नयः ॥५८॥
अनन्यलक्षणाभावाज्ज्ञानं[4] यदि न पश्यति ।
व्यवधानदूरसामीप्यं मिथ्याज्ञानं तदुच्यते ॥५९॥
बालवृद्धान्धयोगाच्च ज्ञानं यदि न जायते ।
विद्यमानं हि तज्ज्ञेयं[5] मिथ्याज्ञानं तदुच्यते ॥६०॥

पुनरपरं महामते बालपृथग्जना अनादिकालप्रपञ्च[6]दौष्ठुल्यस्वप्रतिविकल्पना नाटके नृत्यन्तः स्वसिद्धान्तनयदेशनायामकुशलाः स्वचित्तदृश्यबाह्यभावलक्षणाभिनिविष्टा उपायदेशनापाठमभिनिविशन्ते न स्वसिद्धान्तनयं[7] चातुष्कोटिकनयविशुद्धं प्रतिविभावयन्ति । महामतिराह । एवमेतद्भगवन्यथा वदसि देशयतु मे भगवान्देशनासिद्धान्तनयलक्षणं येनाहं चान्ये च बोधिसत्त्वा महासत्त्वा अनागतेऽध्वनि देशनासिद्धान्तनयकुशला न [8]प्रतिलभ्येरन्कुतार्किकैस्तीर्थंकर[9]श्रावकप्रत्येकबुद्धयानिकैः ।

[1] त T. [2] ह्मा A. C. [3] भा left out in T. [4] न्य T.
[5] ज्ञयि A. ज्ञेयं K. [6] काय is added in K. T. [7] यश्चा A. C. K.
यं चा T. [8] वि is added in T. [9] र्थ्यं A. C. K. र्थं T.

भगवानाह। तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु। भाषिष्ये ऽहं ते। साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत्॥

भगवांस्तस्यैतदवोचत्। द्विप्रकारो महामते ऽतीतानागतप्रत्युत्पन्नानां तथागतानामर्हतां सम्यक्संबुद्धानां धर्मनयो यदुत देशनानयश्च सिद्धान्तप्रत्यवस्थाननयश्च[1]। तत्र देशनापाठनयो[2] महामते यदुत[3] विचित्रसंभारसूत्रोपदेशो यथाचित्ताधिमुक्तिकतया[4] देशयन्ति सत्त्वेभ्यः। तत्र सिद्धान्तनयः पुनर्महामते कतमो येन योगिनः स्वचित्तदृश्यविकल्पव्यावृत्तिं कुर्वन्ति यदुतैकत्वान्यत्वोभयत्वानुभयत्वपक्षा[5]पतनताचित्तमनोमनो[6]विज्ञानातीतं स्वप्रत्यात्मार्यगतिगोचरं हेतुयुक्तिदृष्टिलक्षणविनिवृत्तमनालीढं[7] सर्वकुतार्किकैस्तीर्थकरश्रावकप्रत्येकबुद्धयानिकैर्नास्त्यस्तित्वान्तद्वयपतितैस्तमहं सिद्धान्त इति वदामि। एतन्महामते सिद्धान्तनयदेशनालक्षणं यत्र त्वया चान्यैश्च बोधिसत्त्वैर्महासत्त्वैर्योगः करणीयः॥ तत्रेदमुच्यते॥

नयो हि द्विविधो[8] मह्यं सिद्धान्तो देशना च वै।
देशेमि या[9] बालानां सिद्धान्तं योगिनामहम्॥६१॥

[1] प K. [2] ठ A. C. ठा K. T. [3] Left out in T. [4] मो T. [5] क्ष A. C. K.
[6] मनो left out in A. [7] वृत्तमनालीट A. °लीटं C. °मनोलीढं K. वृत्तिमनालीट T. [8] धां T. [9] याः A. C. K. T. इमां देशेमि ?

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेत[1]दवोचत्। उक्तमेतद्भगवंस्तथागतेनार्हता सम्यक्संबुद्धेनैकस्मिन्काल एकस्मिन्समये यथा लोकायतिको विचित्रमन्त्रप्रतिभानो न सेवितव्यो न भ[2]क्तव्यो[3] न[3] पर्युपासितव्यो यं च सेवमानस्य लोकामिषसंग्रहो भवति न धर्मसंग्रह इति। किं कारणं पुनर्भगवतेदमुक्तं लोकायतिको विचित्रमन्त्रप्रतिभानो यं च सेवमानस्य लोकामिषसंग्रहो भवति न धर्मसंग्रहः। भगवानाह। विचित्रमन्त्रप्रतिभानो महामते लोकायतिको विचित्रैर्हेतुपदव्यञ्जनैर्बालान्व्यामोहयति न युक्तियुक्तं [4]नार्थोपसंहितमथ यावदेव यत्किंचिद्बालप्रलापं देशयति। एतेन महामते कारणेन लोकायतिको विचित्रमन्त्रप्रतिभान इत्युच्यते। अक्षर[5]वैचित्र्य[6]सौष्ठवेन बालानाकर्षति। न तत्त्वनयप्रवेशेन प्रविशति स्वयं सर्वधर्मानवबोधाद्द्वन्द्वपतितया दृष्ट्या बालान्व्यामोहयति स्वात्मानं च [7]क्षिणोति। गतिसंध्यप्रमुक्तत्वात्स्वचित्तदृश्यमात्रानवबोधाद्बाह्यभावस्वभावाभिनिवेशाद्विकल्पस्य व्यावृत्तिर्न भवति। अत एतस्मात्कारणान्महामते लोकायतिको विचित्रम-

[1] वंतद् A. वंतमेत K. [2] भक्तित T. [3] Left left out in A. C.
[4] क्तनार्थो A. मुक्तं नार्थौ T. [5] अजवैर A. [6] स्यष्ट A. सौष्ट C.
[7] जि K.

न्त्वप्रतिभानो ऽपरिमुक्त एव जातिजराव्याधिमरणशोकप=
रिदेवदुःखदौर्मनस्योपायासादिभ्यो विचित्रैः पदव्यञ्जनै=
र्हेतुदृष्टान्तोपसंहारैर्बालान्व्यामोहयति ॥

इन्द्रो ऽपि महामते अनेकशास्त्रविदग्धबुद्धिः[1] स्वश=
ब्द[2]शास्त्रप्रणेता तच्छिष्येण नागवेश[3]रूपधारिणा [4]स्वर्ग इ=
न्द्रसभायां प्रतिज्ञां कृत्वा तव वा सहस्रारो रथो भज्यतां
मम वैकैकनागभावस्य फणाच्छेदो भवत्विति । सहध=
र्मेण च नागवेशधारिणा लोकायति[5]कशिष्येण देवाना=
मिन्द्रं विजित्य सहस्रारं रथं भङ्क्त्वा पुनरपीमं लोकमा=
गतः । एवमिदं महामते लोकायतिकविचित्रहेतुदृष्टान्तो=
पनिबद्धं येन तिर्यञ्च[6]मप्यधीत्य देवासु[7]रलोकं[8] विचित्र[9]प=
दव्यञ्जनैर्व्यामोहयति[10] । आयव्ययदृष्टाभिनिवेशेनाभिनि=
वेशयति किमङ्ग पुनर्मानुषान् । अत एतस्मात्कारणा=
न्महामते लोकायतिकः परिवर्जि[11]तव्यो दुःखजन्महे[12]तुवा=
हकत्वान्न सेवितव्यो न भजितव्यो[13] न[13] पर्युपासितव्यः ।
शरीरबुद्धिविषयोपलब्धिमात्रं[14] हि महामते लोकायति=
कैर्देश्यते विचित्रैः पदव्यञ्जनैः शतसहस्रं[15] महामते लो=

[1] विद्धः A. वुद्ध C. बुद्धिः K. T. [2] शब्द left out in all MSS., but T.
[3] रूप left out in T. [4] From स्वर्ग till धारिणा (before लोक°) in T. only.
[5] From तिक till तिकवि left out in A. [6] यंच्छो A. यंचो C. T. यंचा K.
[7] रं T. [8] क T. [9] त्रैः T. [10] न्ति T. [11] र्जेयि for र्जि in K. T.
[12] त्वा T. [13] Left out in A. C. [14] त्रा A. C. K. त्रं T. [15] च is added in T.

कायतं। किंतु पश्चिमे लोके पश्चिमायां पञ्चाशत्यां भिन्नसंहितं भविष्यति कुतर्कहेतुदृष्टिप्रणीतत्वात्[1]। भिन्नसंहितं भविष्यत्यशिष्यपरिग्रहात्। एतदेव महामते लोकायतं भिन्नसंहितं विचित्रहेतूपनिबद्धं[2] तीर्थकरैर्देश्यते[3]। स्वकारणाभिनिवेशाभिनिविष्टैर्न[4] स्वनयः। न च महामते कस्यचित्तीर्थकरस्य स्वशास्त्रनयो ऽन्यत्र लोकायतमेवानेकैराकारैः कारणमुखशतसहस्रैर्देशयन्ति न स्वनयं च न[5] प्रजानन्ति मोहोहाल्लोकायतमिदमिति॥

महामतिराह। यदि भगवन्सर्वतीर्थकरा लोकायतमेव विचित्रैः पदव्यञ्जनैर्दृष्टान्तोपसंहारैर्[6]देशयन्ति न स्वनयं स्वकारणाभिनिवेशाभिनिविष्टा[7] अथ किं भगवानपि लोकायतमेव देशयत्यागतागतानां[8] नानादेशसंनिपतितानां देवासुरमनुष्याणां विचित्रैः पदव्यञ्जनैर्न स्वमतं सर्वतीर्थ्य[9]मतोपदेशाभ्यन्तरत्वात्। भगवानाह। नाहं महामते लोकायतं[10] देशयामि न चायव्ययम्। किंतु महामते अनायव्ययं देशयामि। तत्रायो नाम महामते उत्पादराशिः समूहागमा उत्पद्यन्ते[11]। तत्र व्ययो नाम महामते विनाशः। अनायव्यय इत्यनुत्पादस्यैतदधिव=

[1] प्रहीण T. [2] हेतुपदनि Tib. [3] दू A. ईं C. दें K. T. [4] त्र T. [5] न left out in A. C. T. [6] संहरि T. [7] वि left out in A. [8] गता left out in A. [9] र्थ T. [10] ते A. C. K. तं T. [11] गमादुत्पद्यते Tib.

चनम्। नाहं महामते सर्वतीर्थकरविकल्पाभ्यन्तरं देशयामि। तत्कस्य हेतोर्यदुत बाह्य[1]भावाभावादनभिनि[2]वेशात्स्वचित्तदृश्यमात्रावस्थानाद्विधावृत्तिनो ऽप्रवृत्तेर्विकल्पस्य निमित्तगोचराभावात्स्वचित्तदृश्यमात्रावबोधनात्स्वचित्तदृश्यवि[3]कल्पो न प्रवर्तते। अप्रवृत्तिविकल्पस्यानिमित्तशून्यताप्रणिहितविमोक्षत्रयावतारान्मुक्त इत्युच्यते॥

अभिजानाम्यहं महामते अन्यतरस्मिन्पृथिवीप्रदेशे विहरामि। अथ येनाहं तेन लोकायतिको ब्राह्मण उपसंक्रान्त उपसंक्रम्याकृतावकाश एव मामेवमाह। सर्वं भो गौतम कृतकम्। तस्याहं महामते एवमाह। सर्वं भो ब्राह्म यदि कृतकमिदं प्रथमं लोकायतम्। सर्वं भो गौतम अकृतकम्। यदि ब्राह्मण सर्वमकृतकमिदं द्वितीयं लोकायतम्। एवं सर्वमनित्यं सर्वं[4] नित्यं[4] सर्वमुत्पाद्यं सर्वमनुत्पाद्यम्। इदं ब्राह्मण षष्ठं लोकायतम्। पुनरपि महामते मामेवमाह ब्राह्मणो लोकायतिकः। सर्वं भो गौतम एकत्वं सर्वमन्यत्वं सर्वमुभयत्वं सर्वमनुभयत्वं सर्वं कारणाधीनं विचित्रहेतूपपत्तिदर्शनात्। इदमपि ब्राह्मण एकादशं लोकायतम्। पुनरपि भो गौतम सर्वमव्याकृतं सर्वं व्याकृतमस्त्यात्मा नास्त्यात्मास्त्ययं

[1] ह्या K. [2] द seems to be left out in Tib. [3] नि in K. only. [4] Left out in A.

लोको नास्त्ययं लोको ऽस्ति परो लोको नास्ति परो[1] लोको[1] नास्त्यस्ति[2] च[2] परो लोको[2] ऽस्ति मोक्षो नास्ति मोक्षः सर्वं क्षणिकं सर्वमक्षणिकमाकाशमप्रतिसंख्यानि=रोधो निर्वाणं भो गौतम कृतकमकृतकमस्त्यन्तरा[3]भवो नास्त्यन्तराभव इति । तस्यैतदुक्तं महामते मया । यदि भो ब्राह्मण एवमिदमपि ब्राह्मण लोकायतमेव भवतीति । न मदीयं त्वदीयमेतद्ब्राह्मण लोकायतम् । अहं भो ब्रा=ह्मण अनादिकालप्रपञ्चविकल्पवासनादौष्ठुल्यहेतुकं त्रि-भवं वर्णयामि स्वचित्तदृश्यमात्रानवबोधाद्ब्राह्मण विक=ल्पः प्रवर्तते न बाह्यभावोपलम्भात् । यथा तीर्थकराणा=मात्मेन्द्रियार्थसंनिकर्षात्त्रयाणां न तथा मम । अहं भो ब्राह्मण न हेतुवादी नाहेतुवादी[4] अन्यत्र विकल्पमेव ग्रा=ह्यग्राहकभावेन प्रज्ञाप्य प्रतीत्यसमुत्पादं देशयामि । न च[5] त्वादृशा अन्ये वा बुध्यन्त आत्मग्राहपतितया संतत्या । निर्वाणाकाशनिरोधानां महामते तत्त्वमेव नोपलभ्य[6]ते संख्यायाम् । कुतः पुनः कृतकत्वम् ॥

पुनरपि महामते लोकायतिको ब्राह्मण एवमाह । अ=ज्ञानतृष्णाकर्महेतुकमिदं भो गौतम त्रिभवमथाहेतुकम् । द्वयमप्येतद्ब्राह्मण लोकायतम् । स्वसामान्यलक्षणपतिता

[1] Left out in A. [2] Left out in C. T. [3] अत्यंतरो A. [4] Left out in A. [5] य K. [6] पद्य K.

भो गौतम सर्वभावाः । इदमपि ब्राह्मण लोकायतमेव भवति यावद्ब्राह्मण मनोविस्पन्दितं बाह्यार्थाभिनिवेशविकल्पस्य तावल्लोकायतम् ॥

पुनरपरं महामते[1] लोकायतिको ब्राह्मणो मामेतदवोचत् । अस्ति भो गौतम किंचिद्यन्न लोकायतं मदीयमेव भो गौतम सर्वतीर्थकरैः[2] प्रसिद्धं विचित्रैः पदव्यञ्जनैर्हेतुदृष्टान्तोपसंहारैर्देश्यते । अस्ति भो ब्राह्मण यन्न त्वदीयं न च न प्रसिद्धं देश्यते न च न[3] विचित्रैः पदव्यञ्जनैर्न च नार्थोपसंहितमेव । किं तदलोकायतं यन्न प्रसिद्धं देश्यते च । अस्ति च भो ब्राह्मण अलोकायतं यन्न सर्वतीर्थकराणां तव च बुद्धिर्न गाहते बाह्यभावाद[4]सद्भूतविकल्पप्रपञ्चाभिनिविष्टानां यदुत विकल्पस्याप्रवृत्तिः सदसतः स्वचित्तदृश्यमात्रावबोधाद्विकल्पो न प्रवर्तते बाह्यविषय[5]ग्रहणाभावाद्विकल्पः स्व[6]स्थाने ऽवतिष्ठते च[7] दृश्यते[7] । तेनेदमलोकायतं मदीयं न च त्वदीयम् । स्वस्थाने ऽवतिष्ठत इति न प्रवर्तत इत्यर्थो[8] ऽनुत्पत्तिविकल्पस्याप्रवृत्तिरित्युच्यते । एवमिदं भो ब्राह्मण यन्न लोकायतम् । संक्षेप[9]तो ब्राह्मण यत्र विज्ञानस्यागतिर्गतिः च्यु=

[1] In K. only. [2] र्थ्य A. C. T. र्थ K. [3] च न च A. C. च न न. K.
[4] द seems to be left out in Tib. [5] कल्प A. C. पर्य K. [6] स्व left out in A.
[7] In K. only. [8] इति A. C. इत्यर्थः K. [9] पे K.

तिरूपमत्तिः प्रार्थनाभिनिवेशाभिष्वङ्गो दर्शनं दृष्टिः[1] स्थानं परामृष्टिर्विचित्रलक्षणाभिनिवेशः सङ्गतिः सत्त्वानां तृष्णीयाः कारणाभिनिवेशश्च । एतद्धो ब्राह्मण त्वदीयं लोकायतं न मदीयम् । एवमहं महामते पृष्टो लोकायतिकेन ब्राह्मणेनागत्य । स च मयैवं[2] विसर्जितस्तूष्णीभावेन प्रक्रान्तः ॥

अथ खलु कृष्णपक्षिको नागराजो ब्राह्मणरूपेणागत्य भगवन्तमेतदवोचत् । तेन हि गौतम परलोक एव न[3] संविद्यते । तेन हि माणव कुतस्त्वमागतः । इहाहं गौतम श्वेतद्वीपादागतः । स एव ब्राह्मण परो लोकः । अथ माणवो निष्प्रतिभानो निगृहीतो ऽन्तर्हितो ऽपृष्ट्वैव मां[4] स्वनयप्रत्यवस्थानकथां चिंतयन् । [5]शाक्यपुत्रो मन्नयं[6] बहिर्धा [7]वराको ऽप्रवृत्ति[8]लक्षणहेतुवादी स्वविकल्पदृश्यलक्षणावबोधाद्विकल्पस्याप्रवृत्तिं वर्णयति[9] । त्वं चै[10]तर्हि महामते मां पृच्छसि किं कारणं लोकायतिक[11]विचित्रमन्त्रप्रतिभानं सेव्यमानस्यामिषसं[12]ग्रहो भवति[13] न धर्मसं[14]ग्रह इति । महामतिराह । अथ धर्मामिषमिति भगवन्[15]कः प=

[1] दृष्टि° or दृष्टेः Tib. [2] व T. [3] Left out in K. [4] ष्टैव मा T. [5] अ is added in A. C. K. [6] यं न A. C. यन्नय K. यं नय T. [7] ता is added in T. वरा° °वादी seems to be क्लेशाप्रवृत्त्यलक्षणाहेतुवादी in Tib. [8] त्य T. [9] न्ति A. C. T. [10] चे A. C. K. चै T. [11] का T. [12] सं left out in T. [13] चरति T. [14] सं left out in A. [15] भगवन् left out in T.

दार्थः । भगवानाह । साधु साधु महामते[1] पदार्थद्वयं प्रति [2]मीमांसा प्रवृत्तानागतां जनतां समा[3]लोक्य । [4]तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । तत्रामिषं महामते कतमद्यदुतामिषमामृशमा[5]कर्षणं निर्मृषं[6] परामृष्टिः स्वादो[7] बाह्यविषया[8]भिनिवेशो ऽन्तद्वयप्रवेशः कुदृष्ट्या[9] पुनः स्कन्धप्रादुर्भावो जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासप्रवृत्तिस्[10]तृष्णायाः पौनर्भविक्या[11] आदिं कृत्वामिषमिदमित्युच्यते मया चान्यैश्च बुद्धैर्भगवद्भिः[12] । एष महामते आमिषसंग्रहो न धर्मसंग्रहो यं लोकायतिकं सेवमानो लभते लोकायतम् ॥

तत्र महामते धर्मसंग्रहः कतमो यदुत स्वचित्तधर्मनैरात्म्यद्वयावबोधाद्धर्मपुद्गलनैरात्म्य[13]लक्षणदर्श[14]नाद्विकल्पस्याप्रवृत्तिर्भू[15]म्युत्तरोत्तरपरिज्ञानाच्चित्तमनोमनोविज्ञानव्यावृत्तिः [16]सर्वबुद्धज्ञानाभिषेकगतिरनधिष्ठापदपरिग्रहः सर्व-

[1] प्रतिभौ is added in A. प्रति id. in C. [2] पन्न for मी in T. [3] लो left out in T. [4] ते left out in T. [5] शमाक left out in T. [6] मर्शनमाकर्षणं निर्मृष्टिः ? [7] हो A. [8] षयाभि is added in A. [9] ष्ट्वा A. [10] पायासं प्रवृत्तिं तृ° ? [11] क्यः A. क्याः C. क्या K. का T. [12] भगवद्भिः left out in K. T. [13] लक्षणं is added in T. [14] दर्शना left out in T. [15] म्यो T. [16] सर्व left out in T.

धर्मानाभोगवशवर्तिता धर्म इत्युच्यते सर्वदृष्टिप्रपञ्चविकल्पभावान्तद्वयापतनतया[1][2]। प्रायेण हि महामते तीर्थकरवादो[3][4] बालानन्तद्वये पातयति[5] न तु विदुषां[6] यदुतोच्छेदे च शाश्वते चाहेतुवादपरिग्रहाच्छाश्वतदृष्टिर्भवति[7] कारणविनाशहेत्वभावादुच्छेददृष्टिर्भवति। किंतूत्पादस्थितिभङ्गदर्शनाद्धर्म इत्येवं वदामि। एष महामते धर्माभिषनिर्णयः। यत्र त्वयान्यैश्च बोधिसत्त्वैर्महासत्त्वैः शिक्षितव्यम्। तत्रेदमुच्यते॥

संग्रहैश्च दमैस्त्वाञ्शीलेन[8] च वशी करेत्।
प्रज्ञया नाशयेद्दृष्टिं विमोक्षैश्च विवर्धयेत्[9] ॥६२॥
लोकायतमिदं सर्वं यत्तीर्थ्यैर्देश्यते मृषा।
कार्यकारणसद्दृष्ट्या[10] स्वसिद्धान्तो न विद्यते ॥६३॥
अहमेकस्वसिद्धान्तं[11][12] कार्यकारणवर्जितम्।
देशेमि शिष्यवर्गस्य लोकायतविवर्जितम्[13] ॥६४॥
चित्तमात्रं न दृश्यो ऽस्ति द्विधा चित्तं हि दृश्यते।
ग्राह्यग्राहकभावेन[14] शाश्वतोच्छेदवर्जितम् ॥६५॥

[1] द्वैं A. C. [2] पतनतया left out in A. [3] र्थ्यं A. C. K. र्थं T. [4] वादो left out in A. [5] न तत्र द्वय पातये A. C. न तत्र द्वये पातये K. नंतद्वये पातय T. [6] ष यि K. [7] च हेतु A. C. K. च अवाद T. [8] त्वाच्छीले A. त्वांच्छीले C. त्वांच्छील T. [9] बंध A. C. K. वद्ध T. वर्ध Tib. [10] सद्दृ in all MSS. सद्दू Tib. [11] कः A. C. [12] त A. T. तं C. तयं K. [13] ति A. [14] ग्राह्य left out in K.

यावत्प्रवर्तते चित्तं तावल्लोकायतं भवेत् ।
अप्रवृत्तिविकल्पस्य स्वचित्तं पश्यते जगत् ॥६६॥
आयं कार्यार्थनिर्वृत्तिं व्ययं कार्यस्य दर्शनम्[1] ।
आयव्ययपरिज्ञानाद्विकल्पो न प्रवर्तते ॥६७॥
नित्यमनित्यं कृतकर्म[2]कृतकं[3] परापरम् ।
एवमाद्यानि सर्वाणि लोकायतनयं[4] भवेत् ॥६८॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत् । निर्वाणं[5] निर्वाणमिति भगवन्नुच्यते कस्यैतदधिवचनं यदुत निर्वाणमिति यत्सर्वतीर्थ[6]करैर्विकल्प्यते । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । यथा तीर्थ[7]करा निर्वाणं वि[8]कल्पयन्ति न च भवति तेषां विकल्पानुरूपं निर्वाणम् । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । तत्र केचित्तावन्महामते तीर्थकराः स्कन्धधात्वायतननिरोधाद्विषयवैराग्यान्नित्य[10]वैधर्मा[11]-दर्शनाच्चित्तचैत्त[12]कलापो न प्रवर्तते ऽतीतानागतप्रत्युत्प=

[1] व्ययं न कार्यदर्शनम् ? [2] र्मं T. [3] च is added in T. [4] यो ? [5] Left out in K. [6] र्थ्यं A. C. T. र्थं K. [7] र्थ्यं A. C. र्थं K. T. [8] वि in K. only. [9] पनि A. C. पन्नि K. पं नि T. [10] न्नित्यं A. C. K. नित्य T. Tib. [11] र्म्यं Tib. [12] देशना च्चित्तक T.

न्नविषयानंनुस्मरणाद्दीपबीजानलवदुपादानोपरमादप्रवृत्तिर्विंकल्पस्येति वर्णयन्ति । अतस्तेषां तत्र निर्वाणबुद्धिर्भवति । न च महामते विनाशदृष्ट्या निर्वायते[3] ॥

अन्ये पुनर्देशान्तरस्थानगमनं मोक्ष इति वर्णयन्ति विषयविकल्पोपरमादिषु मवनवत् । अन्ये पुनर्वर्णयन्ति तीर्थकरा बुद्धिबोद्धव्यदर्शनविनाशान्मोक्ष इति । अन्ये विकल्पस्याप्रवृत्तेर्नित्यानित्यदर्शनान्मोक्षं कल्पयन्ति । अन्ये पुनर्वर्णयन्ति विविधनिमित्तविकल्पो दुःखजन्मवाहक इति स्वचित्तदृश्यमात्राकुशला निमित्तभयभीता[6] निमित्तदर्शनात्सुखाभिलाषनिमित्तो[7] निर्वाणबुद्धयो भवन्ति । अन्ये पुनरध्यात्मबाह्यानां सर्वधर्माणां स्वसामान्यलक्षणावबोधादविनाशतो ऽतीतानागतप्रत्युत्पन्नभावास्तितया निर्वाणं कल्पयन्ति । अन्ये[8] पुनरात्मसत्त्वजीवपोषपुरुषपुद्गलसर्वधर्माविनाशतश्च निर्वाणं कल्पयन्ति ॥

अन्ये पुनर्महामते तीर्थकरा दुर्विदग्धबुद्धयः प्रकृतिपुरुषान्तरदर्शनाद्गुणपरिणामकर्तृत्वाच्च निर्वाणं कल्पयन्ति । अन्ये पुण्यापुण्यपरिक्षयादन्ये क्लेशक्षयाज्ज्ञानेन

[1] यान Tib. [2] विं Tib. [3] न्ते T. where निर्वायन्ते is repeated.
[4] पुनर् in T. only. [5] ध K. [6] भयंता A. भयभीताः C. K. T.
[7] त्ते Tib. [8] अन्यैः A. C. अन्यै K. अन्ये T. [9] मे K. [10] ण्या T.
[11] शा T. [12] क्षयज्ञा Tib.

चान्य ईश्वरस्वतन्त्रकर्तृत्वदर्शनाज्जगतो निर्वाणं कल्पयन्ति । अन्ये[1] ऽन्योन्यप्रवृत्तो ऽयं संभवो जगत इति न कारणतः स च कारणाभिनिवेश एव न चाव[2]बुध्यन्ते[3] मोहात्तदनवबोधान्निर्वाणं कल्पयन्ति । अन्ये पुनर्महामते तीर्थकराः सत्यमार्गाधिगमान्निर्वाणं कल्पयन्ति । अन्ये गुणगुणिनोरभिसंबद्धादेकत्वान्यत्वोभयत्वानुभयत्वदर्शनान्निर्वाणबुद्धयो भवन्ति । अन्ये स्वभावतः[4] प्रवृत्तितो मयूरवैचित्र्यविविधरत्नाकरकण्टकतैक्ष्ण्यवद्भावानां स्वभावं दृष्ट्वा निर्वाणं विकल्पयन्ति । अन्ये पुनर्महामते पञ्चविंशतितत्त्वावबोधादन्ये प्रजापालेन षड्गुणो[5]पदेशग्रहणान्निर्वाणं कल्पयन्ति । अन्ये कालकर्तृदर्शनात्कालायत्ता[6] लोकप्रवृत्तिरिति तदवबोधान्निर्वाणं कल्पयन्ति । अन्ये[7] पुनर्महामते भ[8]वेनान्ये ऽभवेनान्ये भवाभवपरिज्ञयान्ये भवनिर्वाणा[9]विशेषदर्शनेन निर्वाणं कल्पयन्ति ॥

अन्ये पुनर्महामते वर्णयन्ति सर्वज्ञसिंहनादनादिनो यथा स्वचित्तदृश्यमात्रावबोधाद्बाह्यभावाभावा[10]नभिनिवेशाच्चातुष्कोटिकारहित[11] यथाभूतावस्थानदर्शनात्स्वचित्तदृ=

[1] Left out in K. [2] अत्र कारणे ऽभिनिवेशवत्त्वाव° for स च का° चाव Tib. [3] ते A. C. ध्यांते K. ध्यन्ते T. [4] तो A. C. T. को K. [5] षड्गुणो A. षाड्गुण्यो C. K. षट्गुण्यो T. 六分。瑜伽論卷第十五曰。言論。尚論。諍論。毀謗論。順正論。教通論。 [6] यंतारा A. C. K. यत्ता T. Tib. [7] अन्यै A. K. अन्यैः C. अन्ये T. [8] भा K. [9] ण A. C. K. णा T. [10] व K. [11] त T. Tib. ताद्?

श्यविकल्पस्यान्तद्व[1]यापतनतया ग्राह्य[2]ग्राहकानुपलब्धेः स=
र्वप्रमाणाग्रहणाप्रवृत्तिदर्शनात्तत्त्वस्य व्यामोहकत्वादग्रहणं[3]
तत्त्वस्य तद्व्युदासा[4]त्[5]स्वप्रत्यात्मार्यधर्माधि[6]गमान्नैरात्म्यद्वया=
वबोधात्क्लेशद्वयविनिवृत्तेरावरणद्वयविशुद्धत्वाद्भूम्युत्तरोत्तर-
तथागतभूमिमायादिविश्वसमाधिचित्तमनोमनोविज्ञान=
व्यावृत्तेनिर्वाणं कल्पयन्ति । एवमन्यान्यपि यानि ता=
र्किकैः कुतीर्थ्यप्रणीतानि तान्ययु[7]क्तियुक्तानि विद्वद्भिः प=
रिवर्जिता[8]नि । सर्वे ऽप्येते महामते अन्तद्वयपतितया सं=
तत्या निर्वाणं कल्पयन्ति । एवमादिभिर्विकल्पैर्महामते
सर्वतीर्थकरैर्निर्वाणं परिकल्प्य[9]ते । न चात्र कश्चित्प्रवर्तते
वा निवर्तते वा । एकैकस्य महामते तीर्थकरस्य निर्वा=
णं तत्स्व[10]शास्त्रमति[11]बुद्ध्या परीक्ष्यमाणं व्यभि[12]चरति तथा
न तिष्ठते यथा तैर्विकल्प्यते मनस आगतिगतिविस्पन्द=
नान्नास्ति कस्यचिन्निर्वाणम् । अत्र त्वया महामते शि=
क्षित्वा[13]न्यैश्च बोधिसत्त्वैर्महासत्त्वैः सर्वतीर्थ[14]करनिर्वाणदृष्टि=
[15]र्व्याव[16]र्तनीया ॥ तत्रेदमुच्यते ॥

निर्वाणदृष्टयस्तीर्थ्या विकल्पे[17]न्ति पृथक्पृथक् ।

[1] द्वै T. [2] ह्या K. [3] ण A. K. T. णं C. [4] स A. C. T. सा K.
[5] सर्वप्रमाण is added in A. C. [6] ध K. [7] यु left out in K. [8] तव्या A. C.
[9] ल्प K. [10] तत्सु A. C. तत्त्स K. तत्त्व T. [11] भि ? धिमुच्य Tib.
[12] ति K. [13] त्वा left out in K. [14] र्थ्य A. C. र्थ K. T. [15] व्या K. T.
[16] र्ति K. [17] ल्प A. C. T. ल्पे K.

कल्पनामात्रमेवैषां मोक्षोपायो न विद्यते ॥६९॥
बन्ध्यबन्धन[1]निर्मुक्ता उपायैश्च विवर्जिताः ।
तीर्थ्या[2] मोक्षं विकल्पेन्ति[3] न च मोक्षो हि विद्यते ॥७०॥
अनेकभेदभिन्नो हि तीर्थ्यानां दृश्यते नयः ।
अतस्तेषां न मोक्षो ऽस्ति कस्मान्मूढैर्विकल्प्यते ॥७१॥
कार्यकारणदुर्दृष्ट्या[4] तीर्थ्याः सर्वे विमोहिताः[5] ।
अतस्तेषां न मोक्षो[6] ऽस्ति सदसत्पक्षवादिनाम् ॥७२॥
जल्पप्रपञ्चाभिरता[7] हि[8] बालास्तत्त्वे न कुर्वन्ति मतिं विशालाम् ।
जल्पो हि त्रैधातुकदुःखयोनिस्[9]तत्त्वं हि दुःखस्य विनाशहेतुः ॥७३॥
यथा हि दर्पणे[10] रूपं दृश्यते न च विद्यते ।
वासनादर्पणे[11] चित्तं द्विधा दृश्यति बालिशैः ॥७४॥
चित्तदृश्यापरिज्ञानाद्विकल्पो जायते द्विधा ।
चित्तदृश्यपरिज्ञानाद्विकल्पो न प्रवर्तते ॥७५॥
चित्तमेव भवेच्चित्रं[12] लक्ष्यलक्षणवर्जितम् ।
दृश्याकारं न दृश्यो ऽस्ति यथा बालैर्विकल्प्यते ॥७६॥
विकल्पमात्रं त्रिभवं बाह्यमर्थं न विद्यते ।
विकल्पं दृश्यते चित्रं[13] न च बालैर्विभाव्यते ॥७७॥

[1] ०वन्धेन Tib. [2] तिर्थ्या A. C. तीया K. तीर्थ्या T. [3] ल्पंति A. C. ल्पोनि K. ल्पेंति T. [4] ष्ट्वा A. [5] विमोद्धय K. [6] मोक्षध K. [7] रि T. [8] हि left out in T. [9] निःस K. [10] र्प्ये T. [11] प्य T. [12] त्तं T. [13] त्तं A. C. T. त्रं K.

सूत्रे सूत्रे विकल्पोक्तं[1] संज्ञानामान्तरेण च।
अभिधानविनिर्मुक्तं अभिधेयं न लक्ष्यते ॥७८॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्। देशयतु मे भगवांस्तथागतोऽर्हन्सम्यक्संबुद्धः स्वबुद्धबुद्धतां येनाहं चान्ये च बोधिसत्त्वा महासत्त्वास्तथागतस्वकुशला स्वमात्मानं परांश्चावबोधयेयुः[2]। भगवानाह। तेन हि महामते त्वमेव परिपृच्छ यथा ते क्षमते तथा विसर्जयिष्यामि। महामतिराह। किं पुनर्भगवंस्तथागतोऽर्हन्सम्यक्संबुद्धोऽकृतकः कृतकः कार्यं कारणं लक्ष्यं[3] लक्षणमभिधानमभिधेयं बुद्धिर्बोद्धव्य[4] एवमाद्यैः पदनिरुक्तैः किं भगवानन्यानन्यः[5] ॥

भगवानाह। न महामते तथागतोऽर्हन्सम्यक्संबुद्ध एवमाद्यैः पदनिरुक्तैरकृतको न[6] कृतकं[7] न कार्यं न कारणं। तत्कस्य हेतोर्यदुत[8] प्रभयदोषप्रसंगात्। यदि हि महामते तथागतः कृतकः स्यादनित्यत्वं स्यादनित्यत्वात्सर्वं[9] हि कार्यं तथागतः स्यादनिष्टं चैतन्मम चान्येषां च तथागतानाम्। अथाकृतकः स्यादलब्धात्मकत्वात्समुदागतसंभारवैयर्थ्यं

[1] क्तः K. [2] येयेय A. येय C. यमः K. [3] लक्ष्यं ल in K. only. [4] द्धि A. C. ध K. [5] वानन्य A. वानन्योनन्यः C. K. भगवन्नन्यो ऽनन्यः Tib. [6] ना K. [7] कृतको ? [8] प्र in K. only. उभय (魏) Tib. [9] त्वा सर्वं A.

स्याच्छशविषाणवद्वन्ध्यापुत्रतुल्यश्च स्यादकृतकत्वात् । यच्च महामते न कार्यं न[1] कारणं तन्न सन्नासद्यच्च न सन्नासत्तच्चातुष्कोटिक[2]बाह्यम् । चातुष्कोटिकं[3] च महामते लोकव्यवहारः । यच्च चातुष्कोटिकबाह्यं तद्वाग्मात्रं प्रसज्यते वन्ध्यापुत्रवत् । वन्ध्यापुत्रो हि महामते वाग्मात्रं[4] न चातुष्कोटिकपतितः । अपतितत्वादप्रमाणं विदुषामेवं सर्वतथागतपदार्थो विद्वद्भिः प्रत्यवगन्तव्याः । यदप्युक्तं मया निरात्मानः सर्वधर्मा इति तस्याप्यर्थं निबोद्धव्यं महामते निरात्मभावो महामते नैरात्म्यं स्वात्मना सर्वधर्मा वि[5]द्यन्ते न परात्मना गोऽश्ववत् । तद्यथा महामते न गोभावो ऽश्वात्मको न चाश्वभावो गवात्मको[6] न सन्नासन्न च तौ स्वलक्षणतो न विद्येते एव तौ स्वलक्षणतः एवमेव महामते सर्वधर्मा न च स्वलक्षणेन[7] न संविद्यन्ते विद्यन्त[8] एव तेन च बालपृथग्जनैर्निरात्मार्थता[9]वबुध्यते विकल्पमुपादाय न त्वविकल्पमेवं शून्यानुत्पादास्वाभाव्यं सर्वधर्माणां प्रत्यवगन्तव्यम् । एवं स्कन्धेभ्यो नान्यो नानन्यस्तथागतः । यद्यनन्यः स्कन्धेभ्यः स्यादनित्यः स्यात्कृ=

[1] कार्यान्न A. C. कार्यं न K. [2] क A. C. कं K. [3] बाह्यम् to °कं left out in K. [4] वाङ्मात्रं A. C. वाद्यात्रं K. [5] वि is added in K. [6] च is added in K. [7] क्षे न A. C. क्षणेन K. [8] Left out in A. [9] त A. का for अर्थता in K.

तत्वात्स्कन्धानाम् । अथान्यः स्याद्द्वये सत्यन्यथा भवति गोविषाणवत् ॥

तत्र सादृश्यदर्शनादनन्यत्वं ह्रस्वदीर्घदर्शनादन्यत्वं सर्वभावानां । दक्षिणं हि महामते गोविषाणं वामस्यान्यद्भवति वाममपि दक्षिणस्य एवं ह्रस्वदीर्घत्वयोः परस्परतः एवं वर्णवैचित्र्यतश्च । अतश्चापरस्परतो ऽन्यो[1] न चान्यस्तथागतः स्कन्धधात्वायतनेभ्यः । एवं विमोक्षात्तथागतो ना[2]न्यो नानन्यस्तथागत एव मोक्षशब्देन देश्यते । यद्यन्यः स्यान्मोक्षात्तथागतो रूपलक्षणयुक्तः स्याद्रूपलक्षणयुक्तत्वादनित्यः स्यात् । अथानन्यः स्यात्प्राप्तिलक्षणविभागो न स्याद्योगिनां दृष्टश्च महामते वि[3]भागो योगिभिरतो नान्यो नानन्यः । एवं ज्ञानं ज्ञेयान्नान्यन्ना[4]नन्यत्[5] । यद्वि महामते न नित्यं नानित्यं[6] न कार्यं न कारणं न संस्कृतं नासंस्कृतं न बुद्धिर्न बोद्ध[7]व्यं न लक्ष्यं न लक्षणं न स्कन्धा[8] न[8] स्कन्धेभ्यो ऽन्यन्नाभिधेयं नाभिधानं[9] नैकत्वान्यत्वोभयत्वानुभयत्वसंबद्धं तत्सर्वप्रमाणविनिवृत्तं यत्सर्वप्रमाणविनिवृत्तं तद्वाङ्मात्रं संपद्यते यद्वाङ्मात्रं तदनुत्पन्नं यदनुत्पन्नं तदनिरुद्धं यदनिरुद्धं तदा=

[1] वैचित्र्यपि परस्परतो ऽन्या Tib. [2] ना left out in K. [3] गा is added in K.
[4] ना A. [5] त्व is added in A. [6] नित्यं left out in C. [7] ध K.
[8] Left out in K. [9] These words are put before अभिधेयं in K.

काशसममाकाशं च महामते न कार्यं न कारणं यच्च न कार्यं न कारणं तन्निरालम्ब्यं यन्निरालम्ब्यं तत्सर्वप्रपञ्चातीतं यत्सर्वप्रपञ्चातीतं स तथागतः । एतद्धि[1] महामते सम्यक्संबुद्धत्वमेषा सा बुद्धबुद्धता सर्वप्रमाणेन्द्रियविनिवृत्ता[2] ॥ तत्रेदमुच्यते ॥

प्रमाणेन्द्रियनिर्मुक्तं न कार्यं नापि कारणम् ।
बुद्धिबोद्धव्यरहितं लक्ष्यलक्षणवर्जितम् ॥७९॥
स्कन्ध[3]प्रतीत्यसंबुद्धो न दृष्टः केनचित्क्वचित् ।
यो[4] न दृष्टः क्वचित्केनचित्कथं तस्य विभावना ॥८०॥
न कृतको नाकृतको[5] न कार्यं नापि कारणम् ।
न च स्कन्धा न चा[6]स्कन्धा न चाप्यन्यत्र संकरात् ॥८१॥
न हि यो येन भावेन कल्[7]प्यमानो न दृश्यते ।
न तं नास्त्येव[8] गन्तव्यं धर्माणामेव धर्मता ॥८२॥
अस्तित्वपूर्वकं नास्ति अस्ति नास्तित्वपूर्वकम् ।
अतो नास्ति न गन्तव्यमस्तित्वं न च[9] कल्पयेत् ॥८३॥
आत्मनैरात्म्यसंमूढाद्घो[10]षमात्रावलम्बिनः ।
अन्तद्वयनिमग्ना[11]स्ते नष्टा नाशन्ति बालिशान्[12] ॥८४॥

[1] र्हि A. C. द्धि K. [2] तास् A. C. K. [3] स्कंधां K. [4] Left out in A. द्यो K. [5] Left out in A. [6] न च A. C. [7] ल्प A. [8] तन्नेत्यव Tib. [9] च न K. [10] मबुद्धाष A. संबुद्धाद घो C. संमूढां घौ K. संमूढा घो T. [11] ग्र्गा K. [12] शात् A. K. T. शान् C.

सर्वदोषविनिर्मुक्तं यदा पश्यन्ति मन्नयम् ।
तदा सम्यक्प्रपश्यन्ति न ते दूषेन्ति नायकान् ॥८५॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः[1] पुनरपि भगवन्तमेतदवोचत् । देशयतु मे[2] भगवान्[3]देशयतु सुगतो[4] यद्देशनापाठे[5] भगवतानिरोधानुत्पादग्रहणं कृतमुक्तं च त्वया यथा तथागतस्यैतदधिवचनमनिरोधानुत्पाद इति । तत्किमयं भगवन्[6]भावो ऽनिरो[7]धानुत्पाद उत तथागतस्यैतत्पर्यायान्तरं[8] यद्भगवानेवमाह । अनिरुद्धा अनुत्पन्नाश्च[9] भगवता सर्वधर्मा देश्यन्ते सदसत्पक्षादर्शनात् । यद्यनुत्पन्नाः सर्वधर्मा इति भगवन्धर्मग्रहणं न प्राप्नोत्यजातत्वात्सर्वधर्माणाम् । अथ पर्यायान्तरमेतत्कस्यचिद्धर्मस्य तदुच्यतां भगवन् । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । न हि महामते अभावस्तथागतो न च सर्वधर्माणामनिरोधा[10]नुत्पादग्रहणं[11] न प्रत्ययो[12]ऽपेक्षितव्यो न च निरर्थकमनुत्पादग्रहणं क्रियते[13] मया ।

[1] त्त्वो महास left out in T. [2] मे left out in T. [3] व A. C. [4] त A. C. K. तो T. [5] यद् left out in A. [6] न्न A. C. K. न्ना T. [7] रु K. [8] र A. T. [9] श्च left out in T. [10] धादनु A. C. [11] णां K. [12] योपे A. यापे C. K. याधे T. [13] न्ते K.

किंतु महामते मनोमयधर्मकायस्य तथागतस्यैतदधिवचनं यत्र[1] सर्वतीर्थकर[2]श्रावकप्रत्येकबुद्ध[3]सप्तभूमिप्रतिष्ठितानां च बोधिसत्त्वानामविषयः। सो[4]ऽनुत्पादस्तथागतस्यैतन्महामते पर्यायवचनम्। तद्यथा महामते इन्द्रः शक्रः पुरंदरः हस्तः[5] करः पाणिस्तनुर्देहं[6] शरीरं पृथिवी भूमिर्वसुंधरा खमाकाशं गगनमित्येवमाद्यानां भावानामेकैकस्य भावस्य बहवः पर्यायवाचकाः शब्दा[7] भवन्ति विकल्पिता न चैषां नामबहुत्वाद्भावबहुत्वं विकल्प्यते[8] न च स्वभावो न भवति। एवं महामते अहमपि सहायां लोकधातौ त्रिभिर्नामासंख्येयशतसहस्रैर्बालानां श्रवणावभासमागच्छामि तैश्चाभिलपन्ति मां न च प्रजानन्ति तथागतस्यैते नामपर्याया इति। तत्र केचिन्महामते तथागतमिति मां संप्रजानन्ति। केचित्स्वयंभुवमिति नायकं विनायकं परिणायकं बुद्धमृषिं[9] वृषभं ब्रह्मणं[10] विष्णुमीश्वरं प्रधानं कपिलं भूतान्तमरिष्टं[11]नेमिनं सोमं भास्करं रामं व्यासं शुकमिन्द्रं बलिं वरुणमिति चैके संजानन्ति। अपरे[12]ऽनिरोधानुत्पादं शून्यतां तथतां सत्यतां[13] भूततां भूतकोटिं

[1] यत् ? [2] र्थ्यं A. C. र्थं K. T. [3] बुद्धानां ? [4] यो ? [5] In T. only. [6] हे T. [7] : शब्दा left out in T. [8] ल्पे K. [9] त्र्षिं वृष° A. C. K. त्र्षभं T. [10] ब्राह्मणं A. C. K. ब्रह्मणं T. ब्रह्माणं ? [11] नै A. C. K. ने T. [12] Left out in K. [13] Left out in A.

धर्मधातुं निर्वाणं नित्यं समतामद्वयमनिरोधमनिमित्तं[1] प्रत्ययं[2] बुद्धहेतूपदेशं विमोक्षं मार्गसत्यानि[3] सर्वज्ञं जिनं मनोमयमिति चैके संजानन्ति[4]। एवमादिभिर्महामते परिपूर्णं त्रिभिर्नामासंख्येयशतसहस्रैरनूनैरनधिकैरिहान्येषु च लोकधातुषु मां जनाः संजानन्त[5] उदकचन्द्र इवाप्रविष्टनिर्गतम्। न च बाला अवबुध्यन्ते द्वयान्तपतितया संतत्या॥

अथ च सत्कुर्वन्ति गुरुकुर्वन्ति[6] मानयन्ति पूजयन्ति च मां[7] पदार्थनिरुक्त्यकुशला अभिन्नसंज्ञा न[8] स्वनयं[9] प्रजानन्ति देशनारुतपाठाभिनिविष्टा[10] अनिरोधानुत्पादमभावं कल्पयिष्यन्ति न च तथागतनामपदपर्यायान्तरमिन्द्रशक्रपुरंदरं न स्वनयप्रत्यवस्थानपाठमधिमोक्ष्यन्ति यथारुतार्थपाठानुसारित्वात्सर्वधर्माणाम्। एवं च महामते वक्ष्यन्ति ते मोहपुरुषा यथारुत एवार्थो ऽनन्यो ऽर्थो रुतादिति। तत्कस्य हेतोर्यदुतार्थस्याशरीरत्वाद्रुतादन्यो ऽर्थो न भवति। किंतु रुतमेवार्थ इति रुतस्वभावापरिज्ञानाद्विदग्धबुद्धयः। न त्वेवं ज्ञास्यन्ति महामते यथा रुत=

[1] नित्यधर्म for मनिरोधम in T. [2] यां K. [3] सत्यां T. [4] न्ते K. नते T. [5] नंति दक A. नंति॥ दक C. नते क K. नते उक T. [6] Left out in T. [7] From मां till °ति न (before च तथा°) left out in A. [8] In T. only. [9] स्व T. [10] रि C. वि K. T.

मुत्पन्नप्रध्वंस्यर्थो ऽनुत्पन्नप्रध्वंसी । एतं महामते अक्षर=
पतितमर्थो ऽनक्षरपतितः । भावाभावविवर्जितत्वादजन्मा=
शरीरम् । न च महामते तथागता अक्षरपतितं धर्मं
देशयन्ति । अक्षराणां सदसतो ऽनुपलब्धेरन्यत्राक्षरपति=
ताशयः । पुनर्महामते यो ऽक्षरपतितं धर्मं देशयति स च[1]
प्रलपति निरक्षरत्वाद्धर्मस्य । अत एतस्मात्कारणान्महा-
मते उक्तं देशनापाठे मया[2]न्यैश्च बुद्धबोधिसत्त्वैर्यथैकमप्य=
क्षरं तथागता नोदाहरन्ति न प्र[3]त्याहरन्तीति । तत्कस्य
हेतोर्यदुतानक्षरत्वाद्धर्माणाम् । न च नार्थोपसंहितमुदा=
हरन्ति । उदाहरन्त्येव विकल्पमुपादायानुपादायान्महा-
मते सर्वधर्माणां शासनलोपः स्याच्छासनानां लोपाच्च
बुद्धप्रत्येकबुद्धश्रावकबोधिसत्त्वानामभावः स्यात्तदभावात्किं
कस्य देश्येत । अत[4] एतस्मात्कारणान्महामते बोधिसत्त्वे=
न महासत्त्वेन देशनापाठएतानभिनिविष्टेन भवितव्यम् ।
[4]स व्यभिचारी महामते देशनापाठः सत्त्वाशयप्रवृत्तत्वा=
न्नानाधिमुक्तिकानां सत्त्वानां धर्मदेशना क्रियते चित्तम=
नोमनोविज्ञानव्यावृत्त्यर्थं मयान्यैश्च तथागतैरर्हद्भिः सम्य=
क्संबुद्धैर्न स्वप्रत्यात्मार्यज्ञानाधिगमप्रत्यवस्थानात्सर्वधर्म-
निराभासस्वचित्तदृश्यमात्रावबोधाद्द्विधाविकल्पस्य[5] व्यावृ=
त्तितः । अर्थप्रतिशरणेन महामते बोधिसत्त्वेन महास=

[1] Left out in T. Tib. [2] ममा A. C. [3] व्या T. [4] Left out in T. [5] स्या T.

त्त्वेन भवितव्यं न व्यञ्जनप्रतिशरणेन[1]। व्यञ्जनानुसारी महामते कुलपुत्रो वा कुलदुहिता वा स्वात्मानं च नाशयति परार्थांश्च[2] नावबोधयति। कुदृष्टिपतितया संतत्या स्वपक्षं विभ्राम्यते[3] कुतीर्थकैः सर्वधर्मभूमिस्वलक्षणाकुशलैः पदनिरुक्त्यनभिज्ञैः॥

अथ सर्वधर्मभूमिस्वलक्षणकुशला भवन्ति पदपर्यायनिरुक्तिगतिंगता भावार्थ[4]युक्तिकुशलास्ततः स्वात्मानं च सम्यग[5]निमित्तसुखेन प्रीणयन्ति परांश्च सम्यङ्महायाने[6] प्रतिष्ठापयन्ति। महायाने च महामते सम्यक्परिगृह्यमाणे बुद्धश्रावकप्रत्येकबुद्धबोधिसत्त्वानां परिग्रहः कृतो भवति। बुद्धबोधिसत्त्वश्रावकप्रत्येकबुद्धपरिग्रहात्सर्वसत्त्वपरिग्रहः[7] कृतो भवति। सर्वसत्त्वपरिग्रहात्सद्धर्मपरिग्रहः[8] कृतो[8] भवति[8]। सद्धर्मपरिग्रहाच्च महामते बुद्धवंशस्यानुपच्छेदः[9] कृतो भवति। बुद्धवंश[10]स्यानुपच्छेदादायतनविशेषप्रतिलम्भाः प्रज्ञायन्ते। अतस्तेषु विशिष्टायतनप्रतिलम्भेषु बोधिसत्त्वा महासत्त्वा उपपत्तिं परिगृह्य महायाने प्रतिष्ठापनतया दशवशिताविचित्र[11]रूपवेशधारिणो भूत्वा

[1] Left out in K. [2] परमर्थान्परांश्च in all MSS., but Tib. [3] न्ते A. K. ते C. T. [4] र्थि T. [5] न्नि T. [6] सम्यक्संबुद्धा यान A. सम्यक महायाने C. सम्यक्सहायान K. सम्यक्सहायाने T. [7] हाः K. [8] Left out in T. [9] From दः till पच्छे (before दादा°) left out in K. [10] त्वां for वंश in T. [11] त्रा K.

सत्त्वविशेषानुशयलक्षणगतिभूता[1]स्तथात्वाय धर्मं देशय=
न्ति ॥

तच्च तथात्वमनन्यथात्वं तत्त्वमनायूहानिर्यूहलक्षणं स=
र्वप्रपञ्चोपशमं तत्त्वमित्युच्यते । ते[2]न न महामते कुलपु=
त्रेण वा कुलदुहित्रा वा यथारुतार्थाभिनिवेशकुशलेन
भवितव्यम् । निरक्षरत्वात्तत्त्वस्य । न चाङ्गुलिप्रेक्षकेन[3]
भवितव्यम् । तद्यथा महामते अङ्गुल्या कश्चित्कस्यचित्किं=
चिदादर्शयेत्स चाङ्गुल्यग्र[4]मेव प्रतिसरे[5]द्वीक्षितुम् एवमेव
महामते बालजातीया इव बालपृथग्जनवर्गा यथारुता=
ङ्गुल्यग्रा[6]भिनिवेशाभिनिविष्टा एवं[7] कालं करिष्यन्ति न
यथारुताङ्गुल्यग्रार्थं हित्वा परमार्थमागमिष्यन्ति । तद्यथा
महामते अन्नं भोज्यं बालानां च कश्चिदनभिसंस्कृतं[8] प=
रिभोक्तुम्[9] । अथ कश्चिदनभिसंस्कृतं[8] परिभुंजीत स
उन्मत्त[10] इति विकल्पेतानुपूर्वसंस्कारानवबोधादन्नस्य एव=
मेव महामते ऽनुत्पादो ऽनिरोधो नान[11]भिसंस्कृतः शोभत
अवश्यमेवात्राभिसंस्कारेण भवितव्यं न चात्मानमङ्गुल्यग्र[12]=
ग्रहणार्थदर्शनवत्[13] । अत एतेन कारणेन महामते अ=

[1] गतिंगताः T. [2] ते in T. only. [3] लिं प्रक्षकेण C. लिप्रक्षकेन T.
[4] गुग्रा A. गुल्यग्रा C. गुग्र K. तांगुल्याग्र T. [5] सरतवि A. सरेत् वि C.
तिरेत् वि K. सरेत् वी T. [6] ल्या T. [7] व T. [8] त T. [9] क्तं A. K.
क्तुं C. भुंक्त T. [10] त्सुत्त A. K. उन्मत्त C. उत्मत्त T. [11] धान A. C. K.
धो नान T. [12] ल्या A. C. K. T. [13] वाङ्गात्रमङ्गुल्यग्रार्थदर्शनवत् Tib.

र्थाभियोगः करणीयः । अर्थो महामते विविक्तो निर्वाणहेतुः । रुतं विकल्पसंबद्धं संसारावाहकम् । अर्थश्च महामते बहुश्रुतानां सकाशाल्लभ्यते । बाहुश्रुत्यं च नाम महामते यदुतार्थकौशल्यं न रुतकौशल्यम् । तत्रार्थकौशल्यं यत्सर्वतीर्थकरवादासंसृष्टं[1] दर्शनं यदा स्वयं च न पतति[2] परांश्च न पातयति । एवं सत्यर्थे महामते बाहुश्रुत्यं भवति । तस्मादर्थकामेन ते सेवनीयाः अतो विपरीता ये यथारुतार्थाभिनिविष्टास्ते वर्जनीयास्तत्त्वान्वेषिणा ॥

पुनरपरं महामतिर्बुद्धा[3]धिष्ठानाधिष्ठित एवमाह । न भगवतानिरोधानुत्पाददर्शनेन किंचिद्विशिष्यते । तत्कस्य हेतोः सर्वतीर्थकराणामपि भगवन्कारणान्यनुत्पन्नान्यनिरुद्धानि तत्रा[4]पि भगवन्नाकाशमप्रतिसंख्यानिरोधो निर्वाणधातुश्चानिरोधो[5] ऽनुत्पन्नः । तीर्थकरा अपि भगवन्कारणप्रत्ययहेतुकीं जगत[6] उत्पत्तिं वर्णयन्ति । भगवानप्यज्ञानतृष्णाकर्मविकल्पप्रत्ययेभ्यो जगत उत्पत्तिं वर्णयति । तस्यैव कारणस्य संज्ञान्तरविशेषमुत्पाद्य[7] प्रत्यया इति । एवं बाह्यैः प्रत्ययैर्बाह्यानां ते च त्वं च भावानामुत्पत्तये । अतो निर्विशिष्टो ऽयं भगवन्वादस्तीर्थकरवादेन भवति । अ[8]णुप्रधानेश्वरप्रजापतिप्रभृतयो नवद्रव्यसहिता अनिरुद्धा

[1] ष्ट A. K. [2] पतित C. [3] ते बु A. C. K. ति बु T. [4] तयां K. T.
[5] रुधो K. रुद्धो T. [6] किंच A. [7] मुपादाय ? Tib. [8] अंड A. C.

अनुत्पन्नाः तवापि भगवन्सर्वभावा अनुत्पन्नानिरुद्धाः स=
दसतो ऽनुपलब्धेः। भूताविनाशाच्च स्वलक्षणं नोत्पद्यते
न निरुध्यते यां तां गतिं[1] गत्वा[2] भूतो भूतस्वभावं न वि=
जहाति। भूतविकल्पविकारो ऽयं भगवन्सर्वतीर्थकरैर्विक=
ल्प्यते[3] त्वया च। अत एतेन कारणेनाविशिष्टो ऽयं वादः।
विशेषो वात्र वक्तव्यो येन तथागतवादो विशेष्यते न
सर्वतीर्थकरवादः[4]। अविशिष्यमाणे[5] भगवन्स्ववादे तीर्थ-
कराणामपि बुद्धप्रसङ्गः स्यादनिरोधानुत्पादहेतुत्वात्।
[6]अस्थानमनवकाशं चोक्तं[7] भगवता यदेकत्र लोकधातौ
बहवस्तथागता उत्पद्येरन्निति। प्राप्तं चैतत्तथागतबहुत्वं
सदसत्कार्यपरिग्रहाच्चाविशिष्यमाणे स्ववादे॥

भगवानाह। न मम महामते अनिरोधानुत्पादस्ती=
र्थकरानुत्पादानिरोधवादेन तुल्यो नाप्युत्पादानित्यवादे[8]=
न। तत्कस्य हेतोस्तीर्थकराणां हि महामते भावस्वभा=
वो विद्यत एवानुत्पन्नाविकारलक्षणप्राप्तः[9]। न त्वेवं मम
सदसत्पक्षपतितः। मम तु महामते सदसत्पक्ष[10]विगत उ=
त्पादभङ्गवि[11]रहितो न भावो नाभावो[12] मायास्वप्नरूपदै=

[1] यान्ताङ्गतिं K. यातां गतिं T. [2] महामते is added in K. [3] ल्प K.
[4] र्थ्य A. C. कर in T. only. [5] णो T. [6] व is added in K. [7] शश्चो K.
श चो T. [8] पादो नि A. C. K. °दानि T. नाप्यनुत्पा° ? [9] प्ताः A.
[10] पतित is added in A. C. K. [11] वि in T. only. [12]। कथं नाभावो यदुत
to be added ?

चित्र्यदर्शनवन्नाभावः । कथं न भावो यदुत रूपस्वभा=
वलक्षणग्रहणाभावाद्दृश्यादृश्यतो ग्रहणाग्रहणतः । अत
एतस्मात्कारणात्सर्वभावा न भावा नाभावाः[1] । किंतु स्व-
चित्तदृश्यमात्रावबोधाद्विकल्पस्याप्रवृत्तेः[2] स्वस्थो लोको
निष्क्रियः[3] । बालाः क्रियावन्तं[4] कल्पयन्ति न त्वार्याः । अ=
भूतार्थविकल्पार्थविभ्रम एष महामते गन्धर्वनगरमायापु=
रुषवत् । तद्यथा महामते कश्चिद्गन्धर्वनगरे[5] बालजातीयो
मायापुरुषसत्त्वसार्थवैचित्र्यं प्रविशन्तं वा निर्गच्छन्तं वा
कल्पयेत् । अमी प्रविष्टा अमी निर्गताः । न च तत्र क=
श्चित्प्रविष्टो वा निर्गतो वा । अथ यावदेव विकल्पवि=
भ्रमभाव एष तेषाम् एवमेव महामते उत्पादानुत्पाद-
विभ्रम एष बालानाम् । न चात्र कश्चित्संस्कृतो ऽसंस्कृ=
तो वा मायापुरुषोत्पत्तिवन्न च मायापुरुष उत्पद्यते वा
निरुध्यते वा भावाभावाकिंचित्करत्वात् । एवमेव सर्वध=
र्मा भङ्गोत्पादवर्जिता अन्यत्र वितथपतितया संज्ञया बा=
ला उत्पाद[6]निरोधं कल्पयन्ति न त्वार्याः । तत्र वितथ=
मिति महामते न[7] तथा यथा[7] भावस्वभावः कल्प्यते[8] ।
नाप्य[9]न्य[10]था । अन्यथा कल्प्यमाने[11] सर्वभावस्वभावाभि=

[1] वीः K. [2] त्तः T. [3] निस्क्रि A. C. K. निक्रि T. [4] कृ T.
[5] र A. [6] त्पाद left out in A. [7] Left out in A. [8] ल्पा A. K.
[9] प्य left out in T. [10] न्य left out in A. [11] ल्प A. C. K. ल्प्य T.

निवेश एव स्यान्न विविक्तदर्शना अविविक्तदर्शनाद्विकल्पस्य व्यावृत्तिरेव[1] न स्यात् । अत एतस्मात्कारणान्महामते अनिमित्तदर्शनमेव श्रेयो न निमित्तदर्शनं निमित्तं पुनर्जन्महेतुत्वादश्रेयः । अनिमित्तमिति महामते विकल्पस्याप्रवृत्तिरनुत्पादो निर्वाणमिति वदामि । तत्र निर्वाणमिति महामते यथाभूतार्थ[2]स्थानदर्शनं[3] विकल्पचित्तचैत्तकलापस्य परावृत्तिपूर्वकं[4] तथागतस्वप्रत्यात्मार्यज्ञानाधिगमं निर्वाणमिति वदामि ॥ तत्रेदमुच्यते ॥

उत्पादविनिवृत्त्यर्थमनुत्पादप्रसाधकम् ।
अहेतुवादं देशेमि न च बालैर्विभाव्यते ॥८६॥
अनुत्पन्नमिदं सर्वं न च भावा न सन्ति च ।
गन्धर्वस्वप्नमायाख्या भावा विद्यन्त्यहेतुकाः ॥८७॥
अनुत्पन्नस्वभावाश्च शून्याः केन वदाहि मे ।
समावाया[5]द्विनिर्मुक्तो बुद्ध्या भावो न गृह्यते[6] ।
तस्माच्छून्यमनुत्पन्नं निःस्वभावं वदाम्यहम् ॥८८॥
समवायस्तथैकैकं दृश्याभावान्न विद्यते ।
न तीर्थ्यदृष्ट्य[7]प्रलया[8]त्समवायो न विद्यते ॥८९॥
स्वप्नकेशोण्डुकं मायागन्धर्वं[9] मृगतृष्णि[10]का ।

[1] एव left out in Tib. [2] र्थे T. [3] न A. C. K. नं T. [4] पूर्वं T.
[5] र्या T. [6] दृश्य T. [7] ष्ट्या C. T. [8] प्रलापा C. [9] र्वे A. C. K. र्वं T. [10] ष्ण A. C. T. ष्णि K.

अहेतुकानि दृश्यन्ते तथा लोकविचित्रता ॥९०॥
निगृह्याहेतुवादेन अनुत्पादं प्रसाधयेत् ।
अनुत्पादे प्रसाध्यन्ते मम नेत्री न नश्यति ।
अहेतुवादे देश्यन्ते तीर्थ्यानां जायते भयम् ॥९१॥
कथं केन कुतः कुत्र[1] संभवो ऽहेतुको भवेत् ।[2]
नाहेतुको न हेतुभ्यो यदा पश्यन्ति संस्कृतम् ।
तदा व्यावर्त[3]ते दृष्टिर्वि[4]भङ्गोत्पादवादिनी[5] ॥९२॥
किमभावो ह्यनुत्पाद उत प्रत्ययवीक्षणम् ।
अथ भावस्य नामेदं निरर्थं वा ब्रवीहि मे[6] ॥९३॥
न चा[7]भावो ह्यनुत्पादो न च प्रत्ययवीक्षणम् ।
न च भावस्य नामेदं न च नाम निरर्थकम्[8] ॥९४॥
यत्र श्रावकप्रत्येकबुद्धानां ती[9]र्थ्यानां च अगोचरः[10] ।
[11]सप्तभूमिगतानां च तदनुत्पादलक्षणम् ॥९५॥
हेतुप्रत्ययव्यावृत्तिं कारणस्य निरोधनम् ।
चित्तमात्रव्यवस्थानमनुत्पादं वदाम्यहम् ॥९६॥
अहेतुवृत्तिर्भावानां कल्प्य[12]कल्पनवर्जितम् ।

[1] Left out in A. K. [2] 宋譯此半偈前有爾時大慧以偈問曰之八字。 [3] वृत्त T. [4] भा T. [5] 宋譯此一偈前有爾時世尊復以偈答之八字。 [6] 宋譯此一偈前有爾時大慧說偈問曰之八字。 [7] च भा A. C. K. चाभ T. From न चाभा till बुद्धानां not here in Tib. [8] 宋譯此一偈前有爾時世尊復以偈答之八字。 [9] थ्याका A. C. K. थ्या T. [10] This line may be यत्र श्रावकप्रत्येकबुद्धतीर्थ्यस्य गोचरः Tib. [11] This quarter is not here in Tib. [12] ल्पा A. C. K. ल्प्य T.

सदसत्पक्षनिर्मुक्तमनुत्पादं वदाम्यहम् ॥९७॥
चित्तं दृश्यविनिर्मुक्तं[1] स्वभावद्वयवर्जितम् ।
आश्रयस्य परावृत्तिमनुत्पादं वदाम्यहम् ॥९८॥
[2]न बाह्यभावं ना[3]भावं नापि[4] चित्तपरिग्रहः[5] ।
स्वप्नं के[6]शोण्डुकं माया गन्धर्वं मृगतृ[7]ष्णिका [8]।
सर्वदृष्टिप्रहाणं च तदनुत्पादलक्षणम् ॥९९॥
एवं शून्यास्वभावाद्यान्प[9]दान्सर्वान्विभावयेत् ।
न जातु शून्यया शून्या किंत्वनुत्पादशून्यया ॥१००॥
कलापः प्रत्ययानां च प्रवर्तते[10] निवर्तते[11] ।
कलापाच्च पृथग्भूतं न जातं[12] न निरुध्यते ॥१०१॥
भावो न विद्यते ऽन्यो[13]न्यः कलापाच्च पृथक्क्वचित् ।
एकत्वेन पृथक्त्वेन यथा तीर्थ्यै[14]र्विकल्प्यते ॥१०२॥
असन्न जायते भावो नासन्न सदसत्क्वचित् ।
अन्यच्च हि कलापो ऽयं प्रवर्तते[15] निवर्तते ॥१०३॥
संकेतमात्रमेवेदमन्योन्यापेक्षसंकला[16] ।

[1] The whole of ll. 10–11, and 1st quarter of ll. 12 & 13, in p. 201 above are put in here in Tib. [2] न बाह्यभावस्याभावः ? [3] वंन्ना A. वं ना C. T. वान्ना K. [4] अपि left out in T. [5] हं T. [6] मका K. [7] ष्ण K. [8] This line left out in T. (唐) Tib. [9] न्पदा left out in A. [10] ति K. [11] वि A. [12] त without न in T. [13] न्या K. [14] थ्यवि A. र्थ्यैर्वि K. र्थ्यैवि T. [15] ति T. [16] संकला is Buddhist Sanskṛt for शृङ्खला 鉤鏁 (宋) (魏) 鉤鎖 (唐)

जन्यमर्थं न चैवास्ति पृथक्प्रत्ययसं[1]कलात्[2] ॥१०४॥
जन्याभावादनुत्पादं तीर्थ्यदोषविवर्जितम् ।
देशेमि संकलामात्रं न च बालैर्विभाव्यते ॥१०५॥
यस्य जन्यो भवेद्भावः[3] संकलायाः पृथक्क्वचित् ।
अहेतुवादी विज्ञेयः[4] संकलाया[5] विनाशकः ॥१०६॥
प्रदीपो द्र[6]व्यजातीनां व्यञ्जकः संकला भवेत् ।
यस्य भावो भवेत्कश्चिच्छङ्क[7]लायाः पृथक्क्वचित् ॥१०७॥
अस्वभावा ह्यनुत्पन्नाः प्रकृत्या गगनोपमाः ।
संकलायाः पृथग्भूता ये धर्माः कल्पिताबुधैः ॥१०८॥
अयमन्य[8]मनुत्पादमार्याणां प्राप्तिधर्मता ।
यस्य जातिमनुत्पादं तदनुत्पादे[9] क्षान्तिः स्यात् ॥१०९॥
यदा सर्वमिमं लोकं संकलामेव पश्यति ।
संकलामात्रमेवेदं तदा चित्तं समाध्यते ॥११०॥
अज्ञानतृष्णाकर्मादिः संकलाध्यात्मिको भवेत् ।
खेजमृद्भा[10]ण्डचक्रादि वीजभूतादि बाहिरम्[11] ॥१११॥
परतो यस्य वै भावः प्रत्ययैर्जायते क्वचित् ।
न[12] संकलामात्रमेवेदं न ते युक्त्यागमे स्थिताः ॥११२॥

[1] शं T. [2] तु T. [3] यन्योभवेभावः A. जन्याद्भवेद्भावः C. [4] यं T.
[5] यो T. [9] उच्यत्य A. द्रव्यत्य K. [7] Here all MSS. read शङ्कल not संकला
[8] न्यम in T. only. [9] तु is added in T. [10] खेज (空中生=樹) मृद् (泥團)
भाण्ड (器) मन्यमृत्पिण्ड (魏) काष्ठाब्मृत्पिण्ड Tib. ? [11] बाहिरम् (唐) Tib.
renders 'out' [12] Left out in A.

यदि जन्यो न भावो ऽस्ति स्याद्बुद्धिः कस्य प्रत्ययात्[1] ।
अन्योन्यजनका ह्येते तेनैते प्रत्ययाः स्मृताः ॥११३॥
उष्णद्रवचलकठिना[2] धर्मा बालैर्विकल्पिताः ।
कलापो ऽयं न धर्मो ऽस्ति अतो वै निःस्वभावता ॥११४॥
वैद्या यथातुरवशात्क्रियाभेदं प्रकुर्वते ।
न तु शास्त्रस्य भेदो ऽस्ति दोषभेदात्तु भिद्यते ॥११५॥
तथाहं सत्त्वसंतानं क्लेशदोषैः सदूषितैः[3] ।
इन्द्रियाणां बलं ज्ञात्वा नयं देशे[4]मि प्राणिनाम् ॥११६॥
न क्लेशेन्द्रियभेदेन शासनं भिद्यते मम ।
एकमेव भवेद्यानं मार्गमष्टा[5]ङ्गिकं शिवम् ॥११७॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि[6] भ= गवन्तमेतदवोचत् । अनित्यतानित्यतेति भगवन्सर्वतीर्थ[7]= करैर्विकल्प्यते । त्वया च सर्वदेशनापाठे देश्यत अनित्या वत[8] संस्कारा उत्पादव्ययधर्मिण इति । तत्किमयं भगवं= स्तथ्या मिथ्येति । कतिप्रकारा भगवन्ननित्यता । भगवा= नाह । अष्टप्रकारा हि महामते सर्वतीर्थ[9]करैरनित्यता क= ल्प्यते न तु मया । कतमाष्टप्रकारा । तत्र केचित्ताव[10]न्म=

[1] याः K. [2] चलद्रवोष्णकठिना ? [3] °दोषैर्विदूषितं ? Tib. [4] शा C. K. [5] मार्याष्टां T. [6] Left out in C. [7] र्थि A. र्थ्यं C. र्थै K. T. [8] अनिस्याल चत A. अनित्यालचत K. [9] र्थ्यं C. [10] त्ताव left out in T.

हामते आहुः। प्रारम्भविनिवृत्तिरनित्यतेति प्रारम्भो[1] नाम महामते उत्पादो ऽनुत्पादो ऽनित्यता। अन्ये संस्थान=विनिवृत्तिमनित्यतां वर्णयन्ति। अन्ये रूपमेवानित्यमि=ति। अन्ये रूपस्य विकारान्तरमनित्यतां नैरन्तर्यप्रबन्धेन स्वरसभङ्गभेदं सर्वधर्माणां क्षीरदधिपरिणामविकारान्तर=वद्दृष्टनष्टा[2] सर्वभावेषु प्रवर्तते न[3] नित्यतेति। अन्ये पुन=र्भावमनित्यतां कल्पयन्ति। अन्ये भावाभावमनित्यतां क=ल्पयन्ति। अन्ये ऽनुत्पादानित्यतां सर्वधर्माणामनित्यता=याश्च तदन्तर्गतत्वात्। तत्र महामते भावाभावानित्यता नाम यदुत भूत[4]भौतिकस्वलक्षणविनाशानुपलब्धिरप्रवृ=त्तिभूतस्वभावस्य। तत्रानुत्पादानित्यता नाम यदुत नि=त्यम[6]नित्यं सदसतोरप्रवृत्तिः सर्वधर्माणामदर्शनं[7] परमाणु[8]प्र=विचयात्[9]। अदर्शनमनुत्पादस्यैतदधिवचनं नोत्पादस्य। एतद्धि महामते अनुत्पादानित्यताया लक्षणं यस्यानव-बोधात्सर्वतीर्थकरा[10] उत्पादानित्यतावादे[11] प्रपतन्ति॥

पुनरपरं महामते यस्य भावो नित्यता तस्य स्वमति=विकल्पे नैव नित्यता नानित्यता[12] भावः[13]। तत्कस्य हेतो=

[1] भो left out in A. K. [2] ष्टा A. K. [3] Left out in T. [4] भूति C. भूत T., but left out in A. K. [5] ता T. [6] यदुत नित्यम left out in T. [7] नामा A. K. न T. [8] गड C. [9] यत् A. [10] र T. [11] द without वा in A. K. [12] Left out in T. [13] वा A. K. वस् C. T.

यदुत स्वयम[1]विनाशित्वादनित्यतायाः । इह महामते सर्वभावानामभावो ऽनित्यतायाः कार्यं न चानित्यतानामन्तरेण सर्वभावाभाव उपलभ्यते दण्डशिलामुद्गरा[2]न्यतरभेद्यभेदकवत् । अन्योन्याविशेषदर्शनं दृष्टमतो ऽनित्यता कारणं सर्वभावाभावः कार्यं न च कार्यकारणयोर्विशेषो ऽस्ति इयमनित्यतेदं कार्यमिति [3]अविशेषात्कार्यकारणयोर्नित्याः सर्वभावा अहेतुकत्वाद्भावस्य । सर्वभावाभावो हि महामते [4]अहेतुकः । न च बालपृथग्जना अवबुध्यन्ते । न च कारणं विसदृशं कार्यं जनयति । अथ जनयेत्तेषामनित्यता[5] सर्वभावानां विसदृशं कार्यं स्यात्कार्यकारणविभागो न स्यात् । दृष्टश्च कार्यकारणविभागस्तेषां । यदि वानित्यताभावः स्यात्क्रियाहेतुभावलक्षणपतितश्च स्यादेकभावेन वा परिसमाप्तः स्यात्सर्वभावेषु । क्रियाहेतुभावलक्षणपतितत्वाच्च स्वयमेवानित्यतानित्या[6] स्यादनित्यत्वादयाः[7] सर्वभावा नित्याः स्युर्नित्या एव भवेयुः ॥

अथ सर्वभावान्तर्गतानित्यता तेन त्र्य[8]ध्वपतिता स्यात् । तत्र यदतीतं रूपं तत्तेन सह विनष्टमनागतमपि नोत्पन्नं रूपानुत्पत्तितया वर्तमानेनापि रूपेण सहाभिन्नलक्षणम् ।

[1] मेव A. [2] ला A. C. K. रा T. [3] अ in T. only. [4] अ to be left out ?
[5] ताः A. K. [6] नित्यता नित्या K. [7] नित्यत्वानित्यतया ? [8] र्थ A. C. K. ध्व T.

रूपं च भूतानां संनिवेश[1]विशेषो भूतानां भौतिकस्वभावो न विनश्यते अन्या[2]नन्यविवर्जितत्वात् सर्वतीर्थकराणामविनाशात्सर्वभूतानां सर्वं त्रिभवं भूतभौतिकं यत्रोत्पादस्थितिविकारः प्रज्ञप्यते। किमन्यदनित्यं भूतभौतिकविनिर्मुक्तं यस्यानित्यता कल्प्यते तीर्थ[3]करैर्भूतानि च न प्रवर्तन्ते न निवर्तन्ते स्वभावलक्षणाभिनिवेशात् ॥

तत्र प्रारम्भविनिवृत्तिर्नामानित्यता न पुनर्भूतानि भूता[4]न्तरमारभन्ते[5] परस्परविलक्षणस्वलक्ष[6]णान्न विशेषः प्रारभ्य[7]ते। तदविशेषात्तेषामपुनरारम्भाद्विधायोगादनारम्भस्यानित्यता बुद्धयो भवन्ति ॥

तत्र संस्थानविनिवृत्तिर्नामानित्यता यदुत न[8] भूतभौतिकं विनश्यत्या प्रलयात्। प्रलयो नाम महामते आ[9] परमाणो[10]ः प्रविचयपरीक्षा विनाशो भूतभौतिकस्य संस्थानस्यान्यथा भूतदर्शनाद्दीर्घह्रस्वानुलब्धिर्न परमाणु[11]भूतेषु विनाशाद्भूतानां संस्था[12]नविनिवृत्तिदर्शनात्सांख्यवादे प्रपतन्ति ॥

तत्र संस्थानानित्यता नाम यदुत य[13]स्य रूपमेवानित्यं

[1] शः in all MSS. [2] न्यो K. [3] र्थ्य C. [4] निभूता left out in A.
[5] रंभते A. C. K. रभन्ते T. [6] णश्चालक्ष C. णस्वालक्ष T., but left out in A. K. [7] रंभ्य A. C. K. रभ्य T. [8] Left out in A. [9] स्र T.
[10] णड A. C. K. णु T. णोः Tib. [11] णड A. C. णु K. T. [12] ना T.
[13] य left out in A. K.

तस्य संस्थानस्यानित्यता न भूतानाम् । अथ भूताना=मनित्यता स्याल्लोकसंव्यवहाराभावः[1] स्याल्लोकसंव्यवहारा=भावाल्लोकायतिकदृष्टिपतितः स्याद्वाग्मात्रत्वात्सर्वभावानां न पुनः स्वलक्षणोत्पत्तिदर्शनात् ॥

तत्र विकारानित्यता नाम यदुत रूपस्यान्यथा[2]भूतदर्शनं न[3] भूतानां सुवर्णसंस्थानभूषणविकारदर्शनवत् । न सु=वर्ण[4]भावाद्विनश्यति किंतु भूषणसंस्थानविनाशो भवति ॥

ये चान्ये विकारपतिता एवमाद्यादिभिः प्रकारैस्तीर्थक=रैरनित्यतादृष्टिर्विकल्प्यते । भूतानि हि दह्यमानान्यग्निना स्वलक्षणत्वान्न दह्यन्ते ऽन्योन्यतः स्वलक्षणविगमान्महा-भूतभौतिकभावोच्छेदः स्यात् ॥

मम तु महामते न नित्या नानित्या[5] । तत्कस्य हेतो=र्यदुत बाह्यभावानभ्युपगमात्त्रिभवचित्तमात्रोपदेशाद्विचि=[6]त्रलक्षणानुप[7]देशान्न प्र[8]वर्तते न निवर्तते महाभूतसंनिवेश=विशेषो न भूतभौतिकत्वा[9]द्विकल्पस्य द्विधा प्रवर्तते ग्रा=ह्यग्राहकालक्षणाता विकल्पस्य प्रवृत्तिद्वयपरिज्ञानाद्बाह्य-भावाभावदृष्टिविगमात्स्वचित्तमात्रावबोधाद्विकल्पो वि=

[1] From वः till भा (before वाल्लो°) left out in C. [2] थी T. [3] Before or after सुवर्णः ought to be. [4] र्णा K. सुवर्ण is repeated in T. [5] त्या A. त्यास् C. K. त्याः T. [6] त्यु in all MSS. [7] नप्र A. K. नप C. नुप T. [8] प्र left out in A. K. [9] त्वाद seems to be left out in Tib.

कल्पाभिसंस्कारेण प्रवर्तते नानभिसंस्कुर्वतः[1] । चित्तविकल्पभावाभावविगमाल्लौकिकलोकोत्तरतमानां सर्वधर्माणां न नित्यता नानित्यता स्वचित्तदृश्यमात्रानवबोधात्कुदृष्ट्यान्तद्वयपतितया संतत्या सर्वतीर्थकरैः स्वविकल्पानवबोधात्कथा पुरुषैरसिद्धपूर्वैरनित्यता कल्प्यते । त्रिविधं च[2] महामते सर्वतीर्थकरलौकिकलोकोत्तरतमानां सर्वधर्माणां लक्षणं[3] वाग्विकल्पविनिःसृतानां[4] न च बालपृथग्जना अवबुध्यन्ते ॥ तत्रेदमुच्यते ॥

प्रारम्भविनिवृत्तिं च संस्थानस्यान्यथात्वतां ।
भावमनित्यतां रूपं तीर्थ्याः[5] कल्[6]पेन्ति मोहिताः ॥११८॥
भावानां नास्ति वैनाशं भूता भूतात्मना स्थिताः ।
नानादृष्टिनिमग्नास्ते तीर्थ्याः[7] क[8]ल्पेन्ति नित्यताम् ॥११९॥
कस्यचिन्न हि तीर्थ्[9]यस्य विनाशो न च संभवः ।
भूता भूतात्मना नित्याः कस्य कल्पे[10]न्त्यनित्यताम् ॥१२०॥
चित्तमात्रमिदं सर्वं द्विधा चित्तं प्रवर्तते ।
ग्राह्यग्राहकभावेन आत्मात्मीयं न विद्यते ॥१२१॥
ब्रह्मादिस्थानपर्यन्तं चित्तमात्रं व[11]दाम्यहम् ।

[1] त A. C. K. तः T. [2] तृविधश्च A. K. त्रिविधश्च C. त्रिविधं च T.
[3] ण A. K. णं C. T. [4] सृत्यमां A. K. सृत्यंतां C. सृतानां T. [5] र्थ्यः T.
[6] ल्प C. [7] स्तीर्थ्य T. [8] ल्प A. C. [9] र्थ A. C. K. र्थ्य T.
[10] ल्पेत्स्यि A. ल्पंत्य C. ल्पेत्यि K. ल्पेंत्य T. [11] व left out in A. K.

चित्तमात्रविनिर्मुक्तं ब्रह्मादिर्नोपलभ्यते[1] [2] ॥१२२॥

इति[3] लङ्कावतारे महायानसूत्रे ऽनित्यतापरिवर्तस्तृतीयः ॥

[1] ना A. नों C. K. [2] ति is added in A. इति id. in C. K. [3] In C. only.

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत्। देशयतु मे भगवान्सर्वबोधिसत्त्वश्रावकप्रत्येकबुद्धनिरोधक्रमानुसंधिलक्षणकौशल्यं येन क्रमानुसंधिलक्षणकौशल्येनाहं चान्ये च बोधिसत्त्वा महासत्त्वा निरोधसुखसमापत्तिमुखेन न प्रतिमुह्येम न च श्रावकप्रत्येकबुद्धतीर्थ्य[1]करव्यामोहे प्रपतेम। भगवानाह। तेन महामते शृणु साधु च सुष्ठु च मनसिकुरु। भाषिष्ये ऽहं ते। साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत्॥

भगवांस्तस्यैतदवोचत्। षष्ठीं महामते भूमिमुपादाय बोधिसत्त्वा महासत्त्वाः सर्वश्रावकप्रत्येकबुद्धाश्च निरोधं समापद्यन्ते। सप्तम्यां[2] भूमौ पुनश्चित्तक्षणे चित्तक्षणे बोधिसत्त्वा महासत्त्वाः सर्वभावस्वभावलक्षणव्युदासात्समापद्यन्ते। न तु श्रावकप्रत्येकबुद्धाः। तेषां हि श्रावकप्रत्येकबुद्धानामाभिसंस्कारिकी ग्राह्यग्राहकलक्षणपतिता च निरोधसमापत्तिः। अतस्ते सप्तम्यां भूमौ चित्तक्षणे चित्तक्षणे[3] समापद्यन्ते। मा सर्वधर्माणामविशेषलक्षणप्राप्तिः

[1] र्थ ? [2] समाप्तभूम्यां A. [3] न is added in Chin.

स्यादिति विचित्रलक्षणाभावश्च । कुशलाकुशलस्वभाव[1]लक्षणानवबोधात्सर्वधर्माणां समापत्तिर्भवति । अतः सप्तम्यां भूमौ चित्तक्षणे चित्तक्षणे समापत्तिकौशल्यं नास्ति येन समापद्येरन् ॥

अष्टम्यां महामते भूमौ बोधिसत्त्वानां महासत्त्वानां श्रावकप्रत्येकबुद्धानां च चित्तमनोमनोवि[2]ज्ञानविकल्पसंज्ञाव्यावृत्तिर्भवति । प्रथमषष्ठ्यां[3] भूमौ चित्तमनोमनोविज्ञानमात्रं त्रैधातुकं समनुपश्यति । आत्मात्मीयविगतं स्वचित्त[4]विकल्पोद्भवं न च बाह्यभावलक्षणवैचित्र्यपतितमन्यत्र[5] स्वचित्तमेव । द्विधा बालानां ग्राह्यग्राहकभावेन परिणाम्य स्वज्ञानां[6] न चावबोध्यन्त अनादिकालदौष्ठुल्यविकल्पप्रपञ्चवासनावासिताः ॥

अष्टम्यां महामते निर्वाणं श्रावकप्रत्येकबुद्धबोधिसत्त्वानां बोधि[7]सत्त्वाश्च समाधिबुद्धैर्विधार्यन्ते तस्मात्समाधिसुखात् ये[8]न न परिनिर्वान्ति । अपरिपूर्णत्वात्तथागतभूमेः सर्व[9]कार्यप्रति[10]प्रस्र[11]म्भणं च स्याद्यदि न संधारये[12]त्तथागतकुलवंशोच्छेदश्च स्यादचिन्त्यबुद्धमाहात्म्यं च[13] देशयन्ति ते

[1] भाव left out in A. Tib. [2] From ज्ञान° till नोवि (before ज्ञानमात्रं) left out in C. [3] प्रथम्यां षष्ठ्यां च Tib. [4] चित्त left out in C. Tib. [5] From न्यत्र till °सिताः agrees with (唐), but (魏) Tib. do not. [6] नं ? [7] नां बोधि left out in A. नां id. in K. [8] यैं C. [9] वै A. K. त्व C. त्त्व Tib. [10] प्र left out in K. [11] भे A. K. [12] संधायत् A. K. संधारयेत् C. [13] Left out in K.

बुद्धा भगवन्तः । अतो न परिनिर्वान्ति । श्रावकप्रत्येकबुद्धास्तु समाधिसु[1]खेनापह्रियन्ते । अतस्तेषां तत्र परिनिर्वाणबुद्धिर्भवति ॥

सप्तसु महामते भूमिषु चित्तमनोमनोविज्ञानलक्षणपरिचयकौशल्यात्मा[2]त्मीयग्राह्य[3]ग्राहकधर्मपुद्गलनैरात्म्यप्रवृत्तिनिवृत्तिस्वसामान्यलक्षणपरिचयच[4]तुःप्रतिसंविद्विनिश्चयकौशल्यवशितास्वादसुखभूमिक्रमानुप्रवेशबोधिपाक्षिकधर्मविभागः क्रियते मया । मा बोधिसत्त्वा महासत्त्वाः स्वसामान्यलक्षणानवबोधाद्भूमिक्रमा[5]नुसंध्यकुशलास्तीर्थकरकुदृष्टिमार्गे प्रपतेयुरित्यतो भूमिक्रमव्यवस्था क्रियते । न तु महामते ऽत्र कश्चित्प्रवर्तते वा निवर्तते वा[6]न्यत्र स्वचित्तदृश्यमात्रमिदं यदुत भूमिक्रमानुसंधिस्त्रैधातुकविचित्रोपचारश्च । न च बाला अवबुध्यन्ते ऽनवबोधाद्बालानां भूमिक्रमानुसंधिव्यप[7]देशं त्रैधतुकविचित्रोपचारश्च व्यवस्थाप्यते बुद्धधर्मा[8]लया[9] च ॥

पुनरपरं महामते श्रावकप्रत्येकबुद्धा अष्टम्यां बोधिसत्त्वभूमौ निरोधसमापत्तिसुखमदमत्ताः स्वचित्तदृश्यमात्राकुशलाः स्वसामन्यलक्षणावरणवासनापुद्गलधर्मनैरात्म्य-

[1] मु in all MSS., but Tib. [2] त्मा left out in A. [3] ग्राह्य left out in Tib. [4] याच्च in all MSS. [5] मो A. C. K. [6] निवर्तते वा left out in C. [7] देश is added in A. K. [8] मै A. [9] तैर्बुद्धैर्मया Tib.

ग्राहकदृष्टिपतिता[1] विकल्पनिर्वाणमतिबुद्धयो भवन्ति न विविक्तधर्ममतिबुद्धयः । बोधिसत्त्वाः पुनर्महामते निरोधसमाधिसुखमुखं दृष्ट्वा पूर्वप्रणिधानकृपाकरुणोपेता निष्पदगतिविभागज्ञा न परिनिर्वान्ति परिनिर्वृताश्च ते विकल्पस्याप्रवृत्तत्वात् । ग्राह्यग्राहकविकल्पस्तेषां विनिवृत्तः स्वचित्तदृश्यमात्रावबोधात्सर्वधर्माणां विकल्पो न प्रवर्तते । चित्तमनोमनोविज्ञानबाह्यभावस्वभावलक्षणा[2]भिनिवेशं विकल्पयति । तेन पुनर्बुद्धधर्महेतुर्न प्रवर्तते ज्ञानपूर्वकः प्रवर्तते[3] तथागतस्वप्रत्यात्मभूम्य[4]धिगमनतया स्वप्नपुरुषौघो[5]त्तरणवत् ॥

तद्यथा पुनर्महामते कश्चिच्छयितः स्वप्नान्तरे महाव्यायामौत्सुक्येन महौघादात्मानमुत्तारयेत्स चानुत्तीर्ण एव प्रतिबुध्येत प्रतिबुद्धश्च सन्नेवमुपपरीक्ष्येत किमिदं सत्यमुत मिथ्येति । स एवं समनुपश्येन्नेदं सत्यं न मिथ्यान्यत्र दृष्टश्रुतमतविज्ञातानुभूतविकल्पवासनाविचित्ररूपसंस्थानानादिकालविकल्पपतिता नास्त्यस्तिदृष्टिविकल्पपरिवर्जिता मनोविज्ञानानुभूताः स्वप्ने दृश्यन्ते एवमेव महामते बोधिसत्त्वा महासत्त्वा अष्टम्यां बोधिसत्त्वभूमौ

[1] त्ति is added in K. [2] भिनिवेशविकल्परहिता न पुनर्बुद्धधर्महेतोर्न प्रवर्तन्ते Tib. [3] काः प्रवर्तन्ते ? [4] प्रत्यात्म्येनाधि Tib. [5] षो is added in K.

विकल्पस्याप्रवृत्तिं[1] दृष्ट्वा प्रथमसप्तमीभूमिसंचारात्सर्वधर्मा=[2]
भिसमयान्मायादिधर्मसमतया सर्वधर्मौत्सुक्यग्राह्यग्राहक=
विकल्पोपरतं चित्तचैतसिकविकल्पप्रसरं दृष्ट्वा बुद्धधर्मेषु
प्रयुज्यन्ते । अनधिगतानामधिगमाय प्रयोग एष महामते
निर्वाणं बोधिसत्त्वानां न विनाशश्चित्तमनोमनोविज्ञान-
विकल्पसंज्ञाविगमाच्चानुत्पत्तिकधर्मक्षान्तिप्रतिलम्भो[3] भव=
ति । न चात्र महामते परमार्थे क्रमो[4] न[4] क्रमानुसंधिर्नि=
राभासविकल्पविविक्तधर्मोपदेशात् ॥ तत्रेदमुच्यते ॥

चित्तमात्रे निराभासे विहारा बुद्धभूमि च ।
एतद्धि भाषितं बुद्धैर्भाषन्ते भाषयन्ति च ॥१॥
चित्तं हि भूमयः सप्त निराभासा त्विहाष्टमी ।
द्वे[5] हि भूमी विहारोऽत्र शेषा भूमिर्ममात्मिका[6] ॥२॥
प्रत्यात्मवेद्या शुद्धा च भूमिरेषा ममात्मिका ।
माहेश्वरं परं स्थानमकनिष्ठो[7] विराजते ॥३॥
हुताशनस्य[8] हि यथा निश्चेरुस्तस्य रश्मयः ।
चित्रा मनोहराः सौम्यास्त्रिभवं[9] निर्मिणन्ति ते ॥४॥
निर्माय त्रिभवं[10] किंचित्किंचिद्वै[11] पूर्वनिर्मितम् ।
तत्र देशेमि यानानि एषा भूमिर्ममात्मिका ॥५॥

[1] ल्प left out in K. [2] मि left out in K. [3] वि left out in K. [4] Left out in A. K. [5] हे A. K. [6] काः A. K. [7] न left out in A. [8] स A. K. हुताशन 盛火(宋) 火焰(魏) 火聚(唐) [9] स्तृ A. K. [10] तृ A. K. [11] चि left out in C.

दशमी तु भवेत्प्रथमा[1] प्रथमा चाष्टमी भवेत् ।
नवमी सप्तमी चापि[2] सप्तमी चाष्टमी भवेत् ॥ ६ ॥
द्वितीया च तृतीया स्याच्चतुर्थी[3] पञ्चमी भवेत् ।
तृतीया च भवेत्षष्ठी निराभासे क्रमः कुतः ॥ ७ ॥
अभिसमयपरिवर्तश्चतुर्थः ॥

[1] सप्तमी । is added in A. K. The 2nd प्रथमा left out in C. where सप्तमी is preserved. भवेदग्र्या ? [2] पि left out in A. K. [3] र्थां A.

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत् । किं भगवंस्तथागतो ऽर्हन्सम्यक्सं=बुद्धो नित्य उताहो[1] ऽनित्यः । भगवानाह । न महामते तथागतो नित्यो नानित्यः । तत्कस्य हेतोर्यदुतोभयदोषप्रसङ्गात्[2] । उभयथा हि महामते दोषप्रसङ्गः स्यात् । नित्ये सति [3]कारणप्रसङ्गः स्यात् । नित्यानि हि महामते सर्वतीर्थकराणां कारणान्यकृतकानि च । अतो न नित्य=स्तथागतो ऽकृतकनित्यत्वात् । अनित्ये सति कृतकप्रसङ्गः स्यात् । स्कन्धलक्ष्यलक्षणाभावात्स्कन्धविनाशादुच्छेदः स्या=न्न चोच्छेदो भवति तथागतः । सर्वं हि महामते कृत=[4]कमनित्यं घटपटतृणकाष्ठेष्टकादिसर्वानित्यत्वप्रसङ्गात् । स=र्वज्ञज्ञानसंभारवैयर्थ्यं भवेत्कृतकत्वात् । सर्वं हि कृतकं त=थागतः स्याद्विशेषहेत्वभावात् । अत एतस्मात्कारणान्म=हामते न नित्यो नानित्यस्तथागतः । पुनरपि महामते न नित्यस्तथागतः कस्मादाकाशसंभारवैयर्थ्यप्रसङ्गात् । तद्य=था महामते आकाशं न नित्यं नानित्यं नित्यानित्यव्यु=

[1] उतो A. K. [2] संगा in all MSS. सङ्गात् Tib. [3] From कारण° till अनित्ये सति in C. only. [4] क left out in C.

दासादेकत्वान्यत्वोभयत्वानुभयत्वनित्यानित्यत्वदोषैरवचनीयः । पुनरपरं महामते शशहयखरोष्ट्रमण्डूकसर्पमक्षिकामीनविषाणतुल्यः स्यादनुत्पादनित्यत्वात् । अतो ऽनुत्पादनित्यत्वप्रसङ्गान्न नित्यस्तथागतः ॥

पुनरपरं महामते अस्त्यसौ पर्यायो येन नित्यस्तथागतः । तत्कस्य हेतोर्यदुताभिसमयाधिगमज्ञाननित्यत्वान्नित्यस्तथागतः । अभिसमयाधिगमज्ञानं हि महामते नित्यं तथागतानामर्हतां सम्यक्संबुद्धानाम् । उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषा[1] [2] धर्मता धर्मनियामता धर्मस्थितिता सर्वश्रावकप्रत्येकबुद्धतीर्थकराभिसमयेषु न तु गगने धर्मस्थितिर्भवति । न च बालपृथग्जना अवबुध्यन्ते । अधिगमज्ञानं च महामते तथागतानां प्रज्ञाज्ञानप्रभावितं न महामते तथागता अर्हन्तः सम्यक्संबुद्धाश्चित्तमनोमनोविज्ञानस्कन्धधात्वायतनाविद्यावासनाप्रभाविताः । सर्वं हि महामते [3]त्रिभवमभूतविकल्पप्रभवं न च तथागता अभूतविकल्पप्रभवाः । द्वये हि सति महामते नित्यता चानित्यता च भवति । नाद्वयात् । द्वयं[4] हि महामते विविक्तमद्वयानुत्पादलक्षणात्[5]सर्वधर्माणाम् । अत एतस्मात्कारणान्महामते तथागता अर्हन्तः सम्यक्संबुद्धा न नित्या नानित्याः । यावन्महामते वाग्विकल्पः प्रवर्तते

[1] वै left out in A. [2] धा K. [3] तृ. K. [4] य K. [5] णत्वात् K.

तावन्नित्यानित्यदोषः प्रसज्यते । विकल्पबुद्धिक्षयान्महामते नित्यानित्यग्राहो निवार्यते बालानां न तु विविक्तदृष्टि[1]बुद्धिक्षयात् । तत्रेदमुच्यते ॥

नित्यानित्यविनिर्मुक्तान्नित्यानित्यप्रभावितान् ।
ये पश्यन्ति सदा बुद्धान्न ते दृष्टिवशं गताः ॥१॥
समुदागमवैयर्थ्यं[2] नित्यानित्ये प्रसज्यते[3] ।
विकल्पबुद्धिवैकल्यान्नित्यानित्यं निवार्यते ॥२॥
यावत्प्रतिज्ञा क्रियते तावत्सर्वं ससंकरम् ।
स्वचित्तमात्रं संपश्यन्न विवादं समारभेत्[4] ॥३॥

इति तथागतनित्यानित्यत्वप्रसङ्ग[5]परिवर्तः पञ्चमः ॥

[1] दृष्टि left out in K. [2] वैपश्यं A. [3] ह्य A. [4] दिति K.
[5] संगः A. C. संग K.

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमध्येषते स्म । देशयतु मे भगवान्[1] देशयतु मे सुगतः[2] स्कन्धधात्वायतनानां प्रवृत्तिनिवृत्तिम् । असत्यात्मनि कस्य प्रवृत्तिर्वा निवृत्तिर्वा बालाश्च[3] प्रवृत्तिनिवृत्त्याश्रिता दुःखक्षयानवबोधान्निर्वाणं न प्रजानन्ति । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । तथागतगर्भो महामते कुशलाकुशल[4]हेतुकः सर्वजन्मगतिकर्ता । प्रवर्तते नटवद्गतिसंकट आत्मात्मीयवर्जितस्तदनवबोधात्त्रिसङ्गतिप्रत्ययक्रियायोगः प्रवर्तते । न च तीर्थ्या अवबुध्यन्ते कारणाभिनिवेशाभिनि[5]विष्टाः । अनादिकालविविधप्रपञ्चदौष्ठुल्यवासनावासित आलयविज्ञानसंशब्दितो ऽविद्यावासनभूमिजैः सप्तभिर्विज्ञानैः सह महोदधितरङ्गवन्नित्यमव्युच्छिन्नशरीरः प्रवर्तते अनित्यतादोषरहित [6]आत्मवादवि=

[1] व A. C. वा K. [2] त in all MSS. [3] In K. only. [4] अकुशल left out in A. [5] कारणाभिनिभिणो ऽतिनि K. [6] प्रवर्तते is added in K.

निवृत्तो ऽत्यन्तप्रकृतिपरिशुद्धिः । तदन्यानि विज्ञानान्युत्पन्नापवर्गाणि मनोमनोविज्ञानप्रभृतीनि[1] क्षणिकानि सप्ताप्यभूतपरिकल्पहेतुजनितसंस्थानाकृतिविशेषसमवायावलम्बीनि नामनिमित्ताभिनिविष्टानि स्वचित्तदृश्यरूपलक्षणावबोधकानि सुखदुःखाप्रतिसंवेदकान्यमोक्षकारणानि नामनिमित्तपर्युत्थानरागजनितजनकतद्धेत्वालम्बानि । तेषां चोपात्तानामिन्द्रियाख्यानां परिक्षयनिरोधे समनन्तरानुत्पत्तेरन्येषां स्वमतिविकल्पसुखदुःखाप्रतिसंवेदिनां संज्ञावेदितनिरोधसमापत्तिसमापन्नानां चतुर्ध्यानसत्यविमोक्षकुशलानां योगिनां विमोक्षबुद्धिर्भवत्यप्रवृत्तेः ॥

अपरावृत्ते च[3] तथागतगर्भशब्दसंशब्दित आलयविज्ञाने नास्ति सप्तानां प्रवृत्तिविज्ञानानां निरोधः । तत्कस्य हेतोस्तद्धेत्वालम्बनप्रवृत्तत्वाद्विज्ञानानामविषयत्वाच्च सर्वश्रावकप्रत्येकबुद्धतीर्थ्ययोगयोगिनां स्वपुद्गलनैरात्म्यावबोधात्स्वसामान्यलक्षणपरिग्रहात्स्कन्धधात्वायतनानां प्रवर्तते तथागतगर्भः पञ्चधर्मस्वभावधर्मनैरात्म्यदर्शनान्निवर्तते भूमिक्रमानुसंधिपरावृत्त्या नान्यतीर्थ्यमार्गदृष्टिभि[4]र्विचारयितुं शक्यते । ततो ऽचलायां भूमौ बोधिसत्त्वभूमौ प्रतिष्ठितो

[1] प्रतृतीति in all MSS. [2] तं सं in all MSS. [3] अपवृत्तेवत् A. अपरावृत्ते च C. अप्रा° K. [4] भि in K. only.

दशसमाधिसुखमुखमार्गान्प्रतिलभते । समाधिबुद्धैः संधा= र्यमाणो ऽचिन्त्यबुद्धधर्मस्वप्रणिधानव्यवलोकनतया स= माधिसुखभूतकोट्या विनिवार्य प्रत्यात्मार्यगतिगम्यैः सर्व- श्रावकप्रत्येकबुद्धतीर्थ्यकरासाधारणै[1]र्योगमार्गैर्दशार्यगोत्रमा= र्गं प्रतिलभते कायं च ज्ञानमनोमयं समाध्यभिसंस्का= राहितम् । तस्मात्तर्हि महामते तथागतगर्भ आलयवि= ज्ञानसंशब्दितो विशोधयितव्यो विशेषार्थिभिर्बोधिसत्त्वै= र्महासत्त्वैः ॥

यदि हि महामते आलयविज्ञानसंशब्दितस्तथागतग= र्भो ऽत्र न स्यादित्यसति महामते तथागत[2]गर्भ आलय= विज्ञानसंशब्दिते न प्रवृत्तिर्न निवृत्तिः स्यात् । भवति च महामते प्रवृत्तिर्निवृत्तिश्च बालार्याणाम् । स्वप्रत्यात्मार्यग= तिदृष्ट[3]धर्मसुखविहारेण च विहरन्ति योगिनो ऽनिक्षिप्त= धुरा दुष्प्रतिवेधाश्च । महामते अयं तथागतगर्भालय= विज्ञानगोचरः सर्वश्रावकप्रत्येकबुद्धतीर्थ्यवितर्कदर्शनानां प्रकृतिपरिशुद्धो ऽपि सन्न[4]शुद्ध इवा[5]गन्तुक्लेशोपक्लिष्टतया तेषामाभाति न तु तथागतानाम् । तथागतानां[6] पुनर्म= हामते करतलामलकवत्प्रत्यक्षगोचरो भवति ॥

एतदेव महामते मया[7] श्रीमालां देवीमधिकृत्य देश=

[1] यौ K. [2] गत left out in A. C. [3] ष्टि T. [4] सर्व T. [5] इवा A. C. K. इवागन्तुप T. [6] Left out in T. [7] मया is put in before महामते in K.

नापाठे ऽन्यांश्च सूक्ष्मनिपुणविशुद्धबुद्धीन्बोधिसत्त्वानधि= ष्ठाय तथागतगर्भ आलयविज्ञानसंशब्दितः सप्तभिर्वि= ज्ञानैः सह प्रवृत्त्यभिनिविष्टानां श्रावकाणां धर्मनैरा= त्म्यप्रदर्शनार्थं श्रीमालां देवीमधिष्ठाय तथागतविषयो देशितो न श्रावकप्रत्येकबुद्धान्यतीर्थ[1]क[2]रतर्कविषयो ऽन्यत्र महामते तथागतविषय एव तथागतगर्भ आलयविज्ञा= नविषयस्त्वत्सदृशानां च सूक्ष्मनिपुणमतिबुद्धि[3]प्रभेदकानां बोधिसत्त्वानां महासत्त्वानामर्थप्रतिसरणानां[4] नो तु य= थारुतदेशनापाठाभिनिविष्टानां सर्वान्यतीर्थ्य[5]श्रावकप्रत्ये= कबुद्धानाम्। तस्मात्तर्हि महामते त्वयान्यैश्च बोधिसत्त्वै= र्महासत्त्वैः सर्वतथागतविषये ऽस्मिंस्तथागतगर्भालयवि= ज्ञानपरिज्ञाने योगः करणीयो न श्रुतमात्रसंतुष्टैर्भवित= व्यम् ॥ तत्रेदमुच्यते ॥

गर्भस्तथागतानां हि विज्ञानैस्सप्तभिर्युतः।
प्रवर्तते द्वयो ग्राहात्परिज्ञानान्निवर्तते ॥१॥
विम्बवद्दृश्यते चित्तमनादिमतिभावितम्।
अर्था[6]कारो न चार्थो ऽस्ति यथाभूतं विपश्यतः ॥२॥
अङ्गुल्यग्रं[7] यथा बालो न गृह्णाति[8] निशाकरम्।

[1] र्थ्य T. [2] र left out in A. [3] द्ध K. [4] णान्नो A. C. K. णानां न्नो T. [5] र्थ K. [6] थ A. K. [7] ग्रा T. [8] न गृह्णाति A. C. K. गृह्णाति न T.

तथा ह्यक्षरसंसक्ता[1]स्तत्त्वं न वेत्ति[2] मामकम् ॥३॥
नटवन्नृ[3]त्यते चित्तं मनो विदूषसादृशम् ।
विज्ञानं पञ्चभिः सार्धं दृश्यं कल्पेति[4] रङ्गवत् ॥४॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमध्येषते स्म । देशयतु मे भगवा[5]न्देशयतु[5] मे[5] सुगतः[6] पञ्चधर्मस्वभावविज्ञाननैरात्म्यद्वयप्रभेदगतिलक्षणं । येन नैरात्म्यद्वयप्रभेदगतिलक्षणेनाहं चान्ये च बोधिसत्त्वा महासत्त्वाः सर्वभूमिक्रमानुसंधिष्वेतान्धर्मान्विभावयेम । यथा तैर्धर्मैः सर्वबुद्धधर्मानुप्रवेशो भवेत्सर्वबुद्धधर्मानुप्रवेशाच्च यावत्तथागतस्वप्रत्यात्मभूमिप्रवेशः[7] स्यादिति । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महामतिर्बोधिसत्त्वो महासत्त्वो[8] भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । पञ्चधर्मस्वभावविज्ञाननैरात्म्य[9]द्वयप्रभेदगतिलक्षणं ते महामते देशयिष्यामि[10] । यदुत नाम निमित्तं विकल्पः सम्यग्ज्ञानं तथता च तथागतप्रत्यात्मार्यगतिप्रवेशः शाश्वतोच्छेदसदसद्दृष्टिविवर्जितः दृष्टध=

[1] क्त T. [2] त्व नां वेति A. त्वं ना वैति C. K. त्वं ना चेति T. [3] नटाद्दृश्य T. [4] कल्प A. K. कल्पेन्तिरग T. [5] In T. only. [6] त in all MSS. [7] श्च T. [8] In K. T. only. [9] चित्तदृश्यवाह्यभावा is added in A. [10] देशयामि A. C.

मसुखसमापत्तिसुखविहार आमुखीभवति योगयोगि=
नाम् । तत्र महामते पञ्चधर्मस्वभावविज्ञाननैरात्म्यद्वय-
[1]स्वचित्तदृश्यबाह्यभावाभावानवबोधाद्विकल्पः प्रवर्तते बा=
लानां न त्वार्याणाम् ॥

महामतिराह । कथं पुनर्भगवन्बालानां विकल्पः प्र=
वर्तते न त्वार्याणाम् । भगवानाह । नामसंज्ञासंकेता=
भिनिवेशेन महामते बालाश्चित्तमनुसरन्ति । अनुसरन्तो
विविधलक्षणोपचारेणात्मात्मीयदृष्टिपतिताशया वर्णपुष्क=
लतामभिनिविशन्ते । अभिनिविशन्तश्चा[2]ज्ञानावृताः संर=
ज्यन्ते संरक्ता रागद्वेषमोहजं कर्माभिसंस्कुर्वन्ति । अभि=
संस्कृत्य पुनः पुनः कोशकारकीटका इव स्वविकल्पपरि=
वेष्टितमतयो गतिसमुद्रकान्तारप्रपतिता घटीयन्त्र[3]वन्नाति-
प्रवर्तन्ते । न च प्रजानन्ति मोहान्मायामरीच्युदकचन्द्र[4]-
स्वभावकल्पनात्मात्मीयरहितान्[5]सर्वधर्मानभूतविकल्पोदिता=
[6]ल्लक्ष्यलक्षणापगतान्[7]भङ्गोत्पादस्थितिगतिविनिवृत्तान्[8]स्वचि=
त्तदृश्यविकल्पप्रभवानीश्वरकाला[9]णुप्रधानप्रभवान्नामनिमि=
त्तानुस्रवेन महामते बाला निमित्तमनुसरन्ति ॥

तत्र निमित्तं पुनर्महामते यच्चक्षुर्विज्ञानस्याभासमाग=

[1] स्व left out in A. C. [2] विस्याज्ञा T. [3] घटी is added in A. [4] द्रं T. [5] तां सर्व in all MSS. [6] तां ल in all MSS. [7] तां भ in all MSS. [8] तां स्व in all MSS. [9] कारांड A. C. K. कालानु T.

ष्ठति रूपसंज्ञकमेवं श्रोत्रघ्राणजिह्वाकायमनोविज्ञानानां शब्दगन्धरसस्प्रष्टव्यधर्मसंज्ञकमेतं निमित्तमिति वदामि । तत्र विकल्पः पुनर्महामते येन नाम समुदीरयति । निमित्तव्यञ्जकमिदमेवमिदं नान्यथेति हस्त्यश्वरथपदातिस्त्रीपुरुषादिसंज्ञकं तद्विकल्पः प्रवर्तते[1]। सम्यग्ज्ञानं पुनर्महामते येन नामनिमित्तयोरनुपलब्धिरन्योन्यागन्तुकत्वादप्रवृत्तिर्विज्ञानस्यानुच्छेदाशाश्वततः सर्वतीर्थकरश्रावकप्रत्येकबुद्धभूम्यपातनत्वात्सम्यग्ज्ञानमित्युच्यते । पुनरपरं महामते येन सम्यग्ज्ञानेन बोधिसत्त्वो महासत्त्वो न नाम भावीकरोति न च निमित्तमभावीकरोति । समारोपापवादान्तद्वयकुदृष्टिविवर्जितं नामनिमित्तार्थयोरप्रवृत्तिविज्ञानमेवमेतां तथतां[2] वदामि । तथताव्यवस्थितश्च महामते बोधिसत्त्वो महासत्त्वो निराभासगोचरप्रतिलाभित्वात्प्रमुदितां बोधिसत्त्वभूमिं प्रतिलभते ॥

स प्रतिलभ्य प्रमुदितां बोधिसत्त्वभूमिं व्यावृत्तः सर्वतीर्थ्यापायगतिभ्यो भवति[3] लोकोत्तरधर्मगतिसमवसृतः । लक्षणपरिचयान्मायादिपूर्वकां सर्वधर्मगतिं विभावयन्स्वप्रत्यात्मार्यधर्मगति[4]लक्षणं[5] तर्कदृष्टिविनिवृत्तकौतुको ऽनु=

[1] क एतद्विकल्पः A. C. K. कं तद्विकल्पः प्रवर्तते T. [2] तान्तय A. C. तातान्तय K. Left out in T. [3] Left out in K. [4] विभावयन् is added in A. धति K. [5] °धर्ममभिलक्षन् or °धर्ममभिलक्ष्य (唐)

पूर्वेण यावद्धर्ममेघा भूमिरिति । धर्ममेघानन्तरं यावत्स=
माधिबलवशिताभिज्ञाकुसुमितां तथागतभूमिं प्रतिलभ=
ते । स प्रतिलभ्य सत्त्वपरिपाचनतया विचित्रैर्निर्माण=
किरणैर्विराजते जलचन्द्रवत् । अष्टापदसुनिबद्धधर्मा[1] ना=
नाधिमुक्तिकतया सत्त्वेभ्यो धर्मं देशयति । कायं मनो-
विज्ञप्तिरहितमेतन्महामते तथताप्रवेशात्प्रतिलभन्ते[2] बोधि-
सत्त्वा महासत्त्वाः ॥

पुनरपि महामतिराह । किं पुनर्भगवन्पञ्चसु[3] धर्मेष्वन्त=
र्गतास्त्रयः स्वभावा उत स्वलक्षणसिद्धाः । भगवानाह ।
अत्रैव महामते त्रयः स्वभावा अन्तर्गता अष्टौ च विज्ञा=
नानि द्वे च नैरात्म्ये । तत्र नाम च[4] निमित्तं च परि=
कल्पितः स्वभावो वेदितव्यः । यः[5] पुनर्महामते तदाश्रय-
प्रवृत्तो[6] विकल्पश्चित्तचैत्तसंशब्दितो युगपत्कालोदित आ=
दित्य इव रश्मिसहितो विचित्रलक्षणस्वभावो विकल्पा=
धारकः स महामते स्वभावः परतन्त्र इत्युच्यते । सम्य=
ग्ज्ञानं तथता च महामते अविनाशत्वात्स्वभावः परिनि=
ष्पन्नो वेदितव्यः ॥

पुनरपरं महामते स्वचित्तदृश्यमभिनिविश्यमानं[7] वि=
कल्पो ऽष्टधा भिद्यते । निमित्तस्याभूतलक्षणपरिकल्पित=

[1] अनिष्टापद Tib. [2] त्प्र K. [3] सु left out in K. [4] Left out in T.
[5] यां A. C. [6] प्र left out in T. [7] वे K.

त्वादात्मात्मीयग्राहद्वयव्युपशमान्नैरात्म्यद्वयमाजा[1]यते । एषु महामते पञ्चसु धर्मेषु सर्वबुद्ध[2]धर्मा अन्तर्गता भूमिविभागानुसंधिश्च श्रावकप्रत्येकबुद्धबोधिसत्त्वानां तथागतानां च प्रत्यात्मार्यज्ञानप्रवेशः ॥

पुनरपरं महामते पञ्चधर्मो[3] निमित्तं नाम विकल्पस्त[4]थता सम्यग्ज्ञानं च । तत्र महामते निमित्तं यत्संस्थानाकृतिविशेषाकाररूपादिलक्षणं दृश्यते तन्निमित्तम् । यत्तस्मिन्निमित्ते घटादिसंज्ञाकृतकमेवमिदं नान्यथेति तन्नाम । येन तन्नाम समुदीरयति निमित्ताभिव्यञ्जकं सं[5]मधर्मेति वा[6] स महामते चित्तचैत्तसंशब्दितो विकल्पः । यन्नामनिमित्तयोरत्यन्तानुपलब्धिता[7] बुद्धि[8]प्रलयादन्योन्याननुभूतापरिकल्पितत्वादेषां धर्माणां तथ[9]तेति । तत्त्वं भूतं निश्चयो निष्ठा[10] प्रकृतिः स्वभावो ऽनुपलब्धिः तत्तथालक्षणम् । मयान्यैश्च तथागतैरनुगम्य यथावद्देशितं प्रज्ञप्तं विवृतमुत्तानीकृतं य[11]त्रानुगम्य[12] सम्यगवबोधानुच्छेदाशाश्वततो विकल्पस्याप्रवृत्तिः स्वप्रत्यात्मार्यज्ञानानुकूलं[13] तीर्थकरपक्ष[14]परपक्ष[15]श्रावकप्रत्येकबुद्धागतिलक्षणं तत्सम्यग्ज्ञा=

[1] ज A. [2] बुद्ध left out in K. [3] धर्म A. C. धर्मा K. धर्मो T. [4] स्प त in all MSS. [5] शं A. C. K. स T. [6] म is added in A. [7] ना K. [8] द्ध K. [9] धर्मतय C. धर्म for तय in K. [10] प्रतिष्ठा is added in T. [11] या T. [12] म्यः A. C. K. म T. [13] कुल A. कूलं C. T. कुकूलं K. [14] क्षा A. C. K. क्ष T. [15] क्ष A. C. क्षं K. क्षा T.

नम् । एते च महामते पञ्चधर्माः । एतेष्वेव त्रयः स्वभावा अष्टौ च विज्ञानानि द्वे च नैरात्म्ये सर्वबुद्धधर्माश्चान्तर्गताः । अत्र ते महामते स्वमतिकौशलं करणीयमन्यैश्च कारयितव्यं न परप्रणेयेन भवितव्यम्[1] ॥ तत्रेदमुच्यते ॥

पञ्चधर्माः स्वभावश्च विज्ञानान्यष्ट एव च ।
द्वे नैरात्म्ये भवेत्कृत्स्नो महायानपरिग्रहः ॥५॥
नामनिमित्तसंकल्पाः स्वभावद्वयलक्षणम् ।
सम्यग्ज्ञानं तथात्वं च परिनिष्पन्न[2]लक्षणम् ॥६॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेत[3]दवोचत् । यत्पुनरेतदुक्तं भगवता[4] देशनापाठे यथा गङ्गानदीवालु[5]कासमास्तथागता अतीता अनागता वर्तमानाश्च । तत्किमिदं भगवन्यथारुतार्थग्रहणं कर्तव्यमाहोस्विदन्यः कश्चिदर्थान्तरविशेषो ऽस्तीति तदुच्यतां भगवन्[6] । भगवानाह । न महामते यथारुतार्थग्रहणं कर्तव्यम् । न च महामते गङ्गानदीवालु[5]काप्रमाणतया त्र्यध्व[7]कबुद्ध[8]प्रमाणता भवति । तत्कस्य हेतोर्यदुत लोकातिशयातिक्रान्तत्वान्महामते दृष्टान्तो ऽदृष्टान्तः सदृशासदृशत्वात् ।

[1] व्यः T. [2] न्नं T. [3] From पि till तद् left out in A. C. where भगवंतं is put in before पुनर [4] न्स for ता in T. [5] लि A. C. K. लु T. [6] वा ? [7] ध्वे in all MSS. [8] बुद्धै in. T. only.

न च महामते तथागता अर्हन्तः सम्यक्संबुद्धाः सदृशा=
सदृशं लोकातिशयातिक्रान्तं दृष्टान्तं प्राविष्कुर्वन्ति । अ=
न्यत्र उपमामात्रमेतन्महामते मयो[1]पन्यस्तं तैश्च तथागतै=
र्यथा गङ्गानदीवालु[2]कासमास्तथागता अर्हन्तः सम्यक्सं=
बुद्धा इति नित्यानित्याभिनिवेशाभिनिविष्टानां बालपृथ=
ग्जनानां तीर्थकराशयकुदृष्टियु[3]क्तानां संसारभवचक्रानुसा=
रिणामुद्वेजनार्थं कथमेत उद्विग्ना भवगति[4]चक्रसंकटाद्विशे=
षार्थिनो विशेषमारभेरन्निति सुलभबुद्धत्वप्रदर्शनार्थं न
नोदुम्बरपुष्पतुल्यस्तथागतानामुत्पाद इति कृत्वा वीर्यमा=
रप्स्यन्ते । देशनापाठे तु मया वैनेयजनतापेक्षयोदुम्बर[5]=
पुष्पसुदुर्लभप्रादुर्भावास्तथागता इति देशितम् । न च
महामते उदुम्बरपुष्पं केनचिद्दृष्टपूर्वं न द्रक्ष्य[6]ते । त=
थागताः पुनर्महामते लोके दृष्टा दृश्यन्ते चैतर्हि । न
स्वनयप्रत्यवस्थानकथामधिकृत्योदुम्बरपुष्पसुदुर्लभप्रादुर्भा=
वास्तथागता इति । स्वनयप्रत्यवस्थानकथायां महामते
निर्दिश्यमानायां लोकातिशयातिक्रान्ता दृष्टान्तायुक्ताः[7]
क्रियन्ते ऽश्रद्धेय[8]त्वात् । अश्रद्धेयं स्याद्बालपृथग्जनानां च[9] ।

[1] मया is put in after उपन्यस्तं in A. C. [2] लि A. C. K. लु T. [3] ष्टा for क्ता in K. T. [4] भगवति A. C. भवगति K. T. [5] र left out in A. [6] क्ष्यें A. क्ष्यं C. क्ष K. क्ष्यन्ति T. [7] युक्ता left out in A. C. [8] यं A. C. [9] च in C. only.

स्वप्रत्यात्मार्यज्ञानगोचरे च दृष्टान्ता न प्रवर्तन्ते। चित्त-मनोमनोविज्ञानदृष्टलक्षणातिक्रान्तत्वात्तत्त्वस्य। तत्त्वं च तथागता अतस्तेषु दृष्टान्ता नोपन्यस्यन्ते॥

किंतु उपमामात्रमेतन्महामते कृतं यदुत गङ्गानदीवालु[1]कासमास्तथागताः समा न विषमा अकल्पाविकल्पनतः। तद्यथा महामते गङ्गायां नद्यां वालु[1]का मीनकच्छपशिशुमारनक्रमहिषसिंहहस्त्यादिभिः संक्षोभ्यमाणा[2] न कल्पयन्ति न विकल्पयन्ति संक्षोभ्यामहे न वेति निर्विकल्पाः स्वच्छा मलव्यपेताः एवमेव महामते तथागतानामर्हतां सम्यक्संबुद्धानां स्वप्रत्यात्मार्यज्ञानगङ्गामहा[3]नदीवलाभिज्ञावशितावालुकाः सर्वतीर्थकरवालमीनपरप्रवादिभिः संक्षोभ्यमाणा न कल्पयन्ति न[4] विकल्पयन्ति[4]। तथागत[5]पूर्वप्रणिहितत्वात्सर्वसुखसमापत्तिपरिपूर्या सत्त्वानां न कल्पयन्ति न विकल्पयन्ति। अतस्ते गङ्गानदीवालुकासमास्तथागता निर्विशिष्टा अनुनयप्रतिघापगतत्वात्॥

तद्यथा महामते गङ्गायां नद्यां वालुका पृथिवीलक्षणस्वभावत्वात्पृथिवी कल्पोद्दाहे दह्यमानापि न पृथिवीस्वभावं विजहाति। न च महामते पृथिवी दह्यते तेजो-

[1] लि A. C. K. लु T. [2] नो A. C. K. णो T. [3] गंगामहान left out in A. [4] Left out in T. [5] ता A. त C. K. T.

धातुप्रतिबद्धत्वादन्यच बालपृथग्जना वितथता[1]पतितया सं=
तत्या[2] दह्यमानां कल्पयन्ति न च दह्यते तदग्निहेतुभूत=
त्वात् । एवमेव महामते तथागतानां धर्मकायो गङ्गान=
दीबालुकासमो ऽविनाशी । तद्यथा महामते[3] नद्यां[3] ग=
ङ्गायां बालुका अप्रमाणाः[4] एवमेव महामते तथागतानां
रश्म्यालोको ऽप्रमाणः सत्त्वपरिपाकसंचोदनमुपादा[5]य स=
र्वबुद्धपर्षन्मण्डलेषु प्रसर्प्यते[6] तथागतैः । तद्यथा महामते
गङ्गायां[7] नद्यां बालुका न बालु[8]कास्वभावान्तरमारभन्ते
बालुकावस्था एव बालु[9]काः एवमेव महामते तथागता=
नामर्हतां सम्यक्संबुद्धानां संसारे न प्रवृत्तिर्न निवृत्ति=
र्भवप्रवृत्त्युच्छिन्नहेतुत्वात् । तद्यथा महामते गङ्गायां नद्यां[10]
बालुका अप[11]कृष्टा अपि न प्रज्ञापयन्ते प्रक्षिप्ता अपि न
प्रज्ञायन्ते एवमेव महामते तथागतानां ज्ञानं सत्त्वपरि=
पाकयोगेन न क्षीय[12]ते न वर्धते[13] ऽशरीरत्वाद्धर्मस्य । श=
रीरवतां हि महामते नाशो भवति नाशरीरवतां धर्म=
स्याशरीरः । तद्यथा महामते गङ्गायां नद्यां बालुका नि=
ष्पीड्यमाना घृटतैलार्थिभिर्घृटतैलादिविरहि[14]ताः एवमेव

[1] ता left out in T. [2] बुद्ध्या Tib. (魏) [3] Left out in A. [4] णा A. C. K. ण T. [5] दा left out in K. [6] न्ते T. [7] यां left out in T. [8] न बालुका left out in A. [9] एव बालुका left out in A. [10] यां नद्या T. [11] रि is added in K. [12] यं K. [13] रक्ष्यते T. [14] ता in all MSS.

महामते तथागता:[1] सत्त्वदुःखैर्निष्पीड्यमाना धर्मधात्वी=
श्वर[2]प्रणिधानसुखं न विजहति महामते[3] महाकरुणोपेत=
त्वाद्यावत्सर्वसत्त्वा न निर्वास्यन्ते तथागतैः । तद्यथा म=
हामते गङ्गायां नद्यां बालुकाः प्रवाहानुकूलाः प्रवहन्ति
ना[4]नुदके एवमेव महामते तथागतानां सर्वबु[5]द्धधर्मदेश=
ना निर्वाणप्रवाहानुकूला संवर्तते[6] तेन गङ्गानदीबालु[7]=
कासमास्तथागता इत्युच्यन्ते । नायं महामते गत्यर्थः
तथागतेषु प्रवर्तते । विनाशो[8] महामते[8] गत्यर्थो भवति ।
न च महामते संसारस्य पूर्वा कोटिः प्रज्ञायते । अप्र=
ज्ञायमाना कथं गत्यर्थेन निर्देक्ष्यामि । गत्यर्थो महामते
उच्छेदो न च बालपृथग्जनाः संप्रजानन्ति ॥

महामतिराह । तद्यदि भगवन्पूर्वा कोटिर्न प्रज्ञायते
सत्त्वानां संसरतां तत्कथं मोक्षः प्रज्ञायते प्राणिनाम् ।
भगवानाह । अनादिकालप्रपञ्चदौ[9]ष्ठुल्यविकल्पवासना=
हेतुविनिवृत्तिर्महामते स्वचित्तदृश्यबाह्यार्थपरिज्ञानाद्वि=
कल्पस्याश्रयपरावृत्तिर्महामते मोक्षो न नाशः । अतो
नानन्तकथा महामते किंचित्कारी भवति । विकल्पस्यैव
महामते पर्यायो ऽनन्तकोटिरिति । न चात्र विकल्पा=

[1] तानां T. [2] त्विश्वर K. त्वस्वरस T. धातु(?) स्वस्वप्र Tib. धातुस्वरसप्र (魏) धातुष्वध्याशयप्र (唐) [3] Left out in T. [4] ता A. C. [5] बुद्ध left out in T. [6] र्तं A. C. [7] लि K. [8] Left out in T. [9] ष्ठू C.

दन्यत्किंचित्सत्त्वा[1]न्तरमस्त्यध्यात्मं वा बहिर्धा वा[2] परीक्ष्य[3]=
माणं बुद्ध्या । ज्ञानज्ञेयविविक्ता हि महामते सर्वधर्माः । अन्यत्र स्वचित्तविकल्पा[4]परिज्ञानाद्विकल्पः प्रवर्तते तदव= बोधान्निवर्तते ॥ तत्रेदमुच्यते ॥

गङ्गायां[5] वालु[6]कासमान्ये पश्यन्ति विनायकान् ।
अनाशगतिनिष्ठान्वै[7] ते पश्यन्ति तथागतान् ॥७॥
गङ्गायां वालु[6]का यद्वत्सर्वदोषैर्विवर्जिताः ।
वाहानुकूला नित्याश्च तथा बुद्धस्य[8] बुद्धता ॥८॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत् । देशयतु भगवान्देशयतु मे[9] सुगत=[10]स्तथागतो ऽर्हन्सम्यक्संबुद्धः सर्वधर्माणां क्षणभङ्गं भेद=लक्षणं चैषाम् । तत्कथं[11] भगवन्सर्व[12]धर्माः क्षणिकाः । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति महा-मतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । सर्वधर्माः सर्वधर्मा इति महा-मते[13] यदुत कुशलाकुशलाः संस्कृतासंस्कृता लौकिकलो=

[1] संधा for सत्त्वा in A. C. [2] चा is added in A. C. K. Left out in T. [3] क्ष A. C. [4] ल्प T. [5] य T. [6] लि K. [7] ष्ठा चै A. ष्ठान्वै C. ष्ठां वै K. ष्ठान्वि T. [8] त्यास्तथा बुद्धता T. [9] Left out in A. C. [10] त त A. C. तस्त K. तः त T. [11] क्षणभङ्गम् । कथं Tib. [12] णं सर्वधर्मात्कथं भगवन्सर्वे A. C. K. The text follows T. [13] In T. only.

कोत्तराः सावद्यानवद्याः सास्र[1]वानास्र[2]वा उपात्तानुपत्ताः ।
संक्षेपेण महामते पञ्चोपादानस्कन्धाश्चित्तमनोमनोविज्ञा=
नवासनाहेतुकाश्चित्तमनोमनोविज्ञानवासनापुष्टै[3]र्बालपृथ=
ग्जनैः कुशलाकुशलेन परिकल्प्यन्ते । समाधिसुखसमा=
पत्तयो महामते दृष्टधर्मसुखविहारभावेनार्याणां कुशला=
नास्र[4]वा इत्युच्यन्ते । कुशलाकुशलाः पुनर्महामते यदु=
ताष्टौ विज्ञानानि कतमान्यष्टौ यदुत तथागतगर्भ आल=
यविज्ञानं[5]संशब्दितो मनो मनोविज्ञानं च पञ्च च विज्ञा=
नकायास्तीर्थ्यानुवर्णिताः । तत्र महामते पञ्चविज्ञानका=
या[6] मनोविज्ञानसहिता[7]ः कुशलाकुशलक्षणपरम्पराभेद=
भिन्नाः संततिप्रबन्धनाभिन्नशरीराः प्रवर्तमानाः प्रवर्तन्ते ।
प्रवृत्य च विनश्यन्ति स्वचित्तदृश्यानवबोधात्समनन्तर=
निरोधे[8] ऽन्यद्विज्ञानं प्रवर्तते संस्थानाकृतिविशेषग्राहकं
मनोविज्ञानं पञ्चभिर्विज्ञानकायैः सह संप्रयुक्तं प्रवर्तते ।
[9]क्षणकालानवस्थायि[10] तत्क्षणिकमिति वदामि । क्षणिकं
पुनर्महामते आलयविज्ञानं तथागतगर्भः संशब्दितं म=
नःसहितं प्रवृत्तिविज्ञानवासनाभिः क्षणिकमनास्रववा=

1 श्र A. C. स्र K. T. 2 श्र in all MSS. 3 जुष्ट A. जुष्टै C. पुष्टै K. पुष्यै T. 4 श्र A. C. K. स्र T. 5 नं T. 6 यां K. याः T. 7 ता A. C. K. ताः T. 8 रुद्धे T. 9 ल is added in T. 10 तं is added in K.

सनाभिरक्षणिकम्[1]। न च बालपृथग्जना अवबुध्यन्ते क्षणिकवादाभिनिविष्टाः[2] क्षणिकाक्षणिकतामिमां सर्वधर्माणां तदनवबोधादुच्छेददृष्ट्यासंस्कृतानपि धर्मान्नाशयिष्यन्ति। असंसारिणो महामते पञ्चविज्ञानकाया अननुभूत[3]सुखदुःखा अनिर्वाणहेतवः। तथागतगर्भः पुनर्महामते अनुभूतसुखदुःखहेतुसहितः प्रवर्तते निवर्तते[4] च चतसृभिर्वासनाभिः संमूर्छितः। न च बाला अवबुध्यन्ते क्षणिकदृष्टिविकल्पवासितमतयः॥

पुनरपरं महामते समधारणं कल्पस्थिताः सुवर्णवज्रजिनधातुप्राप्तिविशेषा अभङ्गिनः[5]। यदि पुनर्महामते अभिसमयप्राप्तिः क्षणिकः स्यादनार्यत्वमार्याणां स्यान्न[6] चानार्यत्व[7]मार्याणां भवति। सुवर्णं वज्रं च महामते समधारणं कल्पस्थिता अपि तुल्यमाना न हीयन्ते न वर्धन्ते[8]। तत्कथं बालैः क्षणिकार्थे[9] विकल्प्यत आध्यात्मिकबाह्यानां सर्वधर्माणामसंध्याभाष्य[10]कुशलैः॥

पुनरपि[11] महामतिराह। यत्पुनरेतदुक्तं भगवता षट्पारमितां परिपूर्य बुद्धत्वमवाप्यत इति। तत्कतमास्ताः षट्पा=

[1] From अनास्रव° till कम् in T. only. [2] वि left out in A. [3] ता A. C. K. त T. [4] न वि T. [5] स A. C. K. भ T. [6] From स्या° till णां left out in T. [7] स्व A. C. त्व K. [8] न वर्धन्ते left out in A. C. न वर्द्धते K. न वर्द्धनन्ते K. [9] र्थो T. [10] प्य A. C. ष्य K. T. [11] In T. only.

रमिताः कथं च[1] परिपूरिं[2] गच्छति[3] । भगवानाह । त्रय[4] एते[5] महामते पारमिताभेदाः कतमे त्रयो यदुत लौकि= कलोकोत्तरलोकोत्तरतमाः[6] । तत्र महामते लौकिक्यः पा= रमिता आत्मात्मीयग्राहाभिनिवेशाभिनिविष्टा अन्तद्वय[7]= ग्राहिणो विचित्रभवोपपत्त्यायतनार्थं रूपादिविषयाभि= लाषिणो दानपारमितां परिपूरयन्ति । एवं शील[8]क्षा= न्तिवीर्यध्यानप्रज्ञापारमितां महामते परिपूरयन्ति बा= लाः । अभिज्ञाश्चाभिनिर्ह[9]रन्ति ब्रह्मत्वाय । तत्र लोको= त्तराभिः पारमिताभिः श्रावकप्रत्येकबुद्धा निर्वाणग्राह- पतिताशया दानादिषु प्रयुज्यन्ते यथैव बाला आत्म- सुखनिर्वाणाभिलाषिणः । लोकोत्तर[10]तमाः पुनर्महामते स्वचित्तदृश्यविकल्पमात्रग्रहणात्स्वचित्तद्वयावबोधादप्रवृ= त्तेर्विकल्पस्योपादानग्रहणाभावात्स्वचित्तरूपल[11]क्षणानभि= निवेशाद्दानपारमिता सर्वसत्त्वहितसुखार्थमाजायते बो= धिसत्त्वानां महासत्त्वानां[12] परमयोगयोगिनाम् । यत्तचै= वालम्बने विकल्पस्याप्रवृत्तिं शीलयन्ति तच्छीलं पार= मिता च सा । या तस्यैव विकल्पस्याप्रवृत्तिक्षमणाता

[1] चा A. C. K. वा T. [2] परियु A. परिपूरिं C. K. T. °पूरित्तिं ? [3] च्छं A. C. T. च्छ K. [4] Left out in A. [5] इमे K. T. [6] लौकोत्तरक K. Left out in T. [7] द्वै A. C. [8] पारमिता is added in A. C. K. [9] हे A. C. K. ह T. [10] क is added in K. [11] ल in T. only. [12] Left out in T.

ग्राह्यग्राहकपरिज्ञया सा क्षान्तिपारमिता । येन वीर्येण पूर्वरात्रात्पर[1]रात्रं घटते योगानुकूलदर्शाद्विकल्पस्य व्या= वृत्तेः सा वीर्यपारमिता । यद्विकल्पनिवृत्ते[2]स्तीर्थ्यनिर्वाण- ग्राहापतनं सा ध्यानपारमिता । तत्र प्रज्ञापारमिता यदा स्वचित्तविकल्पाभावादाबुद्धिप्रविचया[3]त्प्रतिविचि[4]न्वन्नन्त= [5]द्वये न पत[6]त्याश्रयपरावृत्तिपूर्वकर्मविनाशतः स्वप्रत्यात्मा= र्यगतिप्रतिलम्भाय प्रयुज्यते सा प्रज्ञापारमिता । एता महामते पारमिता एष पारमितार्थः ॥ तत्रेदमुच्यते ॥

शून्यमनित्यं क्षणिकं बालाः क[7]ल्पेन्ति संस्कृतम् ।
नदी[8]दीपवीजदृष्टान्तैः क्षणिकार्थो विकल्प्यते ॥९॥
निर्व्यापारं[9] क्षणिकं[9] विविक्तं क्षयवर्जितम् ।
अनुत्पत्तिश्च धर्माणां क्षणिकार्थं वदाम्यहम् ॥१०॥
उत्पत्त्यनन्तरं भङ्गं[10] न वै देशेमि बालिशान् ।
नैरन्तर्येण भावानां विकल्पः स्पन्दते गतौ ॥११॥
साविद्या कारणं तेषां चित्तानां संप्रवर्तिकम्[11] ।
अन्तरा कि[12]मवस्थासौ यावद्रूपं न [13]जायते ॥१२॥
समनन्तरप्रध्वस्तं चित्तमन्यत्प्रवर्तते ।

[1] रि A. C. K. र T. [2] त्ति K. [3] न्प्र in all MSS. [4] न्व A. T. न्वं C. त्वं K. [5] द्वं A. C. [6] पतित K. [7] ल्प A. C. [8] दी left out in A. C. नदीदीव्वीज° ? [9] Tib. agrees with this reading. [10] भगवन्न A. C. भगन K. भंगं न T. [11] सप्रवर्त्तिका T. [12] मे K. [13] ज्ञा Tib. (唐) ?

रूपं न तिष्ठते काले किमालम्ब्य प्रवर्त्स्यते ॥१३॥
यस्माद्यच्च[1] प्रवर्तते चित्तं वितथहेतुकम् ।
न प्रसिद्धं कथं तस्य क्षणभङ्गो ऽवधार्यते ॥१४॥
योगिनां हि समापत्तिः सुवर्णं जिनधातवः ।
आभास्वरविमानाश्च अभेद्या लोककारणात् ॥१५॥
स्थितयः प्राप्तिधर्माश्च बुद्धानां ज्ञानसंपदः ।
भिक्षुत्वं समयप्राप्तिर्दृष्टा वै क्षणिकाः कथम् ॥१६॥
गन्धर्वपुरमायाद्या रूपा वै क्षणिका न किम्[2] ।
अभूतिकाश्च भूताश्च[3] भूताः केचित्कारागताः ॥१७॥

इति[4] क्षणिकपरिवर्तः षष्ठः ॥

[1] न्त T. [2] क न कि A. [3] Left out in A. T. अभौतिकानि रूपाणि Tib. (魏) ? [4] आर्यसद्धर्मलङ्कावतारे for इति in T.

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वः पुनरपि भगवन्तमेतदवोचत्। अर्हन्तः पुनर्भगवता व्याकृता अनुत्तरायां सम्यक्संबोधौ। अपरिनिर्वाण[1]धर्मकाश्च सत्त्वा[2]स्तथागतत्वे। यस्यां च रात्रौ तथागतोऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धो यस्यां च[3] रात्रौ परिनिर्वृत्त एतस्मिन्नन्तरे भगवतैकमप्यक्षरं नोदाहृतं न प्रव्याहृतम्। सदासमाहिताश्च तथागता न वितर्कयन्ति [4]न व्यवचारयन्ति[4]। निर्माणानि च निर्माय तैस्तथागतकृत्यं कुर्वन्ति। किं कारणं विज्ञानानां च क्षणपरंपराभेदलक्षणं निर्दिश्यन्ते। वज्रपाणिश्च सततसमितं नित्यानुबद्धः। पूर्वा च कोटिर्न प्रज्ञायते। निर्वृतिश्च प्रज्ञाप्यते। माराश्च मारकर्माणि च कर्मप्लोतयश्च। चञ्चामाणविका सुन्दरिका प्रव्राजिका यथा धौतपात्रादीनि च भगवन्कर्मावरणानि दृश्यन्ते। तत्कथं भगवता सर्वाकारज्ञता प्राप्ता अप्रहीणैर्दोषैः। भगवानाह। तेन हि महामते शृणु साधु च सुष्ठु च मनषिकुरु। भाषिष्ये ऽहं ते। साधु भगवन्निति

[1] णं T. [2] त्वां A. C. K. त्वा T. [3] Left out in K.
[4] Left out in K.

महामतिर्बोधिसत्त्वो महासत्त्वो[1] भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । निरुपधिशेषं निर्वाणधातुं संधाय[2] बोधिसत्त्वचर्यां च चरितवतां प्रोत्साहनार्थम् । सन्ति हि महामते बोधिसत्त्वचर्याचारिण इहान्येषु च[3] बुद्धक्षेत्रेषु येषां श्रावकयाननिर्वाणाभिलाषस्तेषां श्रावकयानरुचिव्यावर्तनार्थं महायानगति[4]प्रोत्साहनार्थं च तन्निर्मित[5]श्रावकान्निर्माणकायैर्व्याकरोति न च[6] धर्मताबुद्धैः । एतत्संधाय महामते श्रावकव्याकरणं निर्दिष्टम् । न हि महामते श्रावकप्रत्येकबुद्धानां क्लेशावरणप्रहाण[7]विशेषो विमुक्त्येकरसतया नात्र[8] ज्ञेयावरणप्रहाणम् । ज्ञेयावरणं पुनर्महामते धर्मनैरात्म्यदर्शनविशेषाद्विशुध्यते । क्लेशावरणं तु पुद्गलनैरात्म्यदर्शनाभ्यासपूर्वकं प्रहीयते । मनोविज्ञाननिवृत्तेः । धर्मावरणवि[9]निर्मुक्तिः पुनरालयविज्ञान[10]वासनाविनिवृत्तेर्वि[11]शुध्यति । पूर्वधर्मस्थितितां संधायापूर्वचरमस्य चाभावात्पूर्वप्रहीणैरे[12]वाक्षरैस्तथागतो न वितर्क्य[13] न विचार्य धर्मं देशयति । संप्रजानकारित्वादमुषितस्मृतित्वाच्च न वितर्कयति न विचारयति चतुर्वासनाभू=

[1] Left out in A. C. [2] Left out in A. सत्वाय for संधाय in K. [3] Left out in T. [4] म K. T. गति left out in Chin. Tib. [5] निमित्तं T. तन् left out in Chin. Tib. [6] In T. only. [7] णं K. [8] न तु ? Tib. [9] वि left out in A. K. निर् id. in T. [10] विज्ञान left out in T. [11] निवृत्तेर्वि left out in T. [12] भाषितैरे or देशितैरे or अभिहितैरे Tib. [13] र्क K.

मिप्रहीणत्वाच्च्युतिद्वयविगमात्क्लेशज्ञेयावरणद्वयप्रहाणाच्च ॥

सप्त महामते मनोमनोविज्ञानचक्षुर्विज्ञानादयः क्ष=णिका वासनाहेतुत्वात्कुशलानास्रवपक्षरहिता न संसा=रिणः । तथागतगर्भः पुनर्महामते संसरति निर्वाणसुख-दुःखहेतुकः । न च बालपृथग्जना अवबुध्यन्ते शून्यता-विक्षिप्तमतयः । निर्मितनैर्माणिका[1]नां महामते तथागता=नां वज्रपाणिः[2] पार्श्वानुगतो[3] न मौलानां तथागताना=मर्हतां सम्यक्संबुद्धानाम् । मौलो हि महामते तथाग=तः सर्वप्रमाणेन्द्रियविनिवृत्तः सर्वबालश्रावकप्रत्येकबुद्धती=र्थ्यानाम् । दृष्टधर्मसुखविहारिणस्तमागच्छन्त्यभिसमयधर्म-ज्ञानक्षान्त्या । अतो वज्रपाणिस्तान्[4]नानुबध्नाति । सर्वे हि निर्मितबुद्धा न कर्मप्रभवा[5] न तेषु तथागतो न चान्यत्र तेभ्यस्तथागतः[6] । कुम्भकारालम्बना[7]दिप्रयोगेनेव सत्त्व[8]कृत्या=नि[9] करोति लक्षणोपेतं च[10] देशयति न[11] तु स्वनयप्रत्यवस्था=नकथां[12] स्वप्रत्यात्मार्यगतिगोचरम् । पुनरपरं महामते ष=ण्णां विज्ञानकायानां निरोधादुच्छेददृष्टिमाश्रयन्ति बाल-पृथग्जना आलयानवबोधाच्छाश्वतदृष्टयो भवन्ति । स्वम=

[1] र्मा A. त्मा K. [2] णि T. [3] हि is added in all MSS., but T. [4] पाणि left out in T. [5] वो A. वारे C. [6] तैः K. त T. [7] कारलक्षणा in all MSS. कारालम्बना or काराम्बणा Tib. [8] सर्व Tib. [9] नि left out in A. [10] तश्च (唐) Tib. णापेतं च (魏) [11] नो A. C. K. न T. [12] था T.

तिविकल्पस्य महामते पूर्व[1]कोटिर्न प्रज्ञायते। स्वमतिवि=
कल्पस्यैव विनिवृत्तेर्मोक्षः प्रज्ञायते। चतुर्वासनाप्रहाणा=
त्सर्वदोषप्रहाणम् ॥ तत्रेदमुच्यते ॥

त्रीणि यानान्ययानं च बुद्धानां नास्ति निर्वृतिः।
बुद्धत्वे व्याकृताः सर्वे वीतदोषाश्च देशिताः ॥१॥
अभिसमयान्तिकं[2] ज्ञानं निरुपादिगतिस्तथा।
प्रोत्साहनां[3] च लीनानामेतत्संधाय देशितम् ॥२॥
बुद्धै[4]रुत्पादितं ज्ञानं मार्गस्तैरेव देशितः।
यान्ति तेनैव नान्येन अतस्तेषां न निर्वृतिः ॥३॥
भा[5]वकामरूपदृष्टीनां वासना वै चतुर्विधा।
मनोविज्ञानसंभूता आलयं च मनः[6] स्थिताः ॥४॥
मनोविज्ञाननेत्रा[7]द्यैरुच्छे[8]दश्चाप्यनित्यतः[9]।
शाश्वतं च अना[10]द्येन निर्वाणमतिदृष्टिनाम् ॥५॥

इति[11] नैर्मा[12]णिकपरिवर्तः सप्तमः ॥

[1] र्वा T. [2] अभिसमेन्तिकं ? [3] नार्थं K. प्रोत्साहनाच्च लीना° Tib.
[4] रनु A. C. [5] भव K. T. Chin. Tib. [6] मने K. T. [7] नेत्रा A. C. चक्षा K.
चक्षु T. [8] द A. C. दे K. दा T. [9] शः A. C. सः K. तः T. Tib.
[10] ना A. C. नो K. T. [11] इति left out in K. T. [12] र्वा A. C. K. र्मा T.

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्तं गाथाभिः परिपृच्छ्य पुनरप्यध्येषते स्म । देशयतु मे भगवांस्तथागतो ऽर्हन्सम्यक्संबुद्धो मांसभक्षणे गुणदोषं येनाहं चान्ये च बोधिसत्त्वा महासत्त्वा अनागतप्रत्युत्पन्नकाले[1] सत्त्वानां क्रव्यादसत्त्वगतिवासनावासितानां मांसभोजगृध्राणां रसतृष्णाप्रहाणाय धर्मं देशयाम । यथा च ते क्रव्यादभोजिनः सत्त्वा विनाद्य[2] रसतृष्णां धर्मरसाहारकाङ्क्षया सर्वसत्त्वैकपुत्रकप्रेमानुगताः परस्परं महामैत्रीं प्रतिलभेरन् । प्रतिलभ्य सर्व[3]बोधिसत्त्वभूमिषु कृतयोग्याः[4] क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्येरन् । श्रावकप्रत्येकबुद्धभूम्या वा विश्रम्यानुत्तरां ताथागतीं भूमिमुपसर्पयेयुः । दु[5]राख्यात[6]धर्मैरपि तावद्भगवन्नन्यतीर्थिकै[7]र्लोकायतदृष्ट्यभिनिविष्टैः सदसत्पक्षोच्छेदशाश्वतवादिभिर्मांसं निवार्यते भ[8]क्ष्यमाणं स्वयं च न भक्षते । प्रागेव कृपैकरसे[9] सम्यक्संबुद्धे[10] प्रणीते लोकनाथ तव शासने मांसं स्वयं च

[1] काले K. कालि T., but left out in A. C. [2] विराग्य ? Tib. [3] ता च for सर्व in T. [4] ग्या A. C. K. ग्याः T. [5] दू T. [6] न A. C. K. त T. [7] थ्यैः K. थ्यैकः T. [8] क्ष K. T. [9] रसैः A. रसै C. T. रसे K. [10] द्ध T.

भक्षन्ते भक्ष्यमाणं च न निवार्यते । तत्साधु भगवान्स=
र्वलोकानुकम्पकः सर्वसत्त्वैकपुत्रक[1]समदर्शी महाकारुणि=
को ऽनुकम्पामुपादाय मांसभक्षणे गुणदोषान्देशयतु मे[2]
यथाहं चान्ये च बोधिसत्त्वास्तथत्वाय सत्त्वेभ्यो धर्मं दे=
शयेम । भगवानाह । तेन हि महामते शृणु साधु च सुष्ठु
च मनसिकुरु । भाषिष्ये ऽहं ते । साधु भगवन्निति म=
हामतिर्बोधिसत्त्वो महासत्त्वो भगवतः प्रत्यश्रौषीत् ॥

भगवांस्तस्यैतदवोचत् । अपरिमितैर्महामते कारणैर्मांसं
सर्वमभक्ष्यं कृपात्मनो बोधिसत्त्वस्य तेभ्यस्तूपदेशमात्रं व=
क्ष्यामि । इह महामते अनेन दीर्घेणाध्वना संसरतां प्रा=
णिनां नास्त्यसौ कश्चित्सत्त्वः सुलभरूपो यो न माता=
भू[3]न्पिता वा भ्राता वा भगिनी वा पुत्रो वा दुहिता वा=
न्यतरान्यतरो[4] वा स्वजनबन्धुबन्धूभूतो वा तस्यान्यजन्मप=
रिवृत्ताश्रयस्य मृगपशुपक्षियोन्यन्त[5]र्भूतस्य बन्धोर्बन्धूभूतस्य
वा सर्वभूतात्मभूतानु[6]पागन्तुकामेन सर्वजन्तुप्राणिभूतसंभूतं
मांसं कथमिव भक्ष्यं स्याद्बुद्धधर्मकामेन[7] बोधिसत्त्वेन म=
हासत्त्वेन । राक्षसस्यापि[8] महामते तथागतानामिमां ध=
र्मसुधर्मतामुपश्रुत्योपगतरक्षभावाः कृपालवा भवन्ति मां=

[1] क left out in A. [2] Left out in K. T. [3] भूत् left out in A. C.
[4] रौ T. [5] त्र T. [6] नु A. C. [7] बुद्धधर्मकामेन left out in T.
[8] रक्षस्यपि T.

सभक्षणविनिवृत्ताः किमुत धर्मकामा जनाः । एवं तावन्महामते तेषु तेषु जातिपरिवर्तेषु सर्वसत्त्वाः स्वजनबन्धुभावसंज्ञा[1] सर्वसत्त्वैकपुत्रकसंज्ञाभावनार्थं मांसं सर्वमभक्ष्यं कृपात्मनो बोधिसत्त्वस्याभक्ष्यं मांसम् । व्यभिचारादपि महामते मांसं सर्वम[2]भक्ष्यं चारित्रवतो बोधिसत्त्वस्य । श्वखरोष्ट्राश्वबलीवर्दमानुषमांसादीनि हि महामते लोकस्याभक्ष्याणि मांसानि तानि च महामते वीथ्यन्तरेष्वौरभ्रिका भक्ष्याणीति कृत्वा मूल्यहेतोर्विक्रीयन्ते[3] यतस्ततो ऽपि महामते मांसम[4]भक्ष्यं[5] बोधिसत्त्वस्य ॥

शुक्रशोणितसंभवादपि महामते शुचिकामता[6]मुपादाय बोधिसत्त्वस्य मांसमभक्ष्यम् । उद्वेजनकरत्वादपि महामते भूतानां मैत्रीमिच्छतो योगिनो मांसं सर्वमभक्ष्यं बोधिसत्त्वस्य । तद्यथापि महामते डोम्बचाण्डालकैवर्तादी[7]च्छ[8]पि[9]शिताशिनः[10] सत्त्वान्दूरत[11] एव दृष्ट्वा श्वानः प्रभय[12]न्ति भयेन मरणप्राप्ताश्चैके भवन्त्यस्मा[13]नपि मारयिष्यन्तीति एवमेव महामते ऽन्ये ऽपि खभूजलसंनिश्रितान्सूक्ष्मजन्तवो ये मांसाशिनो दर्शना[14]द्दूरादेव पटुना घ्राणेनाघ्राय

[1] संज्ञया or संज्ञासर्व° ? [2] सर्वम left out in K. [3] ते A. C. K. न्ते T.
[4] म left out in K. [5] क्ष K. [6] ता left out in T. [7] दी left out in A. C.
[8] इच्छ for इष्ट ? [9] पि left out in K. [10] पिशिनः K. निनः T.
[11] त left out in T. [12] व A. C. T. पं K. [13] न्या A. C. K. स्मा T.
[14] दृष्ट्वा दू T.

गन्धं राक्षसस्येव मानुषा द्रुतमुपसर्पयन्ति मरणसंदेहाश्चैके भवन्ति । तस्मादपि च महामते उद्वेजनकरत्वान्महामैत्रीविहारिणो योगिनो मांसमभक्ष्यं बोधिसत्त्वस्य । अनार्यजनजुष्टं[1] दुर्गन्धमकीर्तिकरत्वादपि महामते आर्यजनविवर्जितत्वाच्च मांसमभक्ष्यं बोधिसत्त्वस्य । ऋषिभोजनाहारो हि महामते आर्यजनो[2] न मांसरुधिराहार इत्यतो ऽपि बोधिसत्त्वस्य मांसमभक्ष्यम् ॥

बहुजनचित्तानुरक्षणतयाप्यपवादपरिहारं चेच्छतः[3] शासनस्य महामते मांसमभक्ष्यं कृपात्मनो बोधिसत्त्वस्य । तद्यथा महामते भवन्ति लोके शासनापवादवक्तारः किंचित्[4]तेषां श्रामण्यं कुतो वा ब्राह्मण्यं यन्नामैते[5] पूर्वर्षि[6]भोजनान्यपास्य क्रव्या[7]दा इवामिषाहाराः परिपूर्णकुक्षयः खभूमिजलसंनि[8]श्रितान्सूक्ष्मां[9]स्त्रासयन्तो जन्तून्[10]समुत्त्रासयन्त इमं[11] लोकं समन्ततः पर्यट[12]न्निहतमेषां श्रामण्यं[13] ध्वस्तमेषां ब्राह्मण्यं[14] नास्त्येषां धर्मो न विनय इत्यनेकप्रका[15]रप्रतिहत[16]चेतसः शासनमेवा[17]पवदन्ति । तस्माद्बहुजन[18]चित्तानुरक्ष=

[1] जुष्टं left out in A. [2] आभोजनो K. आर्यजना T. [3] अच्छुतः A. चेच्छतः C. चेच्छुः K. देच्छन्त T. [4] श्चि K. [5] त्र T. [6] पूवन्ष्टृ A. पूवन्ष्टृ C. पूर्वन्ष्टृ K. T. [7] त्रा for दा in T. [8] श्रि A. C. T. सृ K. [9] ही K. ह्मं T. [10] न्तुं T. [11] मां T. [12] न्ति for न्नि in T. [13] एयो T. [14] एयन् A. C. एये K. एय T. [15] रं K. [16] त left out in K. [17] प्र T. [18] न left out in K.

णतयाप्यपवाद[1]परिहारं चेच्छत:[2] शासनस्य महामते मांसं सर्वमभक्ष्यं कृपात्मनो बोधिसत्त्वस्य ॥

मृतश[3]वदुर्ग[4]न्धप्रतिकूलसामान्यादपि महामते मांसमभक्ष्यं बोधिसत्त्वस्य[5]। मृतस्यापि हि महामते मनुष्यस्य मांसे दह्यमाने तदन्यप्राणि[6]मांसे च न कश्चिद्गन्धविशेषः सम[7]मुभयमांसयोर्दह्यमानयोर्दौर्गन्ध्यमतो ऽपि महामते शुचिकामस्य योगिनः सर्वं मांसमभक्ष्यं बोधिसत्त्वस्य ॥

श्मशानिकानां च महामते अरण्यवनप्रस्था[8]न्यमनुष्या[9]वचराणि प्रान्तानि शयनासनान्यध्यावसतां योगिनां योगाचाराणां मैत्रीविहारि[10]णां विद्याधराणां विद्यासाधयितुकामानां विद्यासाधनमोक्षविघ्नकरत्वान्महायानसंप्रस्थितानां कुलपुत्राणां कुलदुहितॄणां च सर्वयोगसाधनान्तरायक[11]रमित्यपि समनुपश्यतां महामते स्वपरात्महितकामस्य मांसं सर्वमभक्ष्यं बोधिसत्त्वस्य। रूपालम्बनविज्ञानप्रत्ययास्वादजनकत्वादपि सर्वभूतात्मभूतस्य कृपात्मनः सर्वं मांसमभक्ष्यं बोधिसत्त्वस्य। देवता अपि चैनं परिवर्जयन्तीति कृत्वा महामते कृपात्मनः[12] सर्वं मांसमभक्ष्यं

[1] रक्षोयाप्यप A. रक्षयापि अप C. रक्षयाप्यप K. रक्षणयापि अप T. [2] या: for त: in T. [3] सर्व for शव in T. [4] धि T. [5] स्या T. [6] ना is added in T. [7] म left out in T. [8] न्या T. [9] ष्या left out in T. [10] रा T. [11] कार left out in T. [12] महात्मन: A. C.

बोधिसत्त्वस्य । मुखं चास्य परमदुर्गन्धि इहैव तावज्जन्मनि इत्यपि कृत्वा[1] महामते[1] कृपात्मनः सर्वं मांसमभक्ष्यं बोधिसत्त्वस्य । दुःखं स्वपिति[2] दुःखं प्रतिबुध्यते । पापकांश्च रोमहर्षणा[3]न्स्वप्नान्पश्यन्ति[4] । शून्यागार[5]स्थितस्य चैकाकिनो रहोगत[6]स्य विहरतो ऽस्यामनुष्यास्तेजो[7] हरन्ति । उत्त्रस्यन्त्यपि कदाचित्संत्रस्यन्त्यपि संत्रासमकस्माच्चामद्यन्ते आहारे च मात्रान्न जानाति नाप्यशितपीत[8]खादिताखादित[9]स्य सम्यग्रसपरिणामपुष्ट्यादि समा[10]सादयति क्रिमिजन्तुप्रचुरकुष्ठ[11]निदानकोष्ठश्च भवति व्याधिबहुलं[12] न च प्रतिकूल[13]संज्ञां[14] प्रतिलभते । पुत्रमांसभैषज्यवदाहारं देशयंश्चाहं महामते कथमिव नार्यजनसेवितमार्यजनविवर्जितमेवम[15]नेकदोषा[16]वह[17]मनेकगुणविवर्जितमनृषिभोजनप्रणीतमकल्प्यं मांसरुधिरा[18]हारं[19] शिष्येभ्यो ऽनुज्ञा[20]प्यामि ॥

अनुज्ञातवान्पुनर[21]हं महामते सर्वार्य[22]जनसेवितमनार्यजनविवर्जितमनेकगुणवाहकमनेकदोषविवर्जितं सर्वपूर्व[23]र्षि=

[1] Left out in K. [2] नि T. [3] णां T. [4] ति A. C. K. न्ति T. [5] न for गार in A. [6] एकाकिनो रहोगत 靜居或暗處。 See महाव्युत्पत्तिः [7] डाडाहारो T. [8] पीत left out in K. [9] अखादित left out in A. खादितस्वादित Tib. [10] मां T. [11] कुष्ठ 癩。大痲風。 See महाव्युत्पत्तिः [12] लः A. C. K. लं T. [13] ल A. C. लः K. लं T. [14] ज्ञा K. T. [15] मेव left out in T. [16] षां T. [17] हु K. [18] म is added in A. C. [19] रां A. C. K. रं T. [20] प्या A. स्या C. K. T. [21] वांस्त्व for वान्पुनर in T. [22] अर्य left out in T. [23] पूर्व in T. only.

प्रणीतं भोजनं यदुत शालियवगोधूममुद्ग[1]माषमसूरादिस=
र्पि[2]स्तैलमधुफा[3]णितगुडख[4]ण्डमत्स्यण्डि[5]कादिषु समुपपद्यमानं
भोजनं कल्प्यमिति कृत्वा । न च महामते ऽनागते ऽध्व=
न्येके[6]षां मोहपुरुषाणां विविधविनयविकल्पवादिनां क्र=
व्यादकुलवासितावासितानां र[7]सतृष्णाव्यवसितानामिदं प्र=
णीतं भोजनं प्रतिभाष्यते । नतु[8] महामते पूर्वजिनकृता=
धिकाराणामवरोपितकुशलमूलानां श्रद्धा[9]नामविकल्पा[10]नां
बहुलानां[11] शाक्यकुल[12]कुलीनानां कुलपुत्राणां कुलदुहि=
तॄणां कायजीवितभोगानध्यवसितानामरस[13]गृध्राणा[14]मलो=
लु[15]पानां कृपालूनां सर्वभूतात्मभूततामुपगन्तुकामानां स=
र्व[16]सत्त्वैकपुत्रकप्रि[17]यदर्शिनां[18] बोधिसत्त्वानां महासत्त्वाना=
मिति वदामि[19] ॥

भूतपूर्वं महामते अतीते ऽध्वनि राजाभूत्सिंहसौदासो
नाम[20]। स मांसभोजनाहारा[21]तिप्रसङ्गेन प्रति[22]सेवमानो रस-

[1] मुंग K. [2] सर्प्पि K. [3] फ्म T. [4] त्स T. [5] शालि (秔米) यव (大麥) गोधूम (小麥) मुद्ग (綠豆) माष (豆) मसूर (小豆) सर्पि (酪) तैल (油) मधु (蜜) फाणित (糖霧 ?) गुड (黑糖) खण्ड (糖蜜) मत्स्यण्डिका (粗糖) [6] ते T. [7] न A. C. र K. T. [8] Left out in T. Tib. अपि तु ? [9] शाद्धा A. C. शार्द्धा K. श्रद्धा T. [10] ल्प T. [11] Left out in A. [12] कुल left out in T. [13] रस left out in A. C. [14] गृद्धाणां A. C. गृध्यानां K. गृद्धानां T. [15] लु ? [16] त्व K. [17] पि T. [18] दर्शनानां T. [19] Left out in A. [20] दामः A. C. [21] रः अति T. [22] प्रति left out in T.

तृष्णाध्यवसानं[1]परमतया मांसानि मानुष्याण्यपि[2] भक्षि=
तवान् । तन्निदानं च मित्रामात्यज्ञातिबन्धुवर्गेणापि[3] प=
रित्यक्तः प्रागेव पौरजा[4]नपदैः स्वराज्यविषयपरित्यागा[5]च्च
महद्व्यसनमां[6]सादितवान्मांसहेतोः ॥

इन्द्रेणापि च महामते देवा[7]धिपत्यं प्रा[8]प्तेन पूर्वा[9]भूत्वा[10]
पूर्वजन्ममांसादवासनादोषाच्छ्येनरूपमास्थाय कपोतवे=
षरूपधारी विश्वकर्मा समभिद्रुतो ऽभूत्तुला[11]यां चात्मान=
मारोपित आसीत् । यस्माद्राजानप[12]राधीभूतानुकम्पकः
शिवी दुःखेन महतालम्भितः । तदेवमनेकजन्माभ्यस्तमपि[13]
महामते देवेन्द्रभूतस्य शक्रस्यापि स[14]तः स्वपरदोषावहन=
मभूत्प्रागेव तदन्येषाम् ॥

अन्येषां च महामते नरेन्द्रभूतानां स[14]ताम[15]श्वेनाप[16]हृता=
नामट[17]व्यां पर्यटमानानां[18] सिंह्या[19] सह मैथुनं ग[20]तवतां जी=
वि[21]तभयादपत्यानि चोत्पादितवन्तः सिंहसंवासान्व[22]या[23]त्क=

[1] ध्य(?) वसापन T. [2] सानुषमान्सामपि T. [3] र्गान्यपि T. [4] ज T. [5] गा left out in T. [6] मो A. [7] वो for देवा in T. [8] सा for प्रा in A. C. [9] पूर्वा left out in K. T. [10] Left out in Tib. [11] भूतभूला A. भूत् भूला C. K. द्रुतो भुला T. [12] आसीद्राजा कस्मादनप K. आशीत राजा वा कस्मादनप T. [13] सि A. C. K. पि T. [14] शु T. [15] न्प is added in K. T. Very strong horse in Tib. अतिवेगाश्वे ? [16] नाध K. ताध T. [17] हृतामाट K. [18] तां T. [19] ह T. [20] भग A. C. K. गत T. [21] ता ? [22] त्व K. [23] क A. C. K. त्क T.

ल्माषपदप्रभृतयो[1] नृपपुत्रा पूर्वजन्ममांसाददोषवासनतया[2] मनुष्येन्द्रभूता अपि सन्तो मांसादा अभूवन्[3] । इहैव च महामते जन्मनि सप्तकुटीरके[4] ऽपि ग्रामे[5] प्रचुरमांसलौ= ल्यादतिप्रसङ्गेन निषेवमाना मानुषमांसादा घोरा डाका[6] वा डाकिन्यश्च संजायन्ते[7] । जातिपरिवर्ते च महामते त= थैव[8] मांसरसाध्यवसानतया[9] सिंहव्याघ्रद्वीपिवृकतरक्षुमा[10]= र्जारजम्बुकोलूकादिप्रचुरमांसादयोनिषु[11] प्रचुरतरपिशिता= शना राक्षसादिघोरतरयोनिषु विनिपात्यन्ते । यत्र वि= निपतितानां दुःखेन मानुष्ययोनिरपि[12] समापद्यते[13] प्रागेव निर्वृतिः । इत्येवमादयो महामते मांसाददोषाः प्रागेव निषेवमानां समुपजायन्ते विपर्ययाच्च भूयांसो गुणाः । न च महामते बालपृथग्जना एतांश्चान्यांश्च गुणदोषा[14]= नवबुध्यन्ते[15] । एवमादिगुणदोषदर्शनान्महामते मांसं सर्व= मभक्ष्यं कृपात्मनो बोधिसत्त्वस्येति वदामि ॥

यदि च महामते मांसं न कथं चन[16] के चन भक्ष= येयुर्न तन्निदानं [17]घातेरन् । मूल्यहेतोर्हि महामते प्रायः

[1] पा T. [2] ना for नत in T. [3] अभूत् T. [4] करे T. [5] ग्राम K. ग्रामके T. [6] राः वाका C. राः वावा K. रा वाका T. [7] ते K. [8] यै T. [9] प्य K. [10] प T. [11] दि T. [12] ष्ये K. ष T. [13] सा for प in T. [14] न is added in K. [15] From बुध्य till नान् left out in T. [16] न च K. केन for कथं चन के in T. [17] According to Tib., प्राणिनः seems to be before घातेरन्

प्राणिनो निरपराधिनो[1] वध्यन्ते स्वल्पादन्य[2]हेतोः । कष्टं महामते रसतृष्णायामतिसे[3]वतां मांसानि मानुषा[4]ण्यपि मानुषै[5]र्भक्ष्यन्ते । किं पुनरितरमृगपक्षि[6]प्राणिसंभूतमांसानि प्रायो महामते मांसरसतृष्णार्तैरिदं तथा तथा[7] जालयन्त्रमाविद्धं[8] मोहपुरुषैर्यच्छाकुनि[9]कौरभ्र[10]ककैवर्तादयः खेचरभूचरजलचरान्प्राणिनो[11] ऽनपराधिनो ऽनेकप्रकारं मू[12]ल्यहेतोर्विशसन्ति । न चैषां[13] महामते किंक[14]नीकृतरुक्षचेतसां राक्षसानामिव गत[15]घृणानां कदाचिदपि प्राणिषु प्राणिसंज्ञया घातयतां भक्षयतां न घृणोत्पद्यते ॥

न च महामते ऽकृतकमकारितमसंकल्पितं नाम[16] मांसं कल्प्यमस्ति यदुपादायानुजानी[17]यं श्रावकेभ्यः । भविष्यन्ति तु पुनर्[18]महामते ऽनागते[19] ऽध्वनि ममैव शासने[20] प्रव्रजित्वा शाक्यपुत्रीयत्वं प्रतिजानानाः[21] काषायध्वजधारिणो मोहपुरुषा मिथ्यावितर्को[22]पहतचेतसो विविधविनयविकल्पवादिनः सत्कायदृष्टियुक्ता [23]रसतृष्णाध्य[24]वसितास्तां तां मां=

[1] धी K. [2] डादन्य K. स्तदन्य T. [3] षे T. [4] ष्या T. [5] ष्यै [6] पक्षि left out in T. [7] गता A. गया C. तया K. T. [8] जालयतिन्तमाविद्व K. °यंत्रमविद्धं T. [9] कै T. [10] भ्रि K. [11] प्राणिनो left out in T. [12] तू K. [13] अपि चैषां ? Tib. [14] किंनी K. किणी T. किंकरी ? [15] ते K. [16] संकल्पितं नाम is repeated in A. C. K. [17] ती T. [18] च for तु पुनर् in T. [19] Left out in T. [20] महामते is added in T. [21] जानानाः A. C. K. जानयानाः T. [22] केपि K. [23] न A. C. र K. T. [24] व्ये K.

सभक्षणहेत्वाभासं ग्रन्थयिष्यन्ति । मम चाभूता[1]भ्या[2]ख्या=
नं दातव्यं मन्स्यन्ते[3] तत्त[4]दर्थोत्पत्तिनिदानं कल्पयित्वा व=
क्ष्यन्ति[5] । इयमर्थोत्पत्तिरस्मिन्निदाने भगवता मांसभोज=
नमनुज्ञातं[6] कल्प्यमिति । प्रणीतभोजनेषु चोक्तं स्वयं च
किल तथागतेन परिभुक्त[7]मिति । न च महामते कुत्रचि=
त्सूत्रे प्रतिसेवि[8]तव्यमित्यनुज्ञातं प्रणीतभोजनेषु वा देशितं
कल्प्य[9]मिति ॥

यदि तु महामते अनुज्ञातु[10]कामता मे[11] स्यात्कल्प्यं वा
मे श्रावकाणां प्रतिसेवितुं स्यान्नाहं मै[12]त्रीविहारिणां[13] यो=
गिनां योगाचाराणां श्मशानिकानां महायानसंप्रस्थि=
तानां कुलपुत्राणां कुलदुहितॄणां च सर्वसत्त्वैकपुत्रक[14]सं=
ज्ञाभावनार्थं सर्वमांसभक्षणप्रतिषेधं कुर्या[15] कृतवांश्च । अ=
स्मिन्महामते धर्मका[16]मानां कुलपुत्राणां कुलदुहितॄणां च
सर्वयानसंप्रस्थितानां श्मशानिकानां मैत्रीविहारिणामा=
रण्यकानां योगिनां[17] योगाचाराणां सर्वयोगसाधनाय स=
र्वसत्त्वैकपुत्रकसंज्ञाभावनार्थं सर्वमांसप्रतिषेधम् ॥

[1] समवाय for मम चा in T. [2] न्या T. [3] त्य K. [4] तत्तमो T. [5] भक्षन्ति T. [6] त A. C. K. तं T. [7] तु K. [8] प्रवितव्य A. C. K. प्रतिसेवितव्य T. [9] ल्प A. C. K. [10] त T. [11] Left out in A. C. [12] त्र A. C. K. त्री T. [13] आरण्यकानां is added in T. [14] क left out in K. [15] त् is added in T. [16] मा left out in K. [17] Left out in T.

तत्र तत्र[1] देशनापाठे शिक्षापदानामनुपूर्वीबन्धं[2] निःश्रेणीपदविन्यास[3]संयोगेन[4] त्रिकोटिं बद्ध्वा न तदुद्दिश्य कृतानि प्रतिषिद्धानि। ततो दशप्रकृतिमृतान्यपि मांसानि प्रतिषिद्धानि। इह तु सूत्रे[5] सर्वेण[6] सर्वं[6] सर्वथा सर्वं[6] निरुपायेन सर्वं[7] प्रतिषिद्धम्। यतोऽहं महामते मांसभोजनं न कस्यचिदनुज्ञातवान्नानुजानामि नानुज्ञास्यामि। अकल्प्यं महामते प्रव्रजितानां मांसभोजनमिति वदामि। यदपि च महामते ममाभ्याख्यानं[8] दातव्यं मन्स्यन्ते तथागतेनापि[9] परिभुक्तमिति। तदन्येषां महामते मोहपुरुषाणां स्वकर्मदोषावरणावृतानां[10] दीर्घरात्रमनर्थायाहिताय[11] संवर्तकं भविष्यति। न हि महामते आर्यश्रावकाः प्राकृतमनुष्याहारमाहरन्ति[12] कुत एवं[13] मांसरुधिराहारमकल्प्यम्। धर्माहारा हि महामते मम श्रावकाः प्रत्येकबुद्धा बोधिसत्त्वाश्च नामिषाहाराः प्रागेव तथागताः। धर्मकाया हि महामते तथागता धर्माहारस्थितयो[14] नामिषकाया न सर्वामिषाहारस्थितयो वान्तसर्वभवोपकरणतृष्णैषणावासनाः सर्वक्लेशदोषवासनापगताः सुविमुक्तचित्तप्रज्ञाः सर्व-

[1] In T. only. [2] पदानु A. C. पदानाम्पनु K. पदानानु T. [3] निश्रिर्णी A. निश्रेणी C. निःस्रेणी K. त्रिःस्रेणी T. [4] विन्यासपद A. K. Left out in C. पद id. in T. [5] त्र A. C. K. त्रे T. [6] र्वं K. [7] र्वं A. C. K. र्वं T. [8] त्या A. C. K. भ्या T. [9] पि left out in K. [10] णां T. [11] य T. [12] तमप्याम A. तमप्या C. K. तमनुष्या T. [13] वं T. [14] रा A. C. र K. रः T.

ज्ञाः सर्वदर्शिनः सर्वसत्त्वैकपुत्रकसमदर्शिनो महाकारु=णिकाः। सो ऽहं महामते सर्वसत्त्वैकपुत्रकसंज्ञी सं[1] क=थमिव स्वपुत्रमांसमनुज्ञास्यामि परिभोक्तुं श्रावकेभ्यः कुत एव स्वयं परिभोक्तुम्। अनुज्ञातवानस्मिञ्श्रा[2]वके=भ्यः स्वयं वा परिभुक्तवानिति महामते[3] नेदं स्थानं वि=द्यते॥ तत्रेदमुच्यते॥

मद्यं मांसं पलाण्डुं[4] न भक्षयेयं महामुने[5]।
बोधिसत्त्वैर्महासत्त्वैर्भाषद्भिर्जिनपुङ्गवैः॥१॥
अनार्यजुष्ट[6] दुर्गन्धमकीर्तिकरमेव च।
क्रव्यादभोजनं मांसं ब्रूह्य[7]भक्ष्यं महामुने[8]॥२॥
भक्ष्यमाणे च ये दोषा अभक्ष्ये तु[9] गुणाश्च[10] ये।
महामते निबोध त्वं ये दोषा मांसभक्षणे॥३॥
स्वाजन्याद्व्यभिचाराच्च शुक्रशोणितसंभवात्।
उद्वेजनीयं[11] भूतानां योगी मांसं विवर्जयेत्॥४॥
मांसानि च पलाण्डूंश्च[12] मद्यानि विविधानि च।
गृञ्जनं लशुनं चैव योगी नित्यं विवर्जयेत्॥५॥
म्रक्षणं वर्जयेत्तैलं शल्यविद्धेषु न स्वपेत्।

[1] सं=सन् [2] स्मि श्रा A. C. K. स्मिन् श्रा T. [3] In T. only.
[4] पलाण्डञ्च T. [5] महामते A. C. K. °मुने T. [6] दु K. [7] हि K.
[8] मुने A. C. T. मुणे K. [9] च K. T. [10] म्तु A. स्तु C. K. श्च T.
[11] य T. [12] डुंश्च A. C. K. ण्डुञ्च T.

छि[1]द्राच्छि[1]द्रेषु सत्त्वानां यच्च स्थानं महद्भयम्[2] ॥ ६ ॥
आहाराज्जायते दर्पः संकल्पो दर्प[3]संभवः ।
संकल्पजनितो रागस्तस्मादपि न भ[4]क्षयेत् ॥ ७ ॥
संकल्पाज्जायते राग[5]श्चित्तं रागेण मुह्यते ।
मूढस्य सङ्गतिर्भवति जायते न च[6] मुच्यते ॥ ८ ॥
लाभार्थं [7]हन्यते सत्त्वो मांसार्थं दीयते धनम् ।
उभौ तौ पापकर्माणौ[8] पच्येते रौरवादिषु ॥ ९ ॥
यो ऽतिक्रम्य मुनेर्वाक्यं[9] मांसं भ[10]क्षति दुर्मतिः ।
लोकद्वयविनाशार्थं दीक्षितः शाक्यशासने ॥ १० ॥
ते यान्ति[11] परमं घोरं[12] नरकं पापकर्मिणः[13] ।
रौरवादिषु रौद्रेषु पच्यन्ते मांसखादकाः ॥ ११ ॥
[14]त्रिकोटिशु[15]द्धमांसं वै अकल्पितमयाचितम् ।
अचोदितं च नैवास्ति तस्मान्मांसं न भक्षयेत्[16] ॥ १२ ॥
मांसं न भक्षयेद्योगी मया बुद्धैश्च गर्हितम्[17] ।
अन्योन्यभक्षणाः[18] सत्त्वाः[19] क्रव्यादकुलसंभवाः ॥ १३ ॥
दुर्गन्धि[20]कुत्सनीयश्च[21] उन्मत्तश्चापि जायते ।

[1] नि T. [2] येम K. This quarter does not agree with the Tib. version. [8] द्रव्य T. [4] क्ष्य T. [5] गः चि in all MSS. [6] वै च without न in T. [7] र्थे घात्य T. [8] णो T. [9] वाच्यं T. [10] क्षत T. [11] तेषां ते T. [12] नं A. C. [13] णाः K. [14] तृ A. C. K. त्रि T. [15] द्धं A. C. K. द्ध T. [16] From त् till येद् left out in K. [17] ताः T. [18] क्ष्यनाः A. C. K. क्षणाः T. [19] त्वा A. C. त्त्वाः K. T. [20] न्धः T. [21] याश्च A. C. यश्च K. यच्च T.

चं[1]ण्डालपुक्कसकुले डोम्बेषु च पुनः पुनः ॥१४॥
डाकिनीजातियोन्याश्च मांसादे[2] जायते कुले ।
रा[3]क्षसीमार्जारयोनौ च जायते ऽसौ नरो ऽधमः[4] ॥१५॥
हस्तिकक्ष्ये[5] महामेघे निर्वाणा[6]ङ्गुलिमालिके ।
लङ्कावतारसूत्रे च मया मांसं विवर्जितम् ॥१६॥
बुद्धैश्च बोधिसत्त्वैश्च श्रावकैश्च विगर्हितम्[7] ।
खादते यदि नैर्लज्ज्यादुन्मत्तो[8] जायते सदा ॥१७॥
ब्राह्मणेषु च जायेत[9] अथ वा योगिनां कुले ।
प्रज्ञावान्धनवांश्चैव मांसाद्यानां[10] विवर्जनात् ॥१८॥
दृष्टश्रुतविशङ्काभिः सर्वमांसं विवर्जयेत् ।
तार्किका ना[11]वबुध्यन्ते क्रव्यादकुलसंभवाः ॥१९॥
यथैव रागो मोक्षस्य अन्तरायकरो भवेत् ।
तथैव मांसमद्याद्या अन्तरायकरो [12]भवेत् ॥२०॥
व[13]क्ष्यन्त्यनागते काले मांसादा मोहवादिनः ।
कल्पिकं[14] निरवद्यं च मांसं बुद्धानुवर्णितम् ॥२१॥
भैषज्यं मांसमाहा[15]रं पुत्रमांसोपमं पुनः ।

[1] चा T. [2] सदो A. C. सादो K. सादे T. Tib. [3] रक्षो A. C. रक्षा K. राक्षसे T. [4] र्म्मः K. [5] कच्छे A. C. कक्षे K. T. but °कक्ष्य (象腋經) [6] निर्माणा A. C. निर्म्मा K. निर्वाणे ङ्गु T. [7] विवर्जितं T. [8] ज्जदुन्मंतो K. नैलज्ञादुन्मत्तो T. [9] यते T. [10] मान्सप्वादि T. [11] नानु K. नान्त T. [12] कराङ्ग A. करा भ C. करो भ K. T. [13] वक्षंत्य C. वक्ष्यंत T. [14] त T. [15] ज्यवदाहा A. C. K. ज्यं मांसमाहा T.

मान्यया प्रतिकूलं च योगी पिण्डं समाचरेत्[1] ॥२२॥
मैत्रीविहारिणां[2] नित्यं सर्वथा[3] गर्हितं[4] मया ।
सिंहव्याघ्रवृकाद्यैश्च[5] सह एकत्र संभवेत्[6] ॥२३॥
तस्मान्न भक्षयेन्मांसमुद्वेजनकरं नृणाम् ।
मोक्षधर्मविरुद्धत्वादार्याणामेष[7] वै ध्वजः[8] ॥२४॥

इति[9] लङ्कावतारात्सर्वबुद्धप्रवचनहृदयान्मांसभक्षणपरि=[10]
वर्तो ऽष्टमः ॥

[1] पिण्ड समो T. [2] णा A. C. K. णां T. [3] सर्वतायाा T. [4] गत T.
[5] मृगा in all MSS., but T. Tib. [6] सवसेत् T. [7] नि T. [8] जं K.
[9] आर्य for इति in T. [10] यो K.

अथ खलु भगवान्महामतिं बोधिसत्त्वं महासत्त्व[1]मा=
मन्त्रयते स्म । उद्गृह्ण[2] त्वं महामते लङ्कावतारे मन्त्रपदा=
नि यान्यतीतानागतप्रत्युत्पन्नैर्बुद्धैर्भगवद्भिर्भाषितानि भा=
षन्ते[3] भाषिष्यन्ते च[4] । अहमप्येतर्हि भाषिष्ये[5] धर्मभाणका=
नां परिग्रहार्थम् । तद्यथा । तुट्टे २ । वुट्टे २ । पट्टे २ ।
कट्टे २ । अमले २ । विमले २ । निमे २ । हिमे २ ।
वमे २ । कले[6] २ । कले[7] २ । अट्टे मट्टे । वट्टे तुट्टे । [8]ड्ढेट्टे
स्पुट्टे । कट्टे २ । लट्टे पट्टे । [9]दिमे २ । चले[10] २ । पचे
पचे । बन्धे[11] २ । अञ्चे मञ्चे[12] । दुतारे[13] २[14] । पतारे[15] २ ।
अर्के[16] २ । सर्के[17] २ । चक्रे[18] २ [7]। दिमे २ । हिमे २ । टु टु
टु टु । ४ । डु डु डु डु[19] । ४ । रु रु रु रु[20] । ४ । फु फु फु फु[21] । ४ ।
स्वाहा ॥

[1] महासत्त्व left out in T. [2] हू A. C. K. ह्रू T. [3] Left out in T.
[4] भा° च left out in A. च id. in C. T. च in K. only. [5] भाषे A. C. K. [6] ह्ले K.
[7] Left out in T. [8] फु K. [9] हिमे is put in before दिमे in Tib. [10] व A.
[11] भन्दे Tib. [12] अंचे मंचे A. C. K. मुञ्चे मुञ्चे T. [13] दुडारे धुडारे Tib.
[14] पुर for २ in T. [15] पदारे Tib. [16] अर्कें अर्कें T. अक्के Tib. [17] मर्कें मर्कें T. मक्के Tib. [18] चक्के Tib. [19] धु (4 times) T. ठु (4 times) Tib.
[20] तु (4 times) A. डु (4 times) Tib. [21] हु (4 times) A. ढु (4 times) Tib.

इमानि महामते मन्त्रपदानि लङ्कावतारे[1] महायानसूत्रे यः कश्चिन्महामते कुलपुत्रो वा कुलदुहिता वेमानि मन्त्रपदान्युद्ग्रहीष्यति[2] धारयिष्यति[2] वाचयिष्यति[2] पर्यवाप्स्यति[2]। न तस्य[3] कश्चिदवतारं लप्स्यते[4]। देवो वा देवी वा[5]। नागो वा नागी वा। यक्षो वा यक्षी वा। असुरो वासुरी वा। गरुडो वा गरुडी वा। किंनरो वा किंनरी वा। महोरगो वा महोरगी वा। गन्धर्वो वा गन्धर्वी वा[6]। भूतो वा भूती वा। कुम्भाण्डो वा कुम्भाण्डी वा। पिशाचो वा पिशाची वा। ओस्तारको वौस्तारकी वा। अपस्मारो[7] वापस्मारी वा। राक्षसो वा राक्षसी वा। डाको वा डाकिनी[8] वा। ओजोहारो वौजोहारी वा। कटपूतनो[9] वा कटपूतनी[10] वा। अमनुष्यो वामनुष्यी वा। सर्वे ते ऽवतारं न लप्स्यन्ते। सचेद्विषमग्रहो भविष्यति[2] सो ऽस्याष्टोत्तरशताभिमन्त्रितेन[11] रोद[12]न्दनेकां[13][14] दिशं दृष्ट्वा यास्यति॥

पुनरपराणि महामते मन्त्रपदानि भाषिष्ये। तद्यथा। पद्मे पद्मदेवे[15]। हिने[16] हिनि[17] हिने[18]। चु[19] चुले चुलु[20] चुले[21]।

[1] र A. C. रे K. T. [2] न्ति T. [3] तस्य न T. [4] न्ते T. [5] ता T.
[6] The 4 words left out in T. [7] स्मा A. [8] डाकी T. [9] पूतरो A. [10] पूतरी A.
[11] भि A. C. K. नि T. [12] रु T. [13] नो ० in all MSS. [14] कं T. [15] पद्मे without देवे in K. पद्मदेव T. [16] हिवे K. [17] हिन Tib. [18] निहे निह निहे T.
[19] चु left out in T. Tib. [20] चुलु left out in K. चुल T. चुला Tib. [21] २ is added in K.

[1]फले फुल फुले[2]। युले घुले[3] युल[4] युले[4]। घुले[4] घुल[4] घुले[4]। पले[5] पल[6] पले[6] । मुञ्चे[7] ३[8] च्छिन्दे भिन्दे भञ्जे मर्दे[9] प्रमर्दे दिनकरे स्वाहा ॥

इमानि महामते मन्त्रपदानि यः कश्चित्कुलपुत्रो वा कुलदुहिता वो[10]द्ग्रहीष्यति[11] धारयिष्यति[11] वाचयिष्यति[11] पर्य=वाप्स्यति[11] । तस्य न कश्चिदवतारं लप्स्यते[12] । देवो वा देवी वा । नागो वा नागी वा । यक्षो वा यक्षी वा । असुरो वासुरी वा । गरुडो वा गरुडी वा । किंनरो वा किंनरी वा । महोरगो वा महोरगी वा । गन्धर्वो वा गन्धर्वी वा । भूतो वा भूती वा । कुम्भाण्डो वा कुम्भा=ण्डी वा । पिशाचो वा पिशाची वा । ओस्तारको वौ=स्तारकी वा । अपस्मारो वापस्मारी वा । राक्षसो वा राक्षसी वा । डाको वा डाकिनी[13] वा । ओजोहरो वौ=जोहरी वा । कटपू[14]तनो वा कटपू[14]तनी वा । मनुष्यो वा=मनुष्यो[15] वा । [16]सर्वे ते ऽवतारं न[17] लप्स्यन्ते । य इमानि मन्त्रपदानि पठिष्यति । तेन लङ्कावतारसूत्रं पठितं भवि=

[1] हु A. adds ३ [2] फुल फुले in T. only. हुले हुल हुले Tib. [3] ३ is added after युले and घुले in A. C. K. [4] In T. only; while Tib. reads युले युल युले । only, leaving घुले २ घुल घुले । [5] ३ is added in A. C. K. [6] In T. only. [7] मुच्चे A. [8] Left out in C. K. Tib. [9] च्छिन्धे भिन्धे भञ्छे मर्ते Tib. [10] द्गृ A. C. K. द्ग्र T. [11] न्ति T. [12] न्ते T. [13] डाकी T. [14] ट C. K. [15] ष्यी T. [16] अमनुष्यो वा अमनुष्यी वा is added in T. [17] Left out in T.

ष्यति[1]। इमानि भगवता[2] मन्त्रपदानि भाषितानि राक्ष[3]सानां निवारणार्थम् ॥[4]

इति[5] लङ्कावतारे[6] धारणीपरिवर्तो नाम[7] नवमः ॥

[1] न्ति T. [2] This word is put in after मन्त्रपदानि in A. C. [3] सी T. [4] T. puts a Gāthā here instead of the beginning of the next chapter, while A. C. K. have it there. [5] आर्य for इति in T. Both left out in K. [6] र T. [7] Left out in A. C.

लङ्कावतारसूत्रोक्तं गाथारत्नमयं शृणु ।
महायाननयं[1] चित्रं[2] दृष्टिजालविघातनम्[3] ॥

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् ॥[4]

उत्पादभङ्गरहितो लोकः [5]खपुष्पसंनिभः ।
सदसन्नोपलब्धो ऽयं प्रज्ञया कृपया च ते ॥१॥
शाश्वतोच्छेदवर्जश्च लोकः स्वप्नोपमः सदा ।
सदसन्नोपलब्धो ऽयं प्रज्ञया कृपया च ते ॥२॥
मायोपमाः सर्वधर्माश्चित्तविज्ञानवर्जिताः ।
सदसन्नोपलब्धास्ते प्रज्ञया कृपया च ते ॥३॥
धर्मपुद्ग[6]लनैरात्म्यं क्लेशज्ञेयं च ते सदा ।
विशुद्धमनिमित्तेन[7] प्रज्ञया कृपया च ते ॥४॥
न निर्वासि [8]न निर्वाणे [9]न निर्वाणं त्वयि [10]स्थित[11]म् ।
बुद्धिबोद्धव्यरहितं सदसत्पक्षवर्जितम् ॥५॥

[1] यानं न without यं in K. [2] त्र A. C. K. त्रं T. [3] घातनं A. घाटनं C. K. घज्ञनं T. [4] In the Chinese versions the speaker of these verses is said to be the Bhagavān, not Mahāmati; and the first 6 verses are left out in (魏); and 9 in (唐). [5] खे T. [6] ल left out in T. [7] हेन A. च T. [8] शि त T. [9] त् T. [10] सं is added in K. [11] तः T.

ये पश्यन्ति मुनिं शान्तमेवमुत्पत्तिवर्जितम् ।
ते भवन्त्यनुपादाना इहामुत्र[1] निरञ्जनाः ॥ ६ ॥
मृगतृष्णा यथा ग्रीष्मे स्पन्दते[2] चित्तमोहनी ।
मृगा गृह्णन्ति[3] पानीयं वस्तु तस्य न[4] विद्यते ॥ ७ ॥
एवं विज्ञानबीजो[5] ऽयं स्पन्दते[6] दृष्टिगोचरे ।
बाला गृह्णन्ति जायन्तं तिमिरं तैमिरा यथा ॥ ८ ॥
ध्याता[7] ध्यानं च ध्येयं च प्रहाणं[8] सत्यदर्शनम् ।
कल्पनामात्रमेवेदं यो[9] बुध्यति स मुच्यति ॥ ९ ॥
असारका इमे धर्मा मन्यनायाः[10] समुत्थिताः[11] ।
साप्यत्र[12] मन्यना शून्या यया शून्येति मन्यते[13] ॥ १० ॥
जलवृक्षच्छाया[14]सदृशाः स्कन्धा[15]विज्ञानपञ्चमाः ।
मायास्वप्नोपमं दृश्यं विज्ञप्त्या न विकल्पयेत् ॥ ११ ॥
मायावेताडयन्त्राभं स्वप्नं विद्युद्घनं सदा ।
त्रिसंततिव्यवच्छिन्नं जगत्पश्यन्विमुच्यते ॥ १२ ॥
अयोनिशो विकल्पेन विज्ञानं संप्रवर्तते ।
अष्टधा नवधा चित्रं तरङ्गाणि महोदधौ[16] ॥ १३ ॥
वासनैर्बृंहितं नित्यं बद्ध्वा[17] मूलं स्थिराश्रयम्[18] ।

[1] इह पुत्र T. [2] न्ते T. [3] ह्ण A. C. K. ह्ल T. [4] चास्यावस्तु A. C. K. [5] विज्ञो K. बीजे T. [6] न्ते T. [7] ता K. [8] प्रदानं A. [9] या K. [10] न्य left out in A. C. [11] समुत्समुपत्थि A. [12] मा T. [13] न्ये A. C. [14] य K. जलागछा° ? [15] न्धाः T. [16] धेः T. [17] द्धु T. [18] निरायवा T.

भ्रमते[1] गोचरे चित्तमयस्कान्ते[2] यथायसम्[3] ॥१४॥
आश्रिता सर्वभूतेषु गोत्रभूस्तर्क[4]वर्जिता ।
निवर्तते क्रियामुक्ता ज्ञानज्ञेयविवर्जिता ॥१५॥
मायोपमं समाधिं च दशभूमिविनिर्गतम् ।
पश्यथ चित्तराजानं संज्ञाविज्ञानवर्जितम्[5] ॥१६॥
परावृत्तं यदा चित्तं तदा तिष्ठति[6] शाश्वतम् ।
विमाने पद्मसंकाशे मायागोचरसंभवे ॥१७॥
तस्मिन्प्रतिष्ठितो भ[7]वत्यनाभोगचरिं गतः ।
करोति सत्त्व[8]कार्याणि विश्वरूपा मणिर्यथा ॥१८॥
संस्कृतासंस्कृतं नास्ति अन्यत्र हि विकल्पनात् ।
बाला गृह्ण[9]न्ति धिङ्[10]मूढा बन्ध्याः स्वप्ने यथा सुतम् ॥१९॥
नैःस्वाभाव्यमनुत्पादो पुद्गलः स्कन्ध[11]संतति[12]ः ।
प्र[13]त्यया धातवो[14] ज्ञेया शून्यता च भवाभवम् ॥२०॥
उपायदेशना मह्यं नाहं देशेमि लक्षणम् ।
बाला गृह्ण[9]न्ति भावेन लक्षणं लक्ष्यमेव च ॥२१॥
सर्व[15]स्य वेत्ता न च सर्व[15]वेत्ता सर्व[15]स्य मध्ये न च सर्व[15]मस्ति ।
बाला विकल्[16]पेन्ति बुध[17]श्च लोको न चापि बुध्यामि न च[18] बोधयामि ॥२२॥

[1] न्ते T. Tib. [2] त K. ते T. [3] शं K. शयं T. [4] त T.
[5] तां T. [6] न्ति T. [7] भा T. [8] सर्व T. [9] ह्र A. C. K. ह्ण T.
[10] दिग्मू K. [11] न्धः T. [12] तिं T. [13] त्र T. [14] वा A. C.
वो K. T. [15] सत्त्व A. C. K. सर्व T. [16] ल्प A. C. K. ल्पे T.
[17] ध्ये K. द्धे T. [18] Left out in A. C.

प्रज्ञप्तिर्नाममात्रे[1]यं लक्षणेन न विद्यते ।
स्कन्धाः केशोण्डु[2]काकारा यत्र बालैर्विकल्प्यते[3] ॥२३॥
नाभूत्वा जायते किंचित्प्रत्ययैर्न विनश्यते ।
बन्ध्यासुताकाशपुष्पं[4] यदा पश्यति[5] संस्कृतम् ।
तदा ग्राहश्च[6] ग्राह्यं च भ्रान्तिं[7] दृष्ट्वा[8] निवर्तते ॥२४॥
नाहं निर्वामि भावेन क्रियया[9] लक्षणेन[10] च ।
विकल्पहेतुविज्ञाननिवृत्तेर्निर्वृतो[11] ह्यहम् ।
(न विनश्यति लक्षणं यत्र बालैर्विकल्प्यते)॥२५॥[12]
यथा क्षीणे महत्योघे[13] तरङ्गानामसंभवः ।
[14]तथा विज्ञानवैचित्र्यं निरुद्धं[15] न प्रवर्तते ॥२६॥
शून्याश्च निःस्वभावाश्च मायोपमा[16] अजातकाः[17] ।
सदसन्तो न विद्यन्ते भावाः स्वप्नोपमा इमे ॥२७॥
स्वभावमेकं देशेमि तर्कविज्ञप्तिवर्जितम् ।
आर्याणां गोचरं दिव्यं स्वभावद्वयवर्जितम् ॥२८॥

[1] त for मा in T. [2] ण्ड K. [3] ल्प T. [4] बन्ध्याकाशसुतापुष्पम् T. which seems to be better. [5] न्ति T. [6] च्च T. [7] भां K. न्ति T. [8] ष्टा T. [9] कियाय T. [10] लक्षणेन क्रियया K. [11] निर्वृत्तैर्निवृतो A. C. र्निवृतो (only) K. निर्वृत्तेनिर्वृते T. [12] Here one line seems to be left out in the text, so that we try to fullfill it by the strength of the Chinese (魏) version. —Koyasu. But it is left out also in Tib. [13] मभ्योघे A. महभ्योघे C. महदीघ्ये K. महाडेघ T. [14] य T. [15] भूढं A. [16] मो in all MSS. [17] न T.

खद्योता इव मत्तस्य[1] यथा चित्रा न सन्ति च ।
दृश्यन्ते धातुसंक्षोभादेवं[2] लोकः[3] स्वभावतः ॥ २९ ॥[4]
तृणकाष्ठकठल्लेषु[5] यथा माया विराजते ।
न[6] चासौ विद्यते माया एवं धर्माः स्वभावतः ॥ ३० ॥
न ग्राहको न च ग्राह्यं न बन्ध्यो[7] न च बन्धनम् ।
मायामरीचिसदृशं स्वप्नाख्यं[8] तिमिरं यथा ॥ ३१ ॥
यदा पश्यति[9] तत्त्वार्थी निर्विकल्पो निरञ्जनः ।
तदा योगं[10] समापन्नो[11] द्रक्ष्यते मां न संशयः[12] ॥ ३२ ॥
न ह्यत्र काचिद्विज्ञप्तिर्नभे यद्वन्मरीचयः ।
एवं धर्मान्विजानन्तो[13] न किंचित्प्रतिजानति ॥ ३३ ॥
सदसतः प्रत्ययेषु धर्माणां नास्ति संभवः ।
भ्रान्तं त्रैधातुके चित्तं विचित्रं ख्यायते यतः ॥ ३४ ॥
स्वप्नं च लोकं च समस्वभावं रूपाणि चित्राणि हि तत्र चापि ।
दृश्यन्ति भोगं स्परिशं समानं[14] देहान्तगं[15] लोकगुरुं[16] क्रियां[17] च ॥ ३५ ॥
चित्तं हि त्रैधातुकयोनिरेतत्[18] भ्रान्तं हि चित्तं ईहमुत्र[19] दृश्यते ।

[1] नि च मस्तस्य K. नि च मत्त T. [2] वं K. Tib. [3] कं T. [4] Verses 29, 30 are put in after v. 33 in Tib. [5] ल्ये K. [6] यथा for न चा in T. [7] बध्यो K. बंधा T. [8] खं हि K. [9] न्ति T. [10] तदा योगं A. C. °गी T. [11] समुत्पन्नो T. [12] यं T. [13] ना T. [14] पर्षन्स K. संत्येश T. [15] गं left out in T. [16] रुं T. Tib. [17] ता T. [18] यानिचे A. यांनिरे C. K. योनिरे T. [19] पुत्र K. पुत्रे T. Here it seems to be चित्तमिहामुत्र but if so, it does not agree with metre.

न कल्पयेल्लोकमसत्त[1] एषां एतादृशीं लोकगतिं विदित्वा[2] ॥३६॥
संभवं[3] विभवं चैव[4] मोहात्पश्यन्ति[5] बालिशाः ।
न संभवं न विभवं प्रज्ञायुक्तो विपश्यति ॥३७॥
अकनिष्ठभवने[6] दिव्ये सर्वपापविवर्जिते ।
निर्विकल्पाः सदा युक्ताश्चित्तचैत्तविवर्जिताः ॥३८॥
बलाभिज्ञावशिप्राप्ताः तत्समाधिगतिंगताः[7] ।
तत्र बुध्यन्ति संबुद्धा निर्मितस्त्विह बुध्यते ॥३९॥
निर्माणकोट्यो ह्यमिता[8] बुद्धानां निश्चरन्ति च ।
सर्वत्र बालाः शृण्वन्ति[9] धर्मं तेभ्यः प्रतिश्रुत्वा[10] ॥४०॥
आदिमध्यान्तनिर्मुक्तं भावाभावविवर्जितम् ।
व्यापिनमचलं[11] शुद्धमचित्रं[12] चित्रसंभवम्[12] ॥४१॥
विज्ञप्तिगोचरसंछन्नमालीनं सर्वदेहिनाम् ।
भ्रान्तेश्च[13] विद्यते माया न माया भ्रान्तिकारणम् ॥४२॥
चित्तस्य मोहेनाप्यस्ति[14] यत्किंचिदपि[15] विद्यते ।
स्वभावद्वय[16]नि[17]बद्ध[18]मालयविज्ञाननिर्मितम् ॥४३॥

[1] लो T. [2] गच्छेत अनन्तमशुभालयस्य ॥ is added in K. T. [3] व K.
[4] वश्चै T. [5] हा संश्य A. [6] अकनिष्ठालये ? [7] गतिं left out in K.
[8] व्यश्वा K. [9] णो K. [10] Left out in A. C. and K. T. add वदचिन्त्यं but वदा ?
[11] तं अ T. [12] त्र A. C. K. त्र T. [13] ति T. [14] हेना A. हना C. T.
हनो K. [15] पि left out in T. [16] वा T. [17] वि is added in K.
[18] बु A. बे C. ब K. T. संबद्धा for निबद्ध ?

लोकं[1] विज्ञप्तिमात्रं[2] च[3] दृष्ट्यौघं[4] धर्मपुद्गलम्[5] ।
विभाव्य लोकमेवं तु परावृत्तो यदा भवेत् ।
तदा पुत्रो भवेन्मह्यं निष्पन्न[6]धर्मवर्तकः ॥ ४४ ॥
उष्णद्रवचलकठिना[7] धर्मा बालैर्विकल्पिताः ।
असद्भूत[8]समारोपा[9] नास्ति लक्ष्यं न[10] लक्षणम् ॥ ४५ ॥
अष्टद्रव्यकमेतत्तु[11] कायसंस्थानमिंद्रियम् ।
रूपं कल्पन्ति[12] वै बाला भ्रान्ताः संसार[13]पञ्जरे ॥ ४६ ॥
हेतुप्रत्ययसामग्र्या[14]द्बालाः कल्प[15]न्ति संभवम् ।
[16]अजानाना[17]न्नयमिदं भ्रमन्ति त्रिभवालये[18] ॥ ४७ ॥
सर्वभावा[19]स्वभावा च व[20]चनमपि नृणाम्[21] ।
कल्पनाच्चापि[22] निर्माणं[23] नास्ति[24] स्वप्नोपमं[25] भवम् ।
----परीक्षेन संसरे[26]न्नापि निर्वा[27]यात् ॥ ४८ ॥

[1] क T. [2] त्र T. [3] च left out in T. [4] ष्टौ T. [5] संचर is added in K. and T. reads लसंचरं [6] भविष्यन्नो A. [7] ण्ठि T. कठिनोष्णद्रवचला ? [8] असंभू A. [9] पा A. C. K. पो T. [10] नास्त्य for नास्ति लक्ष्यं न in T. [11] व्यैकमेतं तु A. °तत्तु C. द्रव्यकमेतं तु K. °कं तु T. [12] कल्प K. कल्पेन्ति T. [13] संमन K. [14] ग्र्यात वा K. ग्र्याः बा T. [15] ल्पे T. [16] The following three lines are rendered in Tib. as one verse of the Triṣṭubh. But it is hard to restore. [17] अज्ञा° A. अजानानां न C. °नं न K. °ना न T. Tib. [18] यं T. [19] वां स्व K. वा अस्व T. [20] व left out in A. C. [21] One syllable is wanting here in this quarter. [22] नाच्चापि left out in T. [23] निवाणं A. C. K. निर्माण T. [24] नास्ति निर्वाणं K. [25] स्वप्नतुल्यं K. °ल्य T. [26] संसारेना T. [27] र्वा left out in K.

चित्तं विचित्रं वीजाख्यं ख्यायते चित्तगोचरम्[1] ।
ख्यातौ कल्पन्ति[2] उत्पत्तिं बाला[3]: कल्पद्वये[4] रताः ॥ ४९ ॥
अज्ञानतृष्णाकर्मं च चित्तचैत्ता[5] न मारकम्[6] ।
प्रवर्तति ततो[7] यस्मात्पारतन्त्र्यं हितं मया[8] ॥ ५० ॥
ते च कल्पन्ति[9] यद्वस्तु[10] चित्तगोचरविभ्रमम् ।
कल्पनायाम[11]निष्पन्नं मिथ्याभ्रान्ति[12]विकल्पितम् ॥ ५१ ॥
चित्तं प्रत्ययसंबद्धं[13] प्रवर्तति[14] शरीरिणाम्[15] ।
प्रत्ययेभ्यो विनिर्मुक्तं न पश्यामि वदाम्यहम् ॥ ५२ ॥
प्रत्ययेभ्यो विनिर्मुक्तं स्वलक्षणविवर्जितम्[16] ।
न तिष्ठति यदा देहे तेन मह्यमगोचरम् ॥ ५३ ॥
राजा श्रेष्ठी यथा[17] पुत्रान्विचित्रैर्मृगसादृशैः ।
प्रलोभ्य[18] क्रीडति गृहे[19] वने मृगसमागमम् ॥ ५४ ॥
तथाहं लक्षणैश्चित्रै[20]र्धर्माणां प्रतिविम्बकैः ।
प्रत्यात्मवेद्यां[21] [22]हि सुतां भूतकोटिं वदाम्यहम् ॥ ५५ ॥
तरंगा[23] ह्युदधेर्यद्वत्पवनप्रत्ययोदिताः ।
नृत्यमानाः प्रवर्तन्ते व्युच्छेदश्च न विद्यते ॥ ५६ ॥

1 री K. 2 ल्पे T. 3 बी K. 4 य K. 5 वेन्तिचित्ता T. 6 माकरं K. This puarter seems to be incorrect. 7 न्ते यतो T. 8 मयां T. हि तन्मतम् Tib. 9 ल्पे K. T. 10 स्तुं T. 11 स A. C. K. म T. 12 याभा K. 13 बन्ध T. 14 ति A. C. K. न्ति T. 15 रिरी K. 16 कल्पि T. 17 दा T. 18 भ्य A. C. K. Tib. भ्यः T. 19 क्रीड्य च गेहे K. °ड्यं च गृहे T. 20 त्रं K. 21 द्यं T. 22 न is added in K. 23 गयु T.

आलयौघस्तथा नित्यं विषयपवनेरितः[1] ।
चित्रैस्तरंगविज्ञानैर्नृत्यमानः[2] प्रवर्तते ॥५७॥
ग्राह्य[3]ग्राहक[4]भावेन चित्तं[5] नमति[6] देहिनाम् ।
दृश्यस्य लक्षणं नास्ति यथा बालैर्विकल्प्यते ॥५८॥
परमालयविज्ञानं विज्ञप्तिरालयं[7] पुनः ।
ग्राह्यग्राहकापगमा[8]त्तथतां देशयाम्यहम् ॥५९॥
नास्ति स्कन्धेष्वात्मा[9] न सत्त्वो न च पुद्गलः[10] ।
उत्पद्यते च विज्ञानं विज्ञानं च निरुध्यते ॥६०॥
निम्नोन्नतं यथा चित्रे दृश्यते न च विद्यते ।
तथा भावेषु भावत्वं दृश्यते न च विद्यते ॥६१॥
गन्धर्वनगरं यद्वद्यथा च मृगतृष्णिका[11] ।
दृश्यं ख्याति तथा नित्यं प्रज्ञया च न विद्यते ॥६२॥
प्रमाणेन्द्रियनिर्वृत्तं[12] न कार्यं नापि कारणम् ।
बुद्धिबोद्धव्यरहितं लक्ष्य[13]लक्षणवर्जितम् ॥६३॥
स्कन्धात्प्रतीत्यसंबुद्धो न दृष्टः केनचित्क्वचित् ।
यो न दृष्टः क्वचित्केन कुतस्तस्य विभावना ॥६४॥
प्रत्ययैर्हे[14]तुदृष्टान्तैः प्रतिज्ञा कारणेन च ।

[1] ताः A. C. तः K. T. [2] चित्तं A. C. चित्तैः K. चित्रैस्त T. [3] ह्या K. [4] के A. क C. K. T. Tib. [5] चिन्न K. [6] विशति Tib. [7] ना. T. [8] ग्राहग्राह्याप A. C. K. ग्राह्यग्राहकोप T. [9] स्कंधेषिवात्मानं T. स्कन्धेषु आत्मा च ? [10] वः A. [11] काः T. [12] °यं विनिवृत्तं A. C. K. °यनिर्वृत्तं T. °यव्यावृत्तं Tib. [13] क्ष्यं T. [14] प्रत्यक्षैर्हे A. C. K. °यैर्हे. T.

स्वप्नगन्धर्वचक्रेण[1] मरीच्या[2] सोमभास्करैः[3] ॥ ६५ ॥
अदृश्यं कुला[4]दिदृष्टान्तै[5]रुत्पत्तिं वा[6]दयाम्यहम् ।
स्वप्नविभ्रममाया[7]ख्यं शून्यं वै कल्पितं जगत् ॥ ६६ ॥
अनाश्रितश्च त्रै[8]लोक्य[9] अध्यात्मं च बहिस्तथा ।
अनुत्पन्नं भवं दृष्ट्वा क्षा[10]न्त्यनुत्पत्तिर्जा[11]यते ॥ ६७ ॥
मायोपमसमाधिं च कायं मनोमयं पुनः ।
अभिज्ञा वशिता तस्य ब[12]ला चि[13]त्तस्य चि[14]त्रिता ॥ ६८ ॥
भावा[15] येषां ह्यनुत्पन्नाः शून्या वै अस्वभावकाः ।
तेषामुत्पद्यते भ्रान्तिः प्रत्ययैश्च निरुध्यते ॥ ६९ ॥
चित्तं[16] हि ख्याति चित्तस्य बहिर्धा[17] ख्याति रूपिणः[18] ।
अन्यन्न विद्यते दृश्यं यथा बालैर्विकल्प्यते ॥ ७० ॥
संक[19]ला[20]बुद्धबिम्बं[21] च भूतानां च विदारणम् ।
अधिष्ठन्ति जगच्चित्रं[22] प्रज्ञप्ता वै सु[23]शिक्षिताः ॥ ७१ ॥
देहः प्रतिष्ठा भोगश्च ग्राह्य[24]विज्ञप्तय[25]स्त्रयः ।
मनउद्ग्रहविज्ञप्तिविकल्पो ग्राहकास्त्र[26]यः ॥ ७२ ॥

[1] चित्रेण A. C. K. चक्रेण T. [2] चा T. [3] रौ A. C. रौः K. रैः T.
[4] अन्यङ्कुरा T. अर्च्यङ्कुरा (唐) Tib. [5] न्त T. [6] र K. नाम T.
[7] या left out in T. [8] तै K. [9] क्ये A. C. K. क्य T. °श्रितं च त्रैलोक्ये Tib.
[10] ष्टांतान्म A. °त्या T. [11] जा T. [12] बा T. [13] श्चि T. [14] त्त T. [15] व T.
[16] त्तं K. [17] र्द्धा A. र्द्धा C. र्द्धा K. र्धा T. [18] ण T. [19] शंक A. C. K. सङ्क T.
[20] वुद्धि A. C. K. बुद्ध T. [21] विंविं A. [22] त्तं A. C. K. [23] स T. [24] ह्या A. C. K.
[25] प्ततं च A. C. प्ततयं च K. प्तियस्त्र T. [26] कां च A. C. K. ह्यकास्त्र T.

विकल्पश्च विकल्प्यं च[1] यावत्त्वं[2]क्षरगोचरम् ।
तावत्तत्त्वं न पश्यन्ति तार्किका[3]स्तर्कविभ्रमात् ॥ ७३ ॥
नैःस्वभाव्यं हि भावानां यदा बुध्यन्ति[4] प्रज्ञया ।
त[5]दा विश्रम[6]ति योगी आनिमित्तप्रतिष्ठितः ॥ ७४ ॥
मसिम्रक्षितको[7] यद्वद्गृह्यते[8] कुर्कुटो[9] ऽबुधैः ।
स एवायमजानानैर्बालै[10]र्यानत्रयं तथा ॥ ७५ ॥
न ह्यत्र श्रावकाः[11] केचिन्नास्ति प्रत्येकयानिकाः ।
यच्चैतद्दृ[12]श्यते रूपं श्रावकस्य जिनस्य च ।
निर्माणं दे[13]शयन्त्येते बोधिसत्त्वाः[14] कृपात्मकाः[15] ॥ ७६ ॥
विज्ञप्तिमात्रं त्रिभवं स्वभावद्वयकल्पितम् ।
परावृत्तस्तु[16] तथता धर्मपुद्गलसंचरात्[17] ॥ ७७ ॥
सोमभास्करदीपार्चिर्भू[18]तानि मणयस्[19]तथा ।
निर्विकल्पाः प्रवर्तन्ते तथा बुद्धस्य बुद्धता ॥ ७८ ॥
केशोण्डुकं यथा मिथ्या[20] गृह्यन्ते तैमिरैर्जनैः ।
तथा भावविकल्पो ऽयं मिथ्या बालैर्विकल्प्यते ॥ ७९ ॥
स्थितिभङ्गोत्पत्तिरहिता[21] नित्यानित्यविवर्जिताः ।

[1] त्सच्च T. [2] त्त्व A. C. त्प K. द T. [3] ता T. [4] पश्यन्ति T. [5] य A. [6] पश्य A. C. K. भ्रम T. [7] मषिमक्षिवक्तो T. [8] न्ते T. [9] टा A. [10] जानैर्वानै A. C. जानानै वीनै K. जानानैवालैनै T. [11] का K. [12] द्दू T. [13] निर्वाणदर्श T. [14] त्त्वा K. [15] का T. [16] वृत्तिस्तस्य A. C. K. [17] रा A. C. K. राः T. रात् Tib. [18] भि T. [19] मनस्त T. [20] शिष्यो A. C.

[21] This quarter agrees with Tib., but the metre is not right.

संक्लेशव्यवदानाख्या भावाः केशोण्डुकोपमाः ॥८०॥
पुत्तलिकं[1] यथा कश्चित्कनकाभं पश्यते जगत्[2]।
न[3] ह्यस्ति कनकं तत्र भूमिश्च[4] कनकायते ॥८१॥
एवं हि दूषिता बालाश्चित्तचैत्तैरनादिकैः।
मायामरीचिप्रभवं भावं[5] गृह्णन्ति[6] तत्त्वतः ॥८२॥
एकवीजमवीजं[7] च समुद्रेकं[8] च वीजकम्[9]।
सर्ववीजकमप्येतच्चित्तं[10] पश्यथ[11] चित्रिकम्[12] ॥८३॥
एकं[13] वीजं[14] यदा[15] शुद्धं परावृत्तमवीजकम्।
समं हि निर्विकल्पत्वादुद्रेकाज्जन्मसंकरः[16]।
वीजमावहते[17] चित्रं सर्ववीजं तदुच्यते ॥८४॥
न ह्यत्रोत्पद्यते किंचित्प्रत्ययैर्न निरुध्यते।
उत्पद्यन्ते[18] निरुध्यन्ते[19] प्रत्यया एव कल्पिताः[20] ॥८५॥
प्रज्ञप्तिमात्रं[21] त्रिभवं नास्ति वस्तु स्वभावतः।
प्रज्ञप्तिवस्तुभावेन[22] कल्पयिष्यन्ति[23] तार्किकाः ॥८६॥
भावस्वभावजिज्ञासा न हि[24] भ्रान्तिर्निवार्यते[25]।
भावस्वभावानुत्पत्तिरेवं दृष्ट्वा विमुच्यते ॥८७॥

[1] पुतृरिकं K. धान्धात्वारितो T. पित्तलिको or धात्वीरितो ? [2] म् K. [3] म A. C. [4] स्तु T. Tib. [5] भ T. [6] गृह्णंति A. C. K. गृह्णन्ति T. [7] व्वी T. [8] समोद्रेकं Tib. [9] कवीजकं A. C. K. कं च वीजनां T. [10] चि T. [11] न्ति T. [12] तं K. T. [13] क. K. T. [14] ज K. [15] था T. [16] समुद्रे T. [17] वा T. [18] ते K. T. [19] ते K. [20] केवलाः T. [21] त्रं T. Tib. [22] प्तिं T. [23] ति A. C. T. न्ति K. [24] Left out in T. [25] विभ्राव्यते T.

न माया नास्तिसाधर्माद्भावानां[1] कथ्यते ऽस्तिता ।
वितथाशु विद्युत्सदृशास्तेन[2] मायोपमाः स्मृताः ॥ ८८ ॥
न चोत्पद्या[3] न चोत्पन्नाः प्रत्ययो ऽपि न केचन ।
संविद्यन्ते क्वचित्तेन व्यवहारं[4] तु कथ्यते ॥ ८९ ॥
न भङ्गोत्पादसंक्लेशः प्रत्ययानां निवार्यते ।
यत्तु[5] बाला विकल्पेन्ति[6] प्रत्ययैः संनिवार्यते[7] ॥ ९० ॥
न स्वभावो न विज्ञप्तिर्न वस्तु न च आलयः ।
बालैर्विकल्पिता ह्येते वशभूतैः[8] कुतार्किकैः ॥ ९१ ॥
चित्तमात्रं यदा लोकं प्रपश्यन्ति जिनात्मजाः[9] ।
तदा नैर्वाणिकं[10] कायं क्रियासंस्कार[11]वर्जितम् ।
लभन्ते ते बलाभिज्ञावशितैः सह संयुतम्[12] ॥ ९२ ॥
सर्वरूपावभासं[13] हि यदा चित्तं प्रवर्तते ।
नात्र[14] चित्तं न रूपाणि भ्रान्तं[15] चित्त[16]मनादिकम् ॥ ९३ ॥
तदा योगी ह्यनाभासं प्रज्ञया[17] पश्यते जगत् ।
निमित्तं वस्तु विज्ञप्तिर्मनो[18]विस्पन्दितं च[19] यत् ।

[1] साधर्मा न भा A. C. K. साधर्माद्भा T. भायाना°साधर्म्याद्भा Tib. [2] शाते A. C. दृशा ते K. सास्ते T. [3] त्मा T. [4] क्वचित्केचिद्य T. Tib. [5] यंत्तु T. [6] कल्प्यंति A. कल्पंति C. कल्पेर्ति K. कल्पन्ति T. [7] द्वा K. [8] सर्व T. शव Tib. [9] जं T. [10] नैयायिकं T. नैकायिकं Tib. [11] संस्याव T. [12] युताः T. [13] पं T. [14] या T. [15] न्त K. T. [16] चित्त left out in T. [17] ज्ञा T. [18] म A. C. K. र्म T. प्तिं म Tib. [19] तं च A. C. त च K. तत्व T.

अतिक्रम्य तु पुत्रा मे[1] निर्विकल्पाश्चरन्ति ते[2] ॥९४॥
गन्धर्वनगरं माया[3] केशो[4]ण्डुक[5]मरीचिका[6] ।
असत्या[7]: सत्यत: ख्यान्ति[8] तथा भावेषु भावनाम्[9] ॥९५॥
अनुत्पन्ना: सर्वभावा[10] भ्रान्तिमात्रं हि दृश्यते ।
भ्रान्तिं कल्पेति[11] उत्पन्नां[12] बाला: कल्पद्वये[13] रता: ॥९६॥
औपपत्त्यङ्गिकं चित्तं विचित्रं[14] वासनासंभवम्[15] ।
प्रवर्तते तरङ्गौघं[16] तच्छेदान्न[17] प्रवर्तते ॥९७॥
विचित्रा[18]लम्बनं चित्रं[19] यथा चित्ते प्रवर्तते ।
तथाकाशे[20] च कुड्ये च कस्मान्ना[21]भिप्रवर्तते ॥९८॥
निमित्तं किंचिदालम्ब्य[22] यदि चित्तं प्रवर्तते ।
प्रत्ययैर्जनितं चित्तं चित्तमात्रं[23] न युज्यते ॥९९॥
चित्तेन गृह्यते चित्तं नास्ति किंचित्सहेतुकम् ।
चित्तस्य धर्मता शुद्धा गगने नास्ति वासना ॥१००॥
स्वचित्ताभिनिवेशेन चित्तं वै संप्रवर्तते ।
बहिर्धा नास्ति वै दृश्यमतो वै चित्तमात्रकम् ॥१०१॥

[1] मै T. [2] कै T. [3] या: T. [4] क्ले A. [5] स A. C. [6] का: T. [7] न्ता: T. [8] न्त: ख्याति T. [9] ना A. C. K. नां T. भावता Tib. [10] भाव्य K. [11] कल्पति A. C. कल्पेति K. कल्ति T. [12] उत्पलानां T. [13] य K. [14] Left out in T. [15] न संभेत् K. नं संस्रवं T. चित्रं वासनसंभवम् or वास=नाचित्रसंभवम् ? [16] घ तस्य T. [17] दान्न्र T. [18] त्मं A. [19] त्तं A. C. त्त K. त्रं T. [20] सेर K. शेर T. [21] कस्या ना T. [22] दांतंव्य A. [23] त्र T.

चित्तमालयविज्ञानं मनो यन्मन्यना[1]त्मकम् ।
गृह्णा[2]ति विषयान्येन विज्ञानं हि तदु[3]च्यते ॥ १०२ ॥
चित्तमव्याकृतं नित्यं मनो ह्युभयसंचरम् ।
वर्तमानं हि विज्ञानं कुशलाकुशलं हि तत्[4] ॥ १०३ ॥
द्वारं हि परमार्थस्य विज्ञप्तिद्वयवर्जितम्[5] ।
यानत्रय[6]व्यवस्थानं निराभासे स्थितं[7] कुतः ॥ १०४ ॥
चित्तमात्रं[8] निराभासं विहारा[9] बुद्धभूमिश्च[10] ।
एतद्धि भाषितं बुद्धैर्भाषन्ते[11] भाषयन्ति[12] च ॥ १०५ ॥
चित्तं हि भूमयः सप्त निराभासा च[13] अष्टमी ।
द्वौ भूमयो[14] विहारा[15]श्च शेषा भूमिर्ममात्मिका[16] ॥ १०६ ॥
प्रत्या[17]त्मवेद्या[18] शुद्धा च[19] भूमिश्चापि ममात्मिका[16] ।
माहेश्वर[20]परस्थानमकनिष्ठे[21] वि[22]राजते ॥ १०७ ॥
हुताशनस्यै[23]व यथा निश्चेरुस्तस्य[24] रश्मयः ।
चित्रा मनोहराः[25] सौम्यास्त्रि[26]भवं निर्मिणन्ति ये ॥ १०८ ॥

[1] यत्मना K. मन्यमा T. [2] ह्णा A. C. K. ह्णा T. [3] तमु A. C. K. तदु T. [4] लं चरेत् A. C. लसंचरत् K. लं हि तत् T. [5] ती K. [6] त्र left out in K. [7] थे स्थिते T. [8] रं A. Left out in K. [9] रा A. रो C. K. रं T. [10] मि च A. C. T. मिः च K. [11] भाष्यन्ते T. [12] भाषयिष्य K. [13] तु T. [14] भूमौ A. C. K. भूमयो T. द्वे भूमी ये ? [15] रं T. [16] काः T. [17] प्रत्यया K. [18] द्यं A. C. K. द्य T. द्या Tib. [19] चा T. भूमिः सा हि ? Tib. [20] महेश्वरं पदं T. [21] ष्ठं T. [22] नि K. [23] स्य हि T. [24] च is added in K. [25] मनोरमो T. [26] म्यां त्रि A. C. म्याः त्रि K. म्यास्त्रि T.

निर्माय त्रिभवं किंचित्किंचिद्वै[1] पूर्वनिर्मितम् ।
तत्र देशन्ति यानानि एषा भूमिर्ममात्मिका[2][3] ॥१०९॥
नास्ति कालो ह्यधिगमे[4] भूमीनां क्षेत्रसंक्रमे[5] ।
चित्तमात्रमतिक्रम्य[6] निराभासे[7] स्थितं[8] फलम् ॥११०॥
असत्ता चैव सत्ता च[9] दृश्यते च विचित्रता[10] ।
बाला ग्राहविपर्यस्ता[11] विपर्यासं[12] विचित्रतः[13] ॥१११॥
निर्विकल्पं[14] यदि ज्ञानं वस्त्वस्तीति न युज्यते ।
यस्माच्चित्तं[15] न रूपाणि निर्विकल्पं हि तेन[16] तत्[17] ॥११२॥
इन्द्रियाणि च मायाख्या[18] विषयाः स्वप्नसंनिभाः ।
कर्ता कर्मक्रिया चैव सर्वथापि[19] न विद्यते ॥११३॥
ध्यानानि चाप्रमाणानि आरूप्याश्च[20] समाधयः ।
संज्ञानिरोधो निखिलश्चित्तमात्रे[21] न विद्यते ॥११४॥
स्रोतापत्तिफलं चैव सकृदागामिफलं तथा[22] ।
अनागमिफलं चैव अर्हत्त्वं चित्तविभ्रमः ॥११५॥
शून्यमनित्यं[23] क्षणिकं[24] बालाः[25] कल्पन्ति[26] संस्कृतम् ।

[1] वैं A. [2] म T. [3] काः T. [4] मो T. [5] हेतु A. C. K. क्षेत्र T.
[6] त्र T. [7] षे T. [8] ते A. C. K. तं Tib. [9] असता च सतां चैव T.
[10] त्रि T. [11] ग्रेहि T. [12] विर्यास T. [13] त्रित K. त्रितं T. विपर्यासो हि चित्रता Tib. [14] ल्प T. [15] त्ते A. C. K. त्तं T. [16] हि ते left out in K.
[17] तत K. [18] समायाख्याता A. C. समाख्याता K. च मायाख्या T. [19] सवर्था K.
[20] न्यान्यारूपा A. न्यारूप्या C. K. नानि आरूप्या T. [21] लं चि T.
[22] मिनन्त T. [23] त्य T. [24] अनित्यशून्यक्षणिकं ? [25] ला K. [26] ति A. C. K. न्ति T.

नदीदीपादिदृष्टान्तैः क्षणिकार्थो विकल्प्यते ॥ ११६ ॥
निर्व्यापारं तु[1] क्षणिकं विविक्तं क्रियवर्जितम् ।
अनुत्पत्तिं च धर्माणां क्षणिकार्थं वदाम्यहम् ॥ ११७ ॥
सच्चासतो ह्यनुत्पादः[2] सांख्यवैशेषिकैः स्मृता[3] ।
अव्याकृतानि सर्वाणि तैरेव हि प्रकाशितम् ॥ ११८ ॥
चतुर्विधं[4] व्याकरणमेकांश[5]परिपृच्छनम्[6] ।
विभज्य[7]स्थापनीयं च तीर्थ[8]वादनिवारणम्[9] ॥ ११९ ॥
सर्वं[10] विद्यति संवृत्यां[11] परमार्थे न विद्यते ।
धर्माणां निःस्वभावत्वं परमार्थे ऽपि दृश्यते[12] ।
उपलब्धिनिः[13]स्वभावे[14] संवृतिस्तेन[15] उच्यते[16] ॥ १२० ॥
अभिला[17]पहेतुको भावः स्वभावो[18] यदि विद्यते ।
[19]अभिला[17]प[20]संभवो भावो नास्तीति च न विद्यते ॥ १२१ ॥
निर्व[21]स्तुको ह्यभिलापस्तत्सं[22]वृत्यापि न विद्यते ।
विप[23]र्यासस्य वस्तु[24]त्वा[25]च्चोपलब्धिर्न विद्यते ॥ १२२ ॥
विद्यते चेद्विपर्यासो नैःस्वाभा[26]व्यं न विद्यते ।

[1] In T. only. [2] ह्यभ्युत्पत्तिः ? Tib. [3] ता A. K. ताः C. तः T. [4] ध T. [5] शे T. [6] कं T. [7] ज्यं A. C. K. ज्य T. [8] र्थे K. [9] वारं K. [10] र्वं K. [11] त्या T. त्यां Tib. [12] दि T. [13] ०लब्धेर्निःस्व ? [14] वेषु A. C. T. वे ऋ K. [15] न्तो T. [16] चो A. C. वो K. उ T. [17] भिला० ? [18] वं A. C. K. वो T. [19] The whole line left out in T. [20] लो K. पं A. सं left out in A. [21] व K. [22] लासः सं T. ऽभिलापस्स सं Tib. [23] य T. [24] सस्यावस्तु Tib. but सो नवस्तु ? [25] द्यो A. C. K. च्चो T. [26] भ K.

विपर्यासस्य वस्तु[1]त्वाद्यद्देवोपलभ्यते ।
निःस्वभावं भवेत्तद्धि सर्वथापि न विद्यते ॥१२३॥
यदेत[2]द्दृश्यते चित्रं चित्तं[3] दौष्ठुल्यवासित[4]म् ।
रूपावभासग्रहणं बहिर्धा चित्त[5]विभ्रमम् ॥१२४॥
विकल्पेनाविकल्पेन विकल्पो[6] हि प्रहीयते ।
विकल्पेनावि[7]कल्पेन शून्यतातत्त्वदर्शनम् ॥१२५॥
मायाहस्ती[8] यथा चित्रं [9]मंत्राणि कनका यथा ।
तथा दृश्यं[10] नृणां ख्याति चित्ते अज्ञानवासिते ॥१२६॥
आर्यो न पश्यते[11] भ्रान्तिं ना[12]पि तत्त्वं तदन्तरे ।
भ्रान्तिरेव भवेत्तत्त्वं यस्मात्तत्त्वं तदन्तरे[13] ॥१२७॥
भ्रान्तिं विधूय सर्वां तु[14] निमित्तं यदि[15] जायते ।
सैव [16]चास्य भवेद्भ्रान्तिरशुद्धं तिमिरं यथा ॥१२८॥
केशोण्डुकं तैमिरिको यथा गृह्णाति[17] विभ्रमात् ।
विषयेषु[18] तद्वद्बालानां ग्रहणं संप्रवर्तते ॥१२९॥
केशोण्डुकप्रख्यमिदं[19] मरीच्युदकविभ्रमम् ।
त्रिभवं स्वप्नमायाभं विभावत्वाद्वि[20]मुच्यते ॥१३०॥

[1] त्वादन्य K. [2] तं दृ K. [3] त्त A. C. K. [4] भावितम् T. [5] त्र A. C. K. त्र T. [6] ल्यो A. ल्पो C. T. ल्पा K. [7] अविकल्पवि ? Tib. [8] स्ति A. C. K. स्ती T. [9] य T. [10] श्य K. [11] न्ति T. [12] न्तिर्ना A. C. न्ति ना K. न्तिं ना T. [13] न्तरो K. [14] हि T. [15] यदि is put in after जायते in T. [16] तास्य T. [17] गृह्णाति A. C. K. गृह्णन्ति T. [18] अर्थेषु ? [19] कमिदं ज्ञानं T. [20] विभोचत्वावि K. विभावेन्तोन T. विभावेन्तो विमु (魏) Tib.

विकल्पश्च [1]विकल्प्यश्च[2] विकल्पस्य प्रवर्तते[3]।
बन्धबद्ध[4]न्धुहेतुश्च षडेते मोक्षहेतवः ॥ १३१ ॥
न भूमयो न सत्यानि न क्षेत्रा न च निर्मिताः।
बुद्धाः प्रत्येकबुद्धाश्च श्रावकाश्चापि कल्पिताः[5] ॥ १३२ ॥
पुद्गलसंततिस्कन्धाः प्रत्यया ह्यण[6]वस्तथा।
प्रधानमीश्वरः कर्ता चित्तमात्रे विकल्प्यते ॥ १३३ ॥
चित्तं हि सर्वं सर्वत्र सर्वदेहेषु वर्तते।
विचित्रं[7] गृह्यते ऽसद्भि[8]श्चित्त[9]मात्रं[7] [10]ह्यलक्षणम् ॥ १३४ ॥
न ह्यात्मा विद्यते स्कन्धे[11] स्कन्धाश्चैव हि नात्मनि[12]।
न[13] ते यथा[14] विकल्प्यन्ते[15] न च ते वै[16] न सन्ति च ॥ १३५ ॥
अस्तित्वं सर्वभावानां यथा बालैर्विकल्प्यते।
यदि ते भवेद्[17]यथादृष्टाः सर्वे स्युस्तत्त्वदर्शिनः[18] ॥ १३६ ॥
अभावात्[19]सर्वधर्माणां संक्लेशो नास्ति शुद्धि च[20]।
न च ते[21] तथा यथादृष्टा[22] न च ते वै न सन्ति च ॥ १३७ ॥
[23]भ्रान्ति[24]र्निमित्तं संकल्पः परतन्त्रस्य लक्षणम्[25]।

[1] स्व is added in K. [2] विकल्पोश्च T. [3] प्रवर्तनम् Tib. [4] बंधा बंधुश्च K. बन्धं बन्धश्च T. बन्धो बन्ध्यश्च बद्धश्च Tib. [5] कल्पना A. C. K. कल्पिताः T. [6] ग T. [7] त्र T. [8] : चि T. ऽसद्भिश्च (唐) षड्भिश्च Tib. [9] गोत्रं (魏) (唐) Tib. [10] सि A. हि C. K. ह्य T. [11] स्कंधैः T. [12] निः K. भि T. [13] च is added in K. T. [14] तथा Tib. [15] कल्पंते A. C. K. कल्प्यन्ते T. [16] चै A. [17] स्युर्य ? [18] र्शी T. [19] वा स K. T. [20] शुद्धिश्च ? [21] न ते ? [22] ष्टा K. [23] न्ते Tib. [24] नि A. C. K. र्नि T. [25] णः K.

तस्मिन्निमित्ते यन्नाम[1] तद्विकल्पितलक्षणम्[2] ॥ १३८ ॥
नामनिमित्तसंकल्पो यदा तस्य न जायते ।
प्रत्ययावस्तुसंकेतं परिनिष्पन्नलक्षणम् ॥ १३९ ॥
वैपाकिकाश्च ये बुद्धा जिना नैर्माणिकाश्च ये ।
सत्त्वाश्च बोधिसत्त्वाश्च क्षेत्राणि च दिशे दशे[3] ॥ १४० ॥
निस्यन्दधर्मनिर्माणा[4] जिना नैर्माणिकाश्च ये ।
सर्वे ते ह्यमिताभस्य[5] सुखावत्या विनिर्गताः ॥ १४१ ॥
यच्च नैर्माणिकैर्भाष्टं[6] यच्च भाष्टं[7] विपाकजैः[8] ।
सूत्रान्तवैपुल्यनयं[9] तस्य संधिं विजानथ[10] ॥ १४२ ॥
यद्भाषितं जिनसुतैर्यच्च[11] भाषन्ति नायकाः ।
यद्धि नैर्माणिकाभाष्टं[12] न तु वैपाकिकैर्जिनैः ॥ १४३ ॥
अनुत्पन्ना ह्यमी धर्मा न चैवैते न सन्ति च ।
गन्धर्वनगरस्वप्नमायानिर्माणसादृशाः[13][14] ॥ १४४ ॥
चित्तं प्रवर्तते चित्तं[15] चित्तमेव[16] विमुच्यते[17] ।
चित्तं हि जायते नान्यच्चित्तमेव निरुध्यते ॥ १४५ ॥
अर्थाभाषं[18] नृणां चित्तं[19] चित्तं वै ख्याति कल्पितम् ।

[1] यु A. C. K. य T. [2] ल्प A. C. K. ल्पि T. [3] दशः K. दिशे दिशे T. Tib. [4] ष्प T. [5] हा K. [6] कं भा A. C. K. कैर्भा T. [7] यद्भा A. C. K. यच्च भा T. [8] ॰जं A. C. वियोजकैः K. ॰जैः T. [9] न्तं K. [10] थः A. या K. [11] पुत्रै K. [12] कैर्भा (魏) (唐) Tib. [13] रं T. [14] मं K. [15] त्तं (魏) (唐) Tib. [16] चित्त is added in K. [17] वि left out in A. [18] सं Tib. [19] त्त K.

नास्त्यर्थश्चित्तमात्रेयं[1] निर्विकल्पो विमुच्यते ॥ १४६ ॥
अनादिकालप्रपञ्चदौष्ठुल्यं हि समाहितम्[2] ।
विकल्पो भावितस्तेन मिथ्याभासं प्रवर्तते ॥ १४७ ॥
अर्थाभावे[3] च विज्ञाने[4] ज्ञानं तथता[5] गोचरम् ।
परावृत्तं[6] निराभासमार्याणां गोचरो ह्यसौ ॥ १४८ ॥
[7]अर्थप्रविचयं[8] ध्यानं ध्यानं बालोपचारिकम् ।
तथतारम्बणं ध्यानं ध्यानं ता[9]थागतं शुभम् ॥ १४९ ॥
प[10]रिकल्पितं[11] स्वभावेन सर्वधर्मा अजान[12]काः ।
परतन्त्रं[13] समाश्रित्य[14] विकल्पो भ्रमते[15] नृणाम् ॥ १५० ॥
परतन्त्रं[16] यथा[17] शुद्धं विकल्पेन विसंयुतम् ।
परावृत्त[18] हि तथता विहारः कल्पवर्जितः ॥ १५१ ॥
मा विकल्पं विकल्पेथ[19] विकल्पो[20] नास्ति सत्यतः ।
भ्रान्तिं[21] विकल्प[22]यन्त[23]स्य ग्राह्यग्राहकयोर्न तु ।
बाह्यार्थ[24]दर्शनं कल्पं[25] स्वभावः परिकल्पितः ॥ १५२ ॥

[1] ते यं K. [2] ह्य T. चि (階) Tib. [3] से Tib. [4] ज्ञाने left out in T. नं Tib. [5] तया च तत्व T. ज्ञानं च तत्वगोचरम् ? Tib. [6] वृत्त A. C. °त्ति K. °त्तं T. [7] य T. [8] य T. Tib. [9] त T. [10] वि is added in K. [11] त A. C. K. तं T. ल्पस्व ? [12] त T. [13] न्त्व T. [14] शृ T. [15] भवते T. [16] त्र K. [17] यदा for यथा in Tib. [18] वृत्ता Tib. [19] विकल्पे ऽथ A. C. विकल्पेय (=विकल्पते) (魏) (唐) Tib. [20] ल्पं A. C. K. [21] न्ति A. C. K. न्तिं T. [22] ल्पं K. [23] यंस्त A. C. K. [24] र्थं A. C. र्थ K. T. [25] कल्पः Tib.

येन कल्पेन कल्पेन्ति[1] स्वभावः प्रत्ययोद्भवः[2] ।
बाह्यार्थदर्शनं मिथ्या नास्त्यर्थं[3] चित्तमेव[4] तु ॥ १५३ ॥
युक्त्या[5] विपश्यमानानां ग्राहग्राह्यं[6] निरुध्यते ।
बाह्यो[7] न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते ॥ १५४ ॥
वासनैर्लुडितं[8] चित्तमर्थाभासं प्रवर्तते ।
कल्पद्वयनिरोधेन[9] ज्ञानं तथतगोचरम् ॥ १५५ ॥
उत्पद्यते ह्यनाभासमचिन्त्यमार्यगोचरम्[10] ।
नामनिमित्तसंकल्पः[11] स्वभावद्वयलक्षणम् ।
सम्यग्ज्ञानं[12] हि तथता परिनिष्पन्नलक्षणम् ॥ १५६ ॥
मातापितृसमायोगादालयमनसंयुतम्[13] ।
घृतकुम्भे[14] मूषिका[15] यद्वत्सहशुक्लेण[16] वर्धते[17] ॥ १५७ ॥
पेशीघनार्बुदं[18][19] पिटकमशुभं[20] कर्मचिञ्चितम् ।
कर्मवायुमहाभूतैः फलवत्संप्रपद्यते[21] ॥ १५८ ॥
पञ्चपञ्चकपञ्चैव[22] व्रणाश्चैव[23] नवैव[24] तु ।

1 ल्प A. C. T. ल्पे K. 2 भ K. 3 मास्त्यर्थं K. 4 मेन A. C. 5 क्त्या K. 6 ग्राह्यग्राहो T. 7 ह्या K. 8 रु K. 9 तु T. 10 भासस्मचित्तं बुद्ध A. C. भासमत्तिं बुद्ध K. भासमचिन्त्यं श्चार्यं T. 11 त्तसंकल्प्यः A. C. र्त्तसंकल्पः K. त्तं स्वकल्पो T. 12 क्ज्ञा A. C. K. ग्ज्ञा T. 13 यं T. 14 भ T. 15 मृ K. 16 क्लेश A. क्लेण C. क्रेण K. T. 17 द्धि A. C. T. द्ध K. 18 पे K. 19 द A. T. 20 कंम A. कं ञ्म C. K. कम T. दपिटम ? 21 च्य (魏) (唐) Tib. 22 घंडकाः A. C. पंचक K. T. 23 च्चै K. 24 नचैव A. C. K. नवैन T.

नखदन्तरोमसंच्छन्नः[1] स्फुरमाणः[2] प्रजायते ॥ १५९ ॥
प्रजातमात्रं विष्टीकृमिं[3] सुप्तबुद्धेव[4][5] मानवः ।
चक्षुषा स्फुरते[6] रूपं विवृद्धिं याति कल्पनात् ॥ १६० ॥
ताल्वोष्ठपुटसंयोगाद्विकल्पेनावधार्यते[7][8] ।
वाचा प्रवर्तते नृणां[9] शुकस्येव विकल्पना ॥ १६१ ॥
निश्चितास्तीर्थ्यवादानां[10][11] महायानमनिश्चितम् ।
सत्त्वाश्रयप्रवृत्तो ऽयं[12] कुदृष्टीनामनास्पदम्[13] ॥ १६२ ॥
प्रत्यात्मवेद्ययानं[14] मे तार्किकाणामगोचरम् ।
पश्चात्काले गते नाथे ब्रूहि को ऽयं[15] धरिष्यति ॥ १६३ ॥
निर्वृते सुगते पश्चात्कालो ऽतीतो भविष्यति ।
महामते[16] निबोध त्वं यो नेत्रीं धारयिष्यति ॥ १६४ ॥
दक्षिणापथवेदल्यां[17] भिक्षुः श्रीमान्महायशाः ।
नागाह्वयः स नाम्ना[18] तु सदसत्पक्षदारकः[19] ॥ १६५ ॥
प्रकाश्य लोके मद्यानं महायानमनुत्तरम् ।
आसाद्य भूमिं[20] मुदितां[21] यास्यते ऽसौ सुखावतीम् ॥ १६६ ॥

[1] स K. [2] स्फ A. C. स्फु K. पु T. [3] ष्टिक्रि A. C. ष्टिकृ K. ष्टीकृ T. ष्टाकृमिः ? [4] सुप्त is added in T. [5] बुद्धो ऽव (=बुद्ध इव) ? [6] स्फ A. C. T. स्फु K. [7] तल्वोष्ठपू A. ताल्वोष्ठपू C. ताल्वौष्ठपु K. ताल्वोष्ठपु T. [8] वि T. [9] नृ A. C. K. नृ T. [10] र्थ्य K. [11] ना K. वादा वै ? [12] सत्त्वाशयप्रवृत्तो ऽदं (=वृत्त इदं) ? [13] नां च T. [14] द्यं यान T. [15] को ऽदं (=क इदं) ? [16] ति T. [17] ल्या K. [18] स म्ना K. स नामा T. [19] ल K. T. [20] मि T. [21] ता T.

बुद्ध्या[1] विवेच्यमानानां स्वभावो नावधार्यते ।
यस्मात्तद[2]नभिलाप्यास्ते निःस्वभावाश्च देशिताः ॥१६७॥
प्रत्ययोत्पादिते ह्यर्थे नास्त्यस्ती[3]ति न विद्यते ।
प्रत्ययान्तर्गतं भावं ये[4] कल्पे[5]न्त्यस्ति नास्ति च ।
दूरीभूता भवेन्मन्ये[6] शासनात्तीर्थदृष्टयः ॥१६८॥
अभिधानं सर्वभावानां जन्मान्तरश[7]तैः सदा ।
अभ्यस्तमभ्यसन्तं[8] च परस्परविकल्पया ॥१६९॥
अकथ्यमाने[9] संमोहं सर्वलोक आपद्यते[10] ।
तस्मात्क्रि[11]यते नाम[12] संमोहस्य व्युदासार्थम् ॥१७०॥
त्रि[13]विधेन विकल्पेन बालैर्भावा[14] विकल्पिताः ।
भ्रान्तिर्नामविकल्पेन प्रत्ययै[15]र्जनितेन च ॥१७१॥
अनि[16]रुद्धा ह्यनुत्पन्नाः प्रकृत्या गगनोपमाः[17] ।
अभावस्वभावा ये तु[18] ते विकल्पितलक्षणाः[19] ॥१७२॥
प्रतिभासबिम्बमायाभमरीच्या सुपिनेन तु[20] ।
अलातचक्रगन्धर्वप्रतिश्रुत्का[21]समोद्भवाः ॥१७३॥

[1] ध्या K. [2] यस्मात्तस्माद K. यस्यात्तस्माद T. यस्मादनभि ? [3] नास्त्यती A. C. नास्ती K. नास्त्यस्ती T. [4] याः ? [5] कल्प A. C. T. कल्पे K. [6] दूरीभूता भवेयुस्ताः ? (腊) [7] श A. C. K. ग T. [8] संतं A. C. संत K. संते T. [9] °ने A. C. नामेह्यकथ्यमान K. नामेह्यकथ्यमाने T. [10] कमापद्यते A. C. K. क आपद्येत् T. [11] त्कृ T. [12] In this quarter one syllable is wanting. [13] तृ T. [14] वां T. [15] ये ज A. C. K. यैर्ज T. [16] वि A. C. K. नि T. [17] मा T. [18] अभावास्तु स्वभावा ये ? [19] णा T. [20] च ? [21] श्रुका K.

अद्वया तथता शून्या भूतकोटिश्च धर्मता ।
निर्विकल्पश्च देशेमि ये ते निष्पन्न[1]लक्षणाः ॥१७४॥
वाक्चित्तगोचरं मिथ्या सत्यं प्रज्ञा विकल्पिता[2] ।
[3]द्वयान्तपतितं चित्तं तस्मात्प्रज्ञा न कल्पिता ॥१७५॥
अस्ति नास्ति च[4] द्वावन्तौ यावच्चित्तस्य गोचरः ।
गोचरेण विधूतेन सम्यक्[5]चित्तं निरुध्यते ॥१७६॥
विषयग्रहणा[6]भावान्निरोधेन[7] च नास्ति च ।
विद्यते तथतावस्था[8]आर्याणां गोचरो[9] यथा ॥१७७॥
बालानां न[10] तथा[11] ख्याति यथा ख्याति मनीषिणाम् ।
मनीषिणां तथा ख्याति सर्वधर्मा[12] अलक्षणाः[13] ॥१७८॥
[14]हारकूटं यथा बालैः सुवर्णं परिकल्प्यते ।
असुवर्णं सुवर्णाभं[15] तथा धर्माः[16] कुतार्किकैः[17] ॥१७९॥
अभूत्वा यस्य चोत्पादो भूत्वा चापि विनश्यति ।
प्रत्ययैः सदसच्चापि[18] न ते मे[19] शासने स्थिताः ॥१८०॥
अनाद्यनिधना[20]भावाद्भूतलक्षणसंस्थिताः ।

[1] स्प K. [2] का T. [3] The whole line left out in T. [4] नास्तीति T. [5] चि K. [6] अविषयग्रणा K. [7] धो नास्ति नास्ति च ? (魏) [8] मा A. C. K. आ T. [9] रं A. C. K. रो T. Tib. [10] In T. only. [11] तयता A. C. K. तया T. [12] यया सर्व T. [13] णा T. [14] आ (魏) Tib. [15] अभं left out in K. [16] : left out in K. [17] के A. कैः C. [18] सदसन्तो ऽपि ? [19] मे ते K. [20] निधरो A. निधरा C. निधना K. निरोधना T.

कारणकरवल्लोके[1] न च बुध्यन्ति[2] तार्किकाः[3] ॥१८१॥
अतीतो विद्यते भावो[4] विद्यते[5] च[5] अनागतः[6]।
प्रत्यक्षो[5] विद्यते यस्मात्तस्माद्भावा अजातकाः ॥१८२॥
परिणामकालसंस्थानं भूतभावेन्द्रियेषु च[7]।
अन्तराभवसंग्राहं ये कल्पन्ति न ते बुधाः ॥१८३॥
न प्रतीत्यसमुत्पन्नं लोकं वर्णन्ति वै जिनाः[8]।
किंतु प्रत्ययमेवायं लोको गन्धर्वसंनिभः ॥१८४॥
धर्मसंकेत एवायं तस्मिंस्तदिदमुच्यते[9]।
संकेताच्च[10] पृथग्भूतो न जातो[11] न[11] निरुध्यते ॥१८५॥
दर्पणे उदके नेत्रे भाण्डेषु च[12] मणीषु[13] च।
विम्बं[14] हि दृश्यते तेषु न च विम्बोऽस्ति कुत्रचित् ॥१८६॥
भावाभासं[15] तथा चित्तं[16] मृगतृष्णा यथा नभे[17]।
दृश्यते चित्तरूपेण स्वप्ने वन्ध्यौरसो[18] यथा ॥१८७॥
न मे यानं महायानं न घोषो न च अक्षराः।
न सत्या न विमोक्षा[19] वै न निराभासगोचरम् ॥१८८॥
किंतु यानं महायानं समाधिवशवर्तिता।

[1] कारणाकारक A. C. K. [2] ध्य A. C. [3] ताः T. [4] पि is added in K. [5] Left out in T. [6] अनादारपि T. [7] ये T. [8] वै जिताः A. C. K. ये जिना T. [9] वाय यस्मिन्स T. [10] च T. [11] Left out in K. T. [12] चर T. [13] नी A. C. K. णी T. [14] म्ब K. [15] वं A. C. K. [16] त्त T. Tib. [17] से T. [18] बंध्यारहो A. बंध्यारसो C. K. वन्ध्यौरसो T. (魏) Tib. [19] च मक्षे A. C. K.

कायं[1] मनोमयं चित्तं[1][2] वशितापुष्पमण्डितम्[1] ॥१८९॥
एकत्वेन पृथक्त्वेन[3] भावो वै प्रत्यये न[4] तु ।
जन्म[5] समासमे[6]वोक्तं निरोधो नाश[7] एव हि ॥१९०॥
अजातशून्यता चैकमेकं जातेषु शून्यता ।
अजातशून्यता श्रेष्ठा नश्यते जात[8]शून्यता[8] ॥१९१॥
तथता शून्यता कोटी निर्वाणं धर्मधातुवत्[9] ।
कायो मनोमयं चित्तं[10] पर्यायैर्देशितं[11] मया ॥१९२॥
सूत्रविनयाभिधर्मेण विशुद्धिं[12] कल्पयन्ति ये ।
ग्रन्थतो न तु अर्थेन न ते[13] नैरात्म्यमाश्रि[14]ताः ॥१९३॥
न तीर्थिकैर्न[15] बुद्धैश्च न मया न च केनचित् ।
प्रत्ययैः साधिका[16]स्तित्वं कथं नास्ति[17]र्भविष्यति ॥१९४॥
केन प्रसाधिता[18]स्तित्वं प्रत्ययैर्यस्य नास्तिता ।
उत्पा[19]दवाददुर्दृष्ट्या नास्त्यस्तीति विकल्पयेत्[20] ॥१९५॥
यस्य नोत्पद्यते किंचिन्न[21] [22]किंचिच्च निरुध्यते ।
तस्यास्ति नास्ति[23] नोपैति विविक्तं पश्यतो जगत् ॥१९६॥

1 °यो °यश्चि °त्तः ? 2 त्तं A. C. K. 3 क्तन K. क्वेन T. 4 यैर्न T. 5 जत्मः ॥ K. 6 ए T. 7 व्यास ? (魏) (唐) Tib. 8 ते K. 9 तु च T. 10 यमं च्चित्तं K. मयश्चित्तं T. मयश्चित्तः ? (魏) (唐) Tib. 11 पर्यसिर्देशितो T. 12 द्धि T. 13 तु T. 14 सृ T. 15 न T. 16 ता ? (魏) Tib. 17 भं A. भँ C. K. भ T. 18 ना is added in K. 19 त्पा left out in K. 20 विकल्पते T. 21 न K. 22 च is added in T. Tib. reads किंचिन्न च किंचिन् 23 त्वे is added in T.

दृश्यते शश[1]विषाणाख्यं विकल्पो[2] विद्यते[2] नृणाम्।
ये तु कल्पेन्ति[3] ते भ्रान्ता मृगतृष्णा यथा मृगाः ॥१९७॥
विकल्पाभिनिवेशेन विकल्पः संप्रवर्तते ।
निर्हेतु[4]कं[5] विकल्पं[5] हि विकल्पो ऽपि न युज्यते ॥१९८॥
अजले च जलग्राहो मृगतृष्णा यथा नभे[6] ।
दृश्यते[7] ऽर्थो[8] हि बालानां आर्याणां न विशेषतः ॥१९९॥
आर्याणां दर्शनं शुद्धं विमोक्षत्रयसंभवम् ।
उत्पादभङ्गनिर्मुक्तं निराभासप्रचारिणम् ॥२००॥
गाम्भीर्यौदार्यवैपुल्यं ज्ञानं क्षेत्रान्विभूति च ।
देशेमि जिनपुत्राणां श्रावकाणामनित्यताम्[9] ॥२०१॥
अनित्यं त्रि[10]भवं शून्यमात्मात्मीय[11]विवर्जितम् ।
श्रावकाणां च देशेमि तथा सा[12]मान्यलक्षणम् ॥२०२॥
सर्वधर्मेष्वसंसक्तिर्विवेका ह्येकचारिका ।
प्रत्येकजिनपुत्राणां फलं देशेम्यतर्किकम्[13] ॥२०३॥
स्वभाव[14]कल्पितं बाह्यं परतन्त्रं च देहिनाम्[15] ।
अपश्यन्[16]नात्मसंभ्रान्तिं[17] ततश्चित्तं प्रवर्तते ॥२०४॥
दशमी तु[18] भवेत्प्रथमी[19] प्रथमी[20] चाष्टमी[21] भवेत् ।

[1] दृश्यं सस T. [2] क ते left out in K. [3] येन कल्पंति A. C. K ये तु कल्पेन्ति T. [4] रहे T. [5] °के °ल्पे Tib. [6] भवेत् T. [7] दृश्यंत K. दृश्येत T. [8] था K. [9] ता T. [10] तृ T. [11] यं T. [12] निजसा or आत्मसा ? (魏) Tib. [13] तं T. [14] वं T. [15] देहजं T. [16] स्यन्ना K. स्यंना T. [17] ति T. [18] प्र K. [19] दशमी प्रथमी भू स्यात् ? [20] Left out in T. [21] चाप्यष्टमी K.

नवमी सप्तमी[1] चापि सप्तमी चाष्टमी भवेत् ॥२०५॥
द्वितीयां[2] तु तृतीया स्याच्चतुर्थी[3] पञ्चमी भवेत् ।
तृतीया तु भवेत्षष्ठी निराभासे क्रमः कुतः ॥२०६॥
निराभासो हि भावानामभावो[4] नास्ति योगिनाम् ।
भावाभावसमत्वेन आर्याणां जायते फलम् ॥२०७॥
कथं ह्यभावो भावानां कुरुते समतां[5] कथम् ।
यदा चित्तं न जानाति बाह्यमध्यात्मिकं चलम्[6] ।
तदा तु कुरुते नाशं समताचित्तदर्शनात् ॥२०८॥
अनादिमति संसारे भावग्राहोपगूहितम् ।
बालैः कीलैर्यथा[7] कीलं प्रलोभ्य विनिवर्तते[8] ॥२०९॥
[9]तद्धेतुकं तदालम्ब्यं मनोगतिसमाश्रयम् ।
हेतुं ददाति चित्तस्य विज्ञानं च समाश्रितम्[10] ॥२१०॥
वैपाकिका[11]दधिष्ठानां निकायगतिसंभवात् ।
लभ्यन्ते येन वै स्वप्ने अभिज्ञाश्च चतुर्विधाः ॥२११॥
स्वप्ने च लभ्यते[12] यच्च यच्च[13] बुद्धप्रसादतः ।
निकायगतिगोत्रा ये ते विज्ञानविपाकजाः[14] ॥२१२॥

[1] सप्ती K. [2] यां K. यो T. [3] स्या चतुष्थी T. [4] वे T. [5] ता A. C. K. तां T. [6] च यत् A. C. K. चलं T. [7] बालाकीलैर्यथा A. C. बालोर्कीलै यथा K. बालैः कील यथा T. [8] र्तयेत् T. [9] ग्राहं is added in T. [10] सृ T. [11] षा A. [12] स्वप्ने प्रलभ्यते A. C. स्वप्ने च लभ्यते K. स्वप्ने च लभाते T. [13] या च या च (魏) (唐) Tib. [14] या साभिज्ञा न विपाकजा (魏) (唐) Tib.

वासनैर्भावि[1]तं चित्तं भावाभासं[2] प्रवर्तते ।
बाला यदा न बु[3]ध्यन्ते उत्पादं देशयेत्तदा ॥२१३॥
यावद्वाक्यं[4] विक[5]ल्पेन्ति भा[6]वं वै लक्षणान्वितम् ।
तावद्विबुध्यते[7] चित्तं अपश्यन्हि[8] स्व[9]विभ्रमम् ॥२१४॥
उत्पादो वर्ण्यते कस्मात्कस्माद्दृश्यं न व[10]र्ण्यते ।
अदृश्यं दृश्यमानं हि कस्य किं व[11]र्ण्यते कुतः ॥२१५॥
स्वच्छं चित्तं[12] स्वभावेन मनः कलुषकारकम्[13] ।
मनश्च सहविज्ञानैर्वासना[14] क्षिपते सदा ॥२१६॥
आलयो मुञ्चते कायं मनः प्रा[15]र्थयते गतिम् ।
विज्ञानं[16] विषयाभासं भ्रान्तिं[17] दृष्ट्वा प्रलभ्यते ॥२१७॥
मदीयं दृश्यते चित्तं बाह्यमर्थं[18] न विद्यते ।
एवं विभावयेद्भ्रा[19]न्तिं तथतां चाप्यनुस्मरेत् ॥२१८॥
ध्या[20]यिनां विषयः[21] कर्म बुद्धमाहात्म्यमेव च ।
एतानि ह्यीण्यचि[22]न्त्यान्यचिन्त्यं[23] वि[24]ज्ञानगोचरम् ॥२१९॥

[1] षि A. C. K. [2] वं A. C. षं K. सं T. (魏) (唐) Tib. [3] ध्य C.
[4] यावज्ञावं T. ज्ञाह्यं (魏) (唐) Tib. [5] ल्प A. C. T. ल्पे K. [6] व K.
[7] पुध्यते K. पुष्यते T. वृध्यते (唐) Tib. [8] अपश्य हि K. नैवस्यं हि T.
[9] स्ववि left out in A. [10] र्ण्ये T. [11] र्स K. [12] ज्ञां T.
[13] क T. [14] नां ? (魏) (唐) Tib. [15] र्थ्ये K. [16] ने A. C. K. न T.
[17] न्ति T. [18] र्थे K. [19] भ्रा K. [20] चि C. [21] यं T. [22] वि A.
नि C. न्य Tib. [23] ज्ञानं A. C. नित्यं K. चिन्त्यं T. Tib. [24] विज्ञान left out in A.

अनागतमतीतं च[1] निर्वाणं पुद्गलं वचः[2]।
संवृत्या देशयाम्येतान्[3]परमार्थस्त्वनक्षरः[4] ॥२२०॥
नै[5]कायिकाश्च[6] तीर्थ्याश्च[6] दृष्टिमेकां[7]शमाश्रिताः।
चित्त[8]मात्रे वि[9]संमूढा भावं कल्[10]पेन्ति बाहिरम् ॥२२१॥
प्रत्येकबोधिं[11] बुद्धत्वमर्हत्त्वं बुद्धदर्शनम्।
[12]गूढवीजं भवेद्बोधौ स्वप्ने वै सिध्यते[13] तु[14] यः[15] ॥२२२॥
कुत्र केषां कथं कस्मात्किमर्थं च वदाहि मे।
मायाचित्तमतिशान्तं[16] सदसत्पक्षदेशनाम् ॥२२३॥
चित्तमात्रे विमूढानां माया[17]नास्त्यस्तिदेशनाम्[18]।
उत्पादभङ्गसंयुक्तं[19] लक्ष्यलक्षणवर्जितम्[20] ॥२२४॥
विक[21]ल्पमनो नाम विज्ञानैः पञ्चभिः सह।
विम्बौ[22]घजलतुल्यादौ चित्त[23]वीजं[24] प्रवर्तते ॥२२५॥
यदा चित्तं[25] मनश्चापि विज्ञानं न प्रवर्तते।

[1] श्च T. [2] वचयेत् K. वचयं T. नभः (魏) (唐) Tib. [3] देषयाम्येतां K. देशनायोता T. [4] स्त्वनंक्षरः T. [5] नैर्या K. नैका (魏) (唐) Tib. [6] च T. [7] स A. C. K. T. [8] त्र K. [9] षं K. [10] ल्प A. C. K. ल्पे T. [11] धिं A. K. (魏) (唐) Tib. धि C. T. [12] रू T. Tib. दू (魏) (唐) [13] ध्य A. C. ध्म K. T. च्य (唐) Tib. [14] त्र T. [15] यत् ? [16] गतिं सान्तां T. गतिशान्तिं (唐) Tib. [17] ना याया T. [18] नास्तित्वदेहिणनां A. नास्तित्व-देहिशनां C. नास्तित्वदेशानां K. °देशाना T. (魏) (唐) Tib. [19] क्ष T. [20] Çes (知) Tib. [21] ल्पो ? (魏) (唐) Tib. One syllable is wanting. [22] म्बौ A. C. K. म्बौ T. [23] त्ते चि K. त्तैश्वि T. [24] जं A. C. जा K. जां T. [25] यदाश्चित्त T.

तदा मनोमयं[1] कायं लभते बुद्धभूमि च ॥ २२६ ॥
प्रत्यया धातवः[2] स्कन्धा धर्माणां च स्वलक्षणम् ।
प्रज्ञप्तिं पुद्गलं चित्तं स्वप्नकेशोण्डुकोपमाः ॥ २२७ ॥
मायास्वप्नोपमं लोकं दृष्ट्वा तत्त्वं समाश्रयेत् ।
तत्त्वं हि लक्षणैर्मुक्तं युक्तिहेतुविवर्जितम् ॥ २२८ ॥
प्रत्यात्मवेद्यमार्याणां[3] विहारं तु स्मरेत्सदा ।
युक्तिहेतुविसंमूढं लोकं तत्त्वे निवेशयेत् ॥ २२९ ॥
सर्वप्रपञ्चोपशमाद्भ्रान्तो[4] नाभि[5]प्रवर्तते ।
प्रज्ञा यावद्विकल्पन्ते[6] भ्रान्तिस्तावत्[7]प्रवर्तते ॥ २३० ॥
नैःस्वभाव्यं च भावं[8] च शून्या वै नित्यानित्यता[9] ।
उत्पादवादिनां[10] दृष्टिर्न[11] त्वनुत्पादवादिनाम्[12] ॥ २३१ ॥
एकत्वमन्यत्वो[13]भ[14]यामीश्वराच्च[15] यदृच्छया ।
कालाप्रधानादन्ये[16]भिः प्रत्ययैः कल्प्यते[17] जगत् ॥ २३२ ॥
संसारबीजं विज्ञानं सति दृश्ये[18] प्रवर्तते ।
कुड्ये[19] सति यथा चित्रं परिज्ञानान्निरुध्यते ॥ २३३ ॥

[1] य T. [2] धावतः K. [3] वेद्यधर्माणां A. [4] न्तौ A. C. K. [5] नापि T.
[6] ल्पंते A. C. ल्प्यंते K. ल्प्येते T. [7] स्तावन्प्र K. स्तावच्चित्तं प्र T.
[8] माहान्नैःस्वभाव्यं च K. मोहात् । तैस्वभावं न T. [9] शून्याश्चानित्यनित्यता ?
[10] ना K. [11] न K. [12] From दृष्टिर्न till नाम् left out in T. [13] न्याद्रु T.
[14] यो C. [15] श्वराच्च K. T. ऐकध्यमन्यत्वोभाभ्यामीश्वराच्च (魏) (唐) Tib.
[16] नाच्चाण्ड T. कालात्प्रधानादणु (魏) (唐) Tib. [17] ल्प A. C. K. ल्प्य T.
[18] बीजे (唐) Tib. [19] स is added in K.

मायापुरुषवन्नृणां[1] मृतजन्म[2] प्रवर्तते ।
मोहात्तथैव[3] बालानां बन्धमोक्षं[4] प्रवर्तते ॥२३४॥
अध्यात्मबाह्यं द्विविधं[5] धर्माश्च[6] प्रत्ययानि च ।
एतद्विभावयन्[7]योगी[8] निराभासे[9] प्रतिष्ठते[10] ॥२३५॥
न वासनैर्भिद्यते[11] चित्[12] न चित्तं वासनैः सह ।
अभिन्नलक्षणं चित्तं वासनैः परिवेष्टितम् ॥२३६॥
मलवद्वासना[13] यस्य मनोविज्ञानसंभवा[14] ।
पटशुक्लोपमं[15] चित्तं वासनैर्न विराजते ॥२३७॥
यथा न भावो[16] नाभावो गगनं कथ्यते मया ।
आलयं हि तथा काये भावाभावविवर्जितम् ॥२३८॥
मनोविज्ञानव्यावृत्तं चित्तं कालुष्यवर्जितम् ।
सर्वधर्मावबोधेन चित्तं[17] बुद्धं वदाम्यहम् ॥२३९॥
चिसंततिव्यवच्छिन्नं[18] सत्तासत्ता[19]विवर्जितम् ।
चातुष्कोटिकया[20] मुक्तं भवं मायोपमं सदा ॥२४०॥
द्वे स्वभावो[21] भवेत्सप्त भूमयश्चित्तसंभवाः ।
शेषा भवेयुर्निष्पन्ना[22] भूमयो बुद्धभूमि च ॥२४१॥

[1] पुरुषे यथा नृणां T. [2] न्मौ A. C. K. न्मो T. [3] यापि T. [4] क्षौ A. C. K. क्षो T. [5] नि K. [6] व A. C. वै K. T. [7] ये A. [8] द्या K. [9] निरासे K. निधाभासेः T. [10] प्रतिष्ठिहेत् K. [11] वासनेर्भि T. [12] त्त T. [13] व left out in T. [14] वं A. C. K. वाः T. [15] पटःशुक्लसदृशं T. [16] वे T. [17] त्त T. [18] तृ T. [19] सत्तासत्त T. [20] च T. [21] वो A. C. वा K. T. [22] शेषा च तेन A. C. येषां च तेन K. सेषा भवे च T.

रूपी चारूप्यधातुश्च कामधातुश्च निर्वृतिः[1]।
अस्मिन्कलेवरे[2] सर्वं कथितं चित्तगोचरम् ॥२४२॥
उपलभ्यते यदा यावद्भ्रान्तिस्तावत्प्रवर्तते ।
[3]भ्रान्तिः स्वचित्तसंबोधान्न प्रवर्तते न निवर्तते[4] ॥२४३॥
अनुत्पादे कारणाभावो भावे संसारसंग्रहः ।
मायादिसदृशं पश्यन्[5] लक्षणं न विकल्पयेत् ॥२४४॥
त्रियानमेकयानं च अयानं च वदाम्यहम् ।
बालानां[6] मन्दबुद्धीनामार्याणां च विविक्तताम्[7] ॥२४५॥
उत्पत्तिर्द्विविधा[8] मह्यं लक्षणाधिगमौ च या[9]।
चतुर्विधो नयविधिः[10] सिद्धान्तं युक्तिदेशना ॥२४६॥
संस्थानाकृतिविशेषैर्भ्रान्तिं[11] दृष्ट्वा विकल्प्यते[12]।
नामसंस्थानविरहात्स्वभावमार्यगोचरम्[13][14] ॥२४७॥
विकल्पेन[15] कल्प्यते[16] यावत्तावत्कल्पितलक्षणम्[17]।
विकल्पकल्पनाभावात्स्वभावमार्यगोचरम्[18][19] ॥२४८॥
नित्यं च[20] शाश्वतं तत्त्वं गोत्रं[21] वस्तुस्वभावकम् ।

[1] निर्वृतः A. C. T. निवृत्तिः K. [2] ड K. डे T. [3] चित्तं is added in T.
[4] न वर्तते निवर्तते ? [5] पस्यन् K. पस्य T. [6] ना K. [7] ता A. C. K.
तां T. [8] विविधो T. [9] मा नया A. C. मा च या K. मी नया T.
मौ च या Tib. [10] धात्तपि A. धात्तय C. K. धं नय T. [11] भ्रान्ति T.
[12] ल्पे K. [13] य K. [14] शुद्धं is added in K. शुद्ध id. in T. [15] ल्पे A. C.
[16] कल्पे A. [17] तं T. [18] ल्पे T. [19] भावा is added in K. [20] नित्यश्च K.
[21] त्र A. C. K.

तथता चित्तनिर्मुक्तं कल्पनैश्च विवर्जितम् ॥ २४९ ॥
यद्यद्वस्तु[1] न शुद्धिः स्यात्संक्लेशो नापि कस्यचित् ।
यस्माच्च शुध्यते[2] चित्तं संक्लेशश्चापि दृश्यते ।
तस्मात्तत्त्वं भवेद्वस्तु विशुद्धमार्यगोचरम् ॥ २५० ॥
प्रत्ययैर्जनितं लोकं विकल्पैश्च विवर्जितम् ।
मायादिस्वप्नसदृशं विपश्यन्तो विमुच्यते ॥ २५१ ॥
[3]दौष्ठुल्यवासनाश्चित्राश्चित्तेन[4] सह संयुताः ।
बहिर्धा दृश्यते नृणां[5] न हि चित्तस्य धर्मता[6] ॥ २५२ ॥
चित्तस्य[7] धर्मता[7] शुद्धा न चित्तं भ्रान्तिसंभवम्[8] ।
भ्रान्तिश्च दौष्ठुल्यमयी तेन चित्तं न दृश्यते ॥ २५३ ॥
भ्रान्तिमात्रं भवेत्तत्त्वं तत्त्वं नान्यत्र विद्यते ।
न संस्कारे[9] न चान्यत्र किंतु संस्कारदर्शनात्[10] ॥ २५४ ॥
[11]लक्ष्यलक्षणनिर्मुक्तं यदा पश्यति संस्कृतम् ।
विधूतं हि भवेत्तेन स्वचित्तं पश्यतो जगत्[12] ॥ २५५ ॥
चित्तमात्रं[13] समारुह्य[14] बाह्यमर्थं न कल्पयेत् ।
तथतालम्बने[15] स्थित्वा चित्तमात्रमतिक्रमेत्[16] ॥ २५६ ॥
चित्तमात्रमतिक्रम्य[17] निराभासमतिक्रमेत् ।

[1] व T. [2] द्ध A. C. [3] माया is added in K. [4] त्रा च्चि K. त्ता च्चि T.
[5] दृशां A. दृणां C. नृशां K. नृणां T. [6] तां A. [7] Left out in T.
[8] Left out in K. [9] रै न T. [10] न K. [11] क्ष T. [12] ना T. [13] त्र K.
[14] रू A. C. K. रु T. [15] लंवणे A. रंवणे C. K. T. [16] मो T. [17] वि K. मं ह्यति T.

निराभासस्थितो योगी महायानं न पश्यते[1] ॥२५७॥
अनाभोग[2]गतिः शान्ता प्रणिधानैर्विशोधिता ।
ज्ञानमनात्मकं[3] श्रेष्ठं[4] निराभासे[5] न पश्यति ॥२५८॥
चित्तस्य गोचरं पश्येत्पश्ये[6]ज्ज्ञानस्य गोचरम् ।
प्रज्ञया गोचरं पश्येल्[7]लक्षणे न प्रमुह्यते[8] ॥२५९॥
चित्तस्य दुःखसत्यं[9] समुदयो ज्ञानगोचरः ।
द्वे सत्ये बुद्ध[10]भूमिश्च[11] प्रज्ञा यत्र प्रवर्तते ॥२६०॥
फलप्राप्तिश्च निर्वाणं मार्गमष्टाङ्गिकं तथा[12] ।
सर्वधर्मावबोधेन बुद्धज्ञानं विशु[13]ध्यते ॥२६१॥
चक्षुश्च[14] रूपमा[15]लोक आकाशश्च[16] मनस्तथा ।
एभिरुत्पद्यते नृणां[17] विज्ञानं ह्यालयोद्भवम् ॥२६२॥
ग्राह्यं ग्राह्यो ग्रहीता च[18] नास्ति नाम ह्यवस्तुकम् ।
निर्हे[19]तुकं विकल्पं ये मन्यन्ति[20] हि न ते बु[21]धाः ॥२६३॥
अर्थे नाम ह्यसंभूतमर्थो[22] नाम्नि तथै[23]व च ।

1 स पश्यति T. 2 गा T. 3 सदात्माकं T. 4 शेष्ठं K. स्रेष्ठ T. 5 सं T. 6 श्येत् ज्ञा A. C. स्येत् K. श्ये T. 7 मस्य ल° K. पश्य लक्षणेन T. 8 ति K. T. 9 दुःखतमसत्यं T. 10 बुद्धि A. C. 11 त्व T. 12 मार्गश्चाष्टाङ्गिकस्तथा ? (魏) (唐) Tib. 13 बु A. C. K. शु T. 14 स्तु is added in K. 15 पं ह्या T. 16 काशश्च A. K. क्रांशं च T. 17 तेंदृणां A. C. ते नृशा K. ते नृणां T. 18 ग्राह्यग्राह° A. C. ग्राह्या° K. ग्राह्यं ग्राहं ग्रहीतारं T. 19 निरहे T. 20 न्ते T. 21 ब K. 22 र्थां A. 23 थे T.

हेत्वहेतुसमुत्पन्नं विकल्पं न विकल्पयेत्[1] ॥२६४॥
सर्वभावस्वभावो ऽसन्[2]वचनं हि तथाप्यसत् ।
शून्यतां शून्यतार्थं वा बालो ऽपश्यन्विधावति ॥२६५॥
सत्यस्थितिं[3] मन्यनया दृष्टा[4] प्रज्ञप्ति[5]देशना ।
एकत्वं पञ्चधासिद्धमिदं[6] सत्यं[7] प्रहीयते ॥२६६॥
प्रपञ्चमारभेद्यश्च अस्ति[8]नास्तिव्यतिक्रमेत् ।
नास्ति च्छन्दो भवे[9] मिथ्या[10]संज्ञा नैरात्म्यदर्शनात् ॥२६७॥
शाश्वतं हि सकर्तृत्वं वादमात्रप्रवर्तितम्[11] ।
सत्यं परं[12] ह्यवक्तव्यं निरोधे धर्मदर्शनम् ॥२६८॥
आलयं हि समाश्रि[13]त्य मनो वै संप्रवर्तते ।
[14]चित्तं मनश्च संश्रित्य विज्ञानं संप्रवर्तते ॥२६९॥
समारोपं समारोप्यं[15] तथता चित्तधर्मता ।
एतद्विभावयं योगी चित्तमात्रज्ञतां लभेत् ॥२७०॥
मनश्च लक्षणं वस्तु[16] नित्या[17]नित्ये[18] न मन्यते ।
उत्पादं चाप्यनुत्पादं योगी योगे न मन्यते ॥२७१॥
अर्थद्वयं न[19] कल्पे[20]न्ति विज्ञानं ह्यालयोद्भवम् ।

[1] त्सं येत् A. त्सेत् K. [2] य T. [3] तिं A. C. ति K. (魏) (唐) सत्यमिति T. [4] दृष्ट्वा A. C. Tib. दृष्टेः (魏) (唐) [5] विज्ञ A. C. [6] रि T. [7] त्य K. [8] मारवेयवैत्यस्ति T. [9] व K. वो T. [10] संख्या is added in K. [11] तं A. C. रं K. नं T. [12] पर K. [13] शृ T. [14] The whole line left out in T. [15] प्यं T. [16] च for वस्तु in A. [17] नित्यो A. [18] त्य K. [19] येन Tib. [20] कल्प A. C. विकल्पे K. कल्पे T.

एकमर्थं विचित्तेन न जानीते तदुद्भवम् ॥२७२॥
न वक्ता[1] न च वाच्यो[2] ऽस्ति न शून्यं चित्तदर्शनात् ।
अदर्शनात्स्व[3]चित्तस्य दृष्टिजालं प्रवर्तते ॥२७३॥
प्रत्ययागमनं नास्ति इन्द्रियाणि न केचन[4] ।
न धातवो न च स्कन्धा न रागो न च[5] संस्कृतम् ॥२७४॥
कर्मणो ऽग्रिं न वै पूर्वं न कृतं न च संस्कृतम् ।
न कोटि न[6] च वै शक्तिर्न मोक्षो न च बन्धनम् ॥२७५॥
अव्याकृतो न भावो ऽस्ति धर्माधर्मं न चैव हि ।
न कालं न च निर्वाणं धर्मतापि न विद्यते ॥२७६॥
न च बुद्धो न[7] सत्यानि न फलं[8] न च हेतवः ।
विपर्ययो न निर्वाणं विभवो नास्ति संभवः ॥२७७॥
द्वादशाङ्गं न चैवास्ति अन्तानन्तं न चैव हि ।
सर्वदृष्टिप्रहाणाय चित्तमात्रं[9] वदाम्यहम् ॥२७८॥
क्लेशाः कर्मपथा देहः कर्तारश्च फलं च वै ।
मरीचिस्वप्नसंकाशा[10] गन्धर्वनगरोपमाः ॥२७९॥
चित्तमात्रव्यवस्थानाद्व्यावृत्तं भावलक्षणम् ।
चित्तमात्रप्रतिष्ठानाच्छाश्वतोच्छेददर्शनम् ॥२८०॥
स्कन्धा न सन्ति निर्वाणे न चैवात्मा न लक्षणम्[11] ।

[1] न च वक्त T. [2] वाद्यो T. [3] त्स्य K. [4] केन च K. [5] च is put in before रागो in A. C. K. [6] न T. टिर्न ? [7] च is added in K. T. [8] सत्या निःफल T. [9] चित्ति T. [10] शं A. [11] णां K.

चित्तमात्रावतारेण मोक्षग्राहान्निवर्तते ॥२८१॥
भूदृश्यहेतुको दोषो वहिर्व्याख्यायते[1] नृणाम् ।
चित्तं ह्यदृश्यसंभूतं तेन चित्तं न दृश्यते ॥२८२॥
देहभोगप्रतिष्ठाभा[2] ख्यायते[3] वासना नृणाम्[4] ।
चित्तं न भावो नाभावो[5] वासने न विराजते ॥२८३॥
मलो वै[6] ख्यायते शुक्के[7] न शुक्के[8] ख्यायते मलम्[9] ।
घने हि गगनं[10] यद्वत्तथा चित्तं न दृश्यते ॥२८४॥
चित्तेन चीयते[11] कर्म ज्ञानेन च विचीयते[12] ।
प्रज्ञया च निराभासं प्रभावं चाधिगच्छति ॥२८५॥
चित्तं विषयसंबद्धं ज्ञानं तर्के प्रवर्तते ।
निराभासे विशेषे च ज्ञानं[13] वै संप्रवर्तते ॥२८६॥
चित्तं मनश्च विज्ञानं संज्ञा वै कल्पवर्जिता[14] ।
अविकल्पधर्मतां प्राप्ताः श्रावका न जिनात्मजाः ॥२८७॥
शान्ते क्षान्ते[15] विशेषे वै ज्ञानं ताथागतं शुभम् ।
संजायते विशेषार्थं[16] समुदाचार[17]वर्जितम् ॥२८८॥
परिकल्पितस्वभावो ऽस्ति परतन्त्रो न विद्यते ।
कल्पितं गृह्यते[18] भ्रान्त्या[19] परतन्त्रं[20] न कल्प्यते ॥२८९॥

[1] वहिर्द्धा K. वहिर्वा T. [2] ष्ठाना: K. ष्ठाता: T. [3] न्ते T. [4] This verse is left out in (魏) [5] Left out in T. [6] मले न (魏) मलं न Tib. [7] क्ला T. क्लं (魏) [8] क्ले T. (魏) (唐) क्लं Tib. [9] मलं A. C. K. मलः T. मले Tib. [10] ने A. C. K. नं T. [11] धी K. (魏) [12] विधी T. [13] प्रज्ञा T. [14] तां K. [15] क्षांति T. [16] र्थे A. C. K. र्थं T. [17] चर K. [18] Left out in T. [19] न्त्य K. [20] तंत्र्यं T.

[1]चित्तं ह्यभूतसंभूतं[2] न चित्तं दृश्यते क्वचित् ।
देहभोगप्रतिष्ठानं ख्यायते[3] वासना नृणाम् ॥२९०॥
न सर्वभौतिकं रूपमस्ति रूपमभौतिकम् ।
गन्धर्वस्वप्नमाया या[4] मृगतृष्णा ह्यभौतिका[5] ॥२९१॥
प्रज्ञा हि त्रिविधा मह्यमार्यं येन प्रभावितम्[6] ।
[7]चित्तं ह्यदृश्यसंभूतं[8] तेन चित्तं न दृश्यते ॥२९२॥
देहभोगप्रतिष्ठाना ख्यायते वासना नृणाम् ।
[9]लक्षणं कल्पते येन यः स्वभावान्[10]वृणोति च ॥२९३॥
यानद्वयविसंयुक्ता प्रज्ञा ह्याभासवर्जिता ।
संभावाभिनिवेशेन श्रावकाणां प्रवर्तते ।
चित्तमात्रावतारेण प्रज्ञा ताथागती ऽमला[11] ॥२९४॥
सतो हि असतश्चापि प्रत्ययैर्यदि जायते ।
एकत्वान्यत्वदृष्टिश्च अवश्यं तैः समाश्रिता ॥२९५॥
विविधागतिर्हि[12] निर्वृत्ता[13] यथा माया न सिध्यति[14] ।
निमित्तं हि तथा चित्रं[15] कल्प्यमानं न सिध्यति ॥२९६॥
निमित्तदौष्ठुल्यमयं बन्धनं चित्तसंभवम् ।

[1] The following two lines are left out in (魏) (唐) Tib., but they are somewhat similar to p. 302, l. 3, also in (唐) Tib. [2] संभूं K. चित्त ह्यसंभूतं T. [3] ख्याद्यते K. [4] द्या A. C. T. या K. [5] भूति T. भौति (唐) Tib. [6] तां A. तं C. ता K. T. [7] The whole verse is left out in T. (唐) Tib., but it is already mentioned in p. 302, ll. 3–4, also in (唐) Tib. [8] ह्व A. C. ह्य K. [9] तत्व is added in T. [10] यच्च T. [11] मला T. Tib. 如來智無垢 (魏) त्यमला ? [12] धां गाथाभि T. [13] वृं C. Tib. [14] सि A. C. K. ति T. [15] त्तं K.

परिकल्पितं ह्यजानानैः परतन्त्रं विकल्प्यते ॥२९७॥
य एव[1] कल्पितो भावः परतन्त्रं तदेव हि[2] ।
कल्पितं हि[3] विचित्राभं परतन्त्रं वि[4]कल्प्यते ॥२९८॥
संवृतिः परमार्थश्च[5] तृतीयं नास्ति हेतुकम्[6] ।
कल्पितं संवृतिर्ह्युक्ता तच्छेदादार्यगोचरः ॥२९९॥
यथा हि योगिनां वस्तु चित्रमेकं विराजते ।
न ह्यस्ति चित्रता[7] तत्र तथा कल्पितलक्षणम् ॥३००॥
यथा हि तैमिरैश्चित्रं कल्प्यते रूपदर्शनम् ।
तिमिरं न रूपं नारूपं परतन्त्रं तथा बुधैः ॥३०१॥
हेमं स्यात्तु यथा[8] शुद्धं जलं कलुषवर्जितम् ।
गगनं हि घनाभावात्तथा शुद्धं विकल्पितम् ॥३०२॥
श्रावक[9]स्त्रिविधो[10] मह्यं[11] निर्मितः प्रणिधानजः ।
रागद्वेषविसंयुक्तः श्रावको धर्मसंभवः ॥३०३॥
बोधिसत्त्वो ऽपि त्रिविधो[10] बुद्धानां नास्ति लक्षणम् ।
चित्ते चित्ते तु सत्त्वानां बुद्धबिम्बं विदृश्यते ॥३०४॥
नास्ति वै कल्पितो भावः परतन्त्रं च विद्यते ।
समारोपापवादं च विकल्पं नो[12] विनश्यति ॥३०५॥

[1] यदेतत्क K. य एव क T. [2] तो भावः परतंत्र स ए हि T. [3] तु T. [4] त्रो ति T. [5] र्थं च A. C. [6] ज Tib. [7] चित्तता? 彼處無心體 (魏), but Tib. agrees with text. [8] तया A. C. K. यथा T. [9] कं A. C. का K. के T. [10] धं T. [11] मह्य A. C. K. [12] त्से वै Tib.

कल्पितं यद्यभावः स्यात्परतन्त्रस्वभावतः[1] ।
विनाभावेन वै भावं भावश्चाभावसंभवः[2] ॥३०६॥
परिकल्पितं समाश्रित्य परतन्त्रं प्रलभ्यते[3] ।
निमित्तनामसंबन्धाज्जायते परिकल्पितम् ॥३०७॥
अत्यन्तं चाप्यनिष्पन्नं कल्पितेन[4] परोद्भवम् ।
तदा[5] प्रज्ञायते शुद्धः स्वभावः पारमार्थिकः ॥३०८॥
परिकल्पितं दशविधं परतन्त्रं च षड्विधम् ।
तथता च[6] प्रत्यात्मगतिमतो[7] नास्ति विशेषणम् ॥३०९॥
पञ्चधर्मा भवेत्तत्वं स्वभावा हि त्रयस्तथा ।
एतद्विभावयन्योगी तथतां[8] नातिवर्तते ॥३१०॥
नक्षत्रमेघसंस्थानं सोमभास्करसंनिभम्[9] ।
चित्तं संदृश्यते नृणां[10] दृश्याभं वासनोदितम् ॥३११॥
भूतालब्धात्मका ह्येते न लक्ष्यं न च लक्षणम् ।
सर्वे भूतमया भूता यदि रूपं हि भौतिकम्[11] ॥३१२॥
असंभूता महाभूता नास्ति भूतेषु भौतिकम् ।
कारणं हि महाभूताः[12] कार्यं[13] भूसलिलादयः ॥३१३॥
द्रव्यप्रज्ञप्तिरूपं च मायाजातिकृतं तथा ।

[1] न्त्रं T. [2] भावं चा A. C. K. [3] न्त्रोप in all MSS. [4] तं न Tib. but the text agrees with (魏), while it is left out in (唐) [5] यया T. [6] Left out in T. [7] गतिर (魏) Tib. [8] ता A. C. K. तां T. [9] भः A. C. K. भं T. [10] नृणां चित्तं T. [11] भू K. [12] ता T. [13] र्यं K.

स्वप्नगन्धर्वरूपं च मृगतृष्णा च पञ्चमम् ॥३१४॥
इच्छन्तिकं पञ्चविधं गोत्राः पञ्च तथा भवेत् ।
पञ्चयानान्ययानं च निर्वाणं षड्विधं भवेत् ॥३१५॥
स्कन्धभेदाश्चतुर्विंशद्रूपं चाष्टविधं भवेत् ।
बुद्धा भवेच्चतुर्विं[1]शद्विविधाश्च जिनौरसाः ॥३१६॥
अष्टोत्तरं नयशतं श्रावकाश्च त्रयस्तथा ।
क्षेत्रमेकं हि बुद्धानां बुद्ध[2]श्चैकस्तथा भवेत् ॥३१७॥
विमुक्तयस्तथा तिस्रः[3] चित्तधारा चतुर्विधा ।
नैरात्म्यं षड्विधं मह्यं ज्ञेयं चापि चतुर्विधम् ॥३१८॥
कारणैश्च विसंयुक्तं दृष्टिदोषविवर्जितम् ।
प्रत्यात्मवेद्यमचलं[4] महायानमनुत्तरम् ॥३१९॥
उत्पादं[5] चाप्यनुत्पादमष्टधा नवधा भवेत् ।
एका[6]नुपूर्वसमयं सिद्धान्तमेकमेव च ॥३२०॥
आरूप्यधात्वष्टविधं ध्यानभेद[7]श्च षड्विधः ।
प्रत्येकजिनपुत्राणां निर्याणं सप्तधा भवेत् ॥३२१॥
अध्वत्रयं न चैवास्ति नित्यानित्यं च नास्ति[8] वै ।
क्रिया कर्म फलं चैव स्वप्नकार्यं तथा भवेत् ॥३२२॥
अन्ताद्या[9]संभवा बुद्धाः श्रावकाश्च जिनौरसाः ।

[1] शद्विवि left out in K. [2] बुद्धा T. [3] त्रीणि in all MSS. [4] द्यं हि अचलं T. [5] चाप्य T. [6] एता A. C. [7] दै A. दे C. [8] न चास्ति T. [9] अंद्याना K. T. [10] नो K.

चित्तं दृश्यविसंयुक्तं मायाधर्मोपमं सदा ॥३२३॥
गर्भश्चक्रं तथा[1] जातिर्नैष्क्रम्यं तुषितालयम्[2] ।
सर्वक्षेत्रगताश्चापि दृश्यन्ते न च योनिजाः ॥३२४॥
संक्रान्तिं संचरं[3] सत्त्वं[4] देशना निर्वृतिस्तथा ।
सत्यं क्षेत्रावबोधिश्च प्रत्यय[5]प्रेरितो भवेत् ॥३२५॥
लोका वनस्पतिर्द्वीपो[6] नैरात्म्यतीर्थसंचरम्[7] ।
ध्यानं यानालय[8]प्राप्तिरचिन्त्य[9]फलगोचरम् ॥३२६॥
चन्द्रनक्षत्रगोत्राणि नृपगोत्रा सुरालयम् ।
यक्षगन्धर्वगोत्राणि कर्मजा तृष्णसंभवा ॥३२७॥
अचिन्त्यपरिणामी च च्युतिर्वासनसंयुता ।
व्युच्छिन्नच्युत्यभावेन[10] क्लेशजालं निरुध्यते ॥३२८॥
धनधान्यं सुवर्णं च क्षेत्रवस्तु विकल्प्यते[11] ।
गवैडकाश्च दासा वै तथा हयगजादयः ॥३२९॥
[12]तल्पविद्धे न स्वप्तव्यं भूमिश्चापि न लेपयेत् ।
सौवर्णराजतं पात्रं कांसं ताम्रं न कारयेत् ॥३३०॥
कम्बला नीलरक्ताश्च काषायो गोमयेन च ।
कर्दमैः फलपत्त्रैश्च शुक्लान्[13]योगी रजे[14]त्सदा ॥३३१॥

[1] गर्भावक्रान्तिस्तथा (唐) [2] यात् A. C. (唐) यं K. T. Tib. [3] संक्रान्तिः संचरः (魏) Tib. [4] त्त्वो A. C. [5] यै T. [6] दीप A. C. द्वीप K. T. [7] सेवनं A. C. [8] यं K. [9] चिंत्यं T. चिन्त्यः Tib. [10] च्युतिभासेन Tib. [11] न कल्पते (魏) (唐) [12] श A. C. K. [13] शुक्लाने यो A. [14] भजे A. C.

शैलीकं मृन्मयं[1] लोहं शाङ्खं वै स्फटिकं[2]मयम् ।
पात्रार्थं धारयेद्योगी परिपूर्णं च मागधम् ॥३३२॥
चतुरङ्गुलं भवेच्छस्त्रं[3] कुब्जं वै वस्तुच्छेदनः[4] ।
शिल्पविद्यां न शिक्षेत योगी योगपरायणः ॥३३३॥
क्रयविक्रयो[5] न कर्तव्यो[5] योगिना योगिवाहिना ।
आरामिकैश्च कर्तव्यमेतद्धर्मं वदाम्यहम् ॥३३४॥
गुप्तेन्द्रियं त[6]थार्थज्ञं सूत्रान्ते विनये तथा ।
गृहस्थैर्न[7] च संसृष्टं योगिनं तं वदाम्यहम् ॥३३५॥
शून्यागारे श्मशाने वा वृक्षमूले गुहासु वा ।
पलाले ऽभ्यवकाशे च योगी वासं प्रकल्पयेत् ॥३३६॥
त्रिवस्त्रप्रावृतो नित्यं श्मशानाद्यत्र[8] कुत्रचित् ।
वस्त्रार्थं संविधातव्यं यश्च दद्यात्सुखागतम् ॥३३७॥
युगमात्रानुसारी स्यात्पिण्डभक्ष[9]परायणः ।
कुसुमेभ्यो यथा भ्रमरास्तथा पिण्डं समाचरेत् ॥३३८॥
गणे च गणसंसृष्टे[10] भिक्षुणीषु च यद्भवेत् ।
तद्धि आजीवसंसृष्टं न तत्कल्पति योगिनाम् ॥३३९॥
[11]राजानो राजपुत्राश्च अमात्याः श्रेष्ठिनस्तथा ।

[1] शैलिकं मृत्म K. [2] कं in all MSS. [3] स्त्रं (魏) (唐) Tib. भवेच्छुरीं ? 四指量刀子(唐) [4] वस्त्रच्छेदनम् (魏) (唐) Tib. [5] °या °व्या in all MSS., but (魏) (唐) Tib. [6] य (魏) [7] स्ये न in all MSS., but Tib. [8] शाने ऽन्यत्र (魏) (唐) Tib. [9] एडाभक्षा K. [10] ष्ट K. [11] The following two verses are in K. only.

पिण्डार्थं नोपदेशेत योगी योगपरायणः ॥३४०॥
तृणसूत्रकुलानं[1] च मित्रप्रीतिसमन्वितम् ।
भिक्षुभिक्षुणिसंसृष्टं न तत्कल्पति योगिनाम् ॥३४१॥
विहारे यत्र वै धूमः पच्यते विधिवत्सदा ।
उद्दिश्य यत्कृतं चापि न तत्कल्पति योगिनाम् ॥३४२॥
उत्पादभङ्गनिर्मुक्तं सदसत्पक्षवर्जितम् ।
लक्ष्यलक्षणसंयुक्तं योगी लोकं विभावयेत् ॥३४३॥
समाधिबलसंयुक्तमभिज्ञैर्वशितैश्च[2] वै ।
न चिरात्तु भवेद्योगी यद्युत्पादं न कल्पयेत् ॥३४४॥
अणुकालप्रधानेभ्यः कारणेभ्यो न कल्पयेत् ।
हेतुप्रत्ययसंभूतं योगी लोकं न कल्पयेत् ॥३४५॥
स्वकल्पकल्पितं लोकं चित्तं वै वासनोदितम् ।
प्रतिपश्येत्[3]सदा योगी मायास्वप्नोपमं भवम् ॥३४६॥
अपवादसमारोपवर्जितं दर्शनं सदा ।
देहभोगप्रतिष्ठाभं त्रिभवं न विकल्पयेत् ॥३४७॥
कृतभक्तपिण्डो[4] निश्चितं[5]मृजुं संस्थाप्य वै तनुम् ।
बुद्धांश्च बोधिसत्त्वांश्च नमस्कृत्य[6] पुनः पुनः ॥३४८॥
विनयात्सूत्रयुक्तिभ्यां तत्त्वं संहृत्य योगवित् ।
पञ्चधर्म[7]स्वचित्तं च नैरात्म्यं च विभावयेत् ॥३४९॥

[1] मृतसूतकुलान्नं (魏) (唐) Tib. [2] ज्ञो ऽभिज्ञाभिर्वशितैश्च (魏) (唐) Tib.
[3] श्यं K. [4] ण्डः K. [5] त्त A. C. त्तं K. निश्चिदृजुं (唐) Tib. [6] त्वा K. [7] धर्मं ?

प्रत्यात्मधर्मताशुद्धा भूमयो बुद्धभूमि च ।
एतद्विभावयेद्योगी महापद्मे[1] ऽभिषिच्यते ॥३५०॥
वि[2]भ्राम्य गतयः सर्वा भवादुद्वेगमानसः[3] ।
योगानारभते चित्रां गत्वा शिवमथीं शु[4]भाम्[5] ॥३५१॥
[6]सोमभास्करसंस्थानं पद्मपत्त्रांशुसंप्रभम् ।
गग[7]नाग्निचित्रसदृशं योगी पु[8]ञ्जान्प्रपश्यते ॥३५२॥
निमित्तानि च चित्राणि तीर्थ्यमार्गं नयन्ति ते[9] ।
श्रावकत्वे निपात्यन्ति[10] प्रत्येकजिनगोचरे ॥३५३॥
विधूय सर्वाण्येतानि निराभासो यदा भवेत् ।
तदा बुद्धकरादित्याः सर्वक्षेत्रसमागताः ।
शिरो हि तस्य मार्जन्ति निमित्तं तथतानुगाः[11] ॥३५४॥
अस्त्यनाकारतो[12] भावः शाश्वतोच्छेदवर्जितः ।
स[13]दसत्पक्षविगताः कल्पयिष्यन्ति मध्यमम् ॥३५५॥
अहेतुवादे कल्प्यन्ते[14] अहेतूच्छेददर्शनम् ।
वाह्यभावापरिज्ञानान्नाशयिष्यन्ति मध्यमम् ॥३५६॥
भावग्राहं न मोक्ष्य[15]ते मा भूदुच्छेददर्शनम् ।
समारोपापवादेन देशयिष्यन्ति मध्यमम् ॥३५७॥

[1] धर्म A. K. [2] एवं for वि in K. [3] स left out in A. C. [4] ल for शु in K. [5] This quarter is left out in Tib. [6] भो for सो in K. [7] न left out in A. [8] पंचत A. पंचान् C. पुंजान् K. [9] For तानि ? [10] न्ते ? [11] गम् (魏) Tib. [12] करतो A. कारतो C. कारणतो K. [13] सदा A. [14] दैः कल्पन्ते (魏) (唐) Tib. [15] क्ष्यं K.

चित्त[1]मात्रावबोधेन बाह्यभावा[2] व्युदाश्रया[3] ।
विनिवृत्तिर्विकल्पस्य प्रतिपत्त्यै[4] च मध्यमा ॥३५८॥
चित्तमात्रं न दृश्य[5]न्ति[6] दृश्याभावान्न जायते ।
प्रतिपन्मध्यमा चैषा मया चान्यैश्च देशिता ॥३५९॥
उत्पादं चाप्यनुत्पादं भावाभावश्च शून्यता ।
नैःस्वभाव्यं च भावानां द्वयमेतन्न कल्पयेत् ॥३६०॥
विकल्पवृत्त्या भावो न[7] मोक्षं क[8]ल्पेन्ति बालिशाः ।
न चित्तवृत्त्यसंबोधाद्द्वयग्राहः प्रहीयते ॥३६१॥
स्वचित्तदृश्यसंबोधाद्द्वयग्राहः प्रहीयते ।
प्रहाणं हि परिज्ञानं विकल्पस्याविनाशकम्[9] ॥३६२॥
चित्तदृश्यपरिज्ञानाद्विकल्पो न प्रवर्तते ।
अप्रवृत्तिर्विकल्पस्य तथता चित्तवर्जिता ॥३६३॥
तीर्थ्यदोषविनिर्मुक्ता प्रवृत्तिर्यदि दृश्यते ।
सा विद्वद्भिर्भवेद्ग्रा[10]ह्या नि[11]वृत्तिश्चाविनाशतः ॥३६४॥
अस्यावबोधाद्बुद्धत्वं मया बुद्धैश्च देशितम् ।
अन्यथा कल्प्यमानं हि तीर्थ्यवादः प्रसज्यते ॥३६५॥
अजाः प्रसू[12]तजन्मा वै अच्युताश्च च्यवन्ति च ।

[1] त्र A. C. [2] वो A. C. वा K. [3] वान्व्युदासयेत् (唐) The text of Tib. seems different. [4] त्से K. त्सैव (魏) (唐) Tib. [5] श्या A. [6] न्ते ? [7] वृत्त्यभावेन (唐) Tib. [8] ल्प A. C. [9] कां A.=कं । ? [10] सचिद्भवेद्ग्रा A. सविद्वद्भिर्भवेद्ग्रा C. सा विद्वद्भिर्भवेद्वा K. [11] निर्वृ (魏) (唐), but the text agrees with Tib. [12] सु A.

युगपज्जलचन्द्राभा दृश्यन्ते क्षेत्रकोटिषु ॥३६६॥
एकधा बहुधा भूत्वा वर्षन्ति च ज्वलन्ति वै[1] ।
चित्ते[2] चित्तमया[3] भूत्वा चित्तमात्रं वदन्ति ते ॥३६७॥
चित्ते[4] चित्तमात्रं च अचित्ता चित्तसंभवा[5] ।
विचित्ररूप[6]संस्थानाश्चित्तमात्रे गतिंगताः ॥३६८॥
मौनी[7]न्द्रैः श्रावकै रूपैः प्रत्येकजिनसादृशैः ।
अन्यैश्च विविधै रूपैश्चित्तमात्रं वदन्ति ते ॥३६९॥
आरूप्यरूपं ह्यारूपै[8]र्नारकानां च नारकम् ।
रूपं दर्शयन्ति सत्त्वानां चित्तमात्रस्य कारणम् ॥३७०॥
मायोपमं समाधिं च कायं चापि मनोमयम् ।
दशभू[9]मीश्च वशिताः परा[10]वृत्ता लभन्ति ते ॥३७१॥
स्वविकल्पविपर्या[11]सैः प्रपञ्चस्पन्दितैश्च वै ।
दृष्टश्रुतमतज्ञाते बाला ब[12]ध्यन्ति संज्ञया ॥३७२॥
निमित्तं[13] परतन्त्रं[14] हि यन्नाम तत्र कल्पितम् ।
परिकल्पित[15]निमित्तं पारतन्त्र्यात्प्रवर्तते ॥३७३॥
बुद्ध्या विवे[16]च्यमानं हि[17] न तन्त्रं नापि कल्पितम् ।
निष्पन्नो नास्ति वै भावः कथं बुद्ध्या[18] प्रकल्प्यते[19] ॥३७४॥

[1] च वर्षंति are put in after वै in K. [2] चिं K. [3] चिमया K. [4] चित्तेषु ? Tib. [5] भावाः K. [6] पं K. [7] नि K. [8] प्यै ? Tib. [9] मे A. C. म K. [10] मरो K. [11] पर्यो A. C. [12] बु in all MSS. (魏), but (唐) Tib. [13] त्त A. C. K. [14] परवृत्तं A. C. परतन्त्वं K. [15] तं (魏) Tib. [16] घ्य K. [17] तु K. [18] बुध्या A. K. वुद्धा C. [19] प्रंतत्प्यते A. प्रंकत्प्यते C.

निष्पन्नो विद्यते भावो भावाभावविवर्जितः[1] ।
भावाभावविनिर्मुक्तौ द्वौ स्वभावौ कथं भवेत्[2] ॥३७५॥
परिकल्पिते स्वभावे च स्वभावौ द्वौ प्रतिष्ठितौ ।
कल्पितं दृश्यते चित्रं विशुद्धमार्यगोचरम् ॥३७६॥
कल्पितं हि विचित्राभं परतन्त्रे विकल्प्यते ।
अन्यथा कल्[3]पमानं हि तीर्थ्यवादं समाश्रयेत् ॥३७७॥
कल्पना कल्पनेत्युक्तं दर्शनाद्धेतुसंभवम् ।
विकल्पद्वय[4]निर्मुक्तं निष्पन्नं स्यात्तदेव हि ॥३७८॥
क्षेत्रं बुद्धाश्च[5] निर्माणा एकं यानं त्रयं तथा ।
न निर्वाणमहं सर्वे शून्यामुत्पत्तिवर्जिताम्[6] ॥३७९॥
षट्त्रिंशद्बुद्धभेदाश्च दशभेदा पृथक्पृथक् ।
सत्त्वानां चित्तसंताना एते क्षेत्रा[7]ण्यभाजनम् ॥३८०॥
यथा हि कल्पितं[8] भावं ख्यायते चित्रदर्शनम् ।
न ह्यस्ति चित्रता तत्र बुद्धधर्मं[9] तथा जगम्[10] ॥३८१॥
धर्मबुद्धो भवेद्बुद्धः शेषा वै तस्य निर्मिताः ।
सत्त्वाः स्ववी[11]जसंतानं पश्यन्ते बुद्धदर्शनैः ॥३८२॥
भ्रान्तिनिमित्तसंबन्धाद्विकल्पः संप्रवर्तते ।

[1] तं A. C. [2] For dual ? [3] ल्प्य ? [4] वि is added in K. only.
[5] क्षेत्रबुद्धाश्च K. [6] शून्या उत्पत्तिवर्जिताः (唐) Tib. [7] क्षेत्रस्य Tib. [8] तं left out in K. तो भावः (魏) (唐) Tib. [9] धर्मबुद्धं K. [10] जगे A. C. (唐) गेज K. जगम् (魏) Tib. [11] स्वजीव A. C. K. स्ववीज (魏)(唐) Tib.

विकल्पा[1] तथता नान्या[2] न निमि[3]त्ता वि[4]कल्पना ॥ ३८३ ॥
स्वाभाविकश्च संभोगो निर्मितं पञ्चनिर्मितम्[5] ।
षट्त्रिंशकं बुद्धगणं[6] बुद्धः[7] स्वाभाविको भवेत् ॥ ३८४ ॥
नीले रक्ते ऽथ लवणे शङ्खे[8] क्षीरे च शार्करे[9] ।
कषायैः फलपुष्पाद्यैः किरणा यथ[10] भास्करे[11] ॥ ३८५ ॥
न चान्ये न च नानन्ये तरङ्गा ह्यु[12]दधान्विता[13]: ।
विज्ञानानि तथा[14] सप्त चित्तेन सह संयुता[15] ॥ ३८६ ॥
उदधेः परिणामासौ[16] तरङ्गाणां विचित्रता ।
आलयं हि तथा चित्रं विज्ञानाख्यं प्रवर्तते ॥ ३८७ ॥
चित्तं मनश्च विज्ञानं लक्षणार्थं प्रकल्प्यते ।
अभिन्नलक्ष[17]णान्यष्टौ न च लक्ष्यं न लक्षणम् ॥ ३८८ ॥
उदधेश्च तरङ्गाणां यथा नास्ति विशेषणम् ।
विज्ञानानां तथा चित्ते परिणामो न लभ्यते ॥ ३८९ ॥
चित्तेन चीयते कर्म मनसा च विचीयते ।
विज्ञानेन विजाना[18]ति दृश्यं कल्पेति पञ्चभिः ॥ ३९० ॥
नीलरक्तप्रकारं हि विज्ञानं ख्यायते नृणाम् ।

[1] ल्पो A. ल्पात्त (魏) (唐) Tib. [2] न्यो A. [3] मि A. [4] दि A. C. K. त्ताद्वि (魏) Tib. [5] यं च निर्मितम् (魏) (唐) Tib. [6] षट्त्रिंशको बुद्धगणो (魏) Tib. °गुण (唐) [7] बुद्धाः K. [8] शंख्ये K. [9] शङ्करे in all MSS., but (魏) Tib. [10] था A. K. [11] रेः K. [12] ह्य A. C. [13] धाविव (魏) [14] तथा in (魏) Tib. only. [15] ताः A. C. K. [16] णामो ऽसौ Tib. [17] ण left out in K. [18] ना left out in K.

तरङ्गचित्तसाधर्म्यं वद क[1]स्मान्महामुने ॥३०१॥
नीलरक्तप्रकारं हि तरङ्गेषु न विद्यते ।
वृत्तिश्च व[2]र्ण्यते चित्ते लक्षणार्थं हि बालि[3]शाः ॥३०२॥
न[4] तस्य विद्यते वृत्तिः स्वचित्तं ग्राह्यवर्जितम् ।
ग्राह्ये सति हि वै ग्राह्यस्तरङ्गैः सह साध्यते ॥३०३॥
देहभोगप्रतिष्ठानं विज्ञानं ख्यायते नृणाम् ।
तेनास्य दृश्यते वृत्तिस्तरङ्गैः सह सादृशाः ॥३०४॥
उदधिस्तरङ्गभावेन नृ[5]त्यमानो विभाव्यते ।
आलयस्य तथा वृत्तिः कस्माद्बुद्ध्या न गृह्यते ॥३०५॥
बालानां बुद्धिवैकल्यादालयं ह्युदधेर्यथा ।
तरङ्गवृत्तिसाध[6]र्म्या दृ[7]ष्टान्तेनोपनीयते ॥३०६॥
उदेति भास्करो यद्वत्सम[8]ं ही[9]नोत्तमे जने ।
तथा त्वं लोकप्रद्योत तत्त्वं देशे[10]सि बालिशा[11]न् ॥३०७॥
कृत्वा धर्मे[12]ष्ववस्थानं कस्मात्तत्त्वं न भाषसे ।
भाषसे यदि तत्त्वं वै तत्त्वं चित्ते न विद्यते ॥३०८॥
उदधेर्यथा तरङ्गाणि दर्पणे[13] सुपिने यथा ।
दृश्यन्ते युगप[14]त्काले तथा चित्तं स्वगोचरे ।

[1] कस्या A. [2] र्णं A. C. र्ण्य K. [3] सां K. शान् ? [4] हि is added in K. [5] नृत्त K. [6] र्म्मा K. [7] दृष्ट्वा K. दृष्टा (魏) Tib. [8] यद्धर्म्मसं K. समहीनो Tib. [9] हिनो A. हीमा K. [10] मि A. C. सि K. [11] शा A. शां C. शान् K. [12] ष्वे K. [13] दर्प्यणे ध्व K. [14] पत्यका K.

वैकल्याद्विषयाणां हि क्रमवृत्त्या प्रवर्तते ॥३९९॥
विज्ञानेन विजानाति मनसा मन्यते पुनः ।
पञ्चानां ख्यायते दृश्यं क्रमो नास्ति समाहिते ॥४००॥
चित्राचार्यो यथा कश्चिच्चित्रान्तेवासिको[1] ऽपि वा ।
चित्रार्थे नामयेद्रङ्गं[2][3] देशनापि तथा मम ॥४०१॥
रङ्गे न विद्यते चित्रं न कुड्ये[4] न च भाजने ।
सत्त्वानां कर्षणार्थाय रङ्गैश्चित्रं[5] विकल्प्यते[6] ॥४०२॥
देशनाव्यभिचारी च तत्त्वं ह्यक्षरवर्जितम्[7] ।
कृत्वा धर्मे व्यवस्थानं तत्त्वं देशेमि योगिनाम् ॥४०३॥
तत्त्वं प्रत्यात्मगतिकं[8] कल्प्यकल्पनवर्जितम् ।
देशेमि जिनपुत्राणां बालानां देशनान्यथा ॥४०४॥
विचित्रा हि यथा माया दृश्यते न च विद्यते ।
देशना हि तथा चित्रा दृश्यते ऽव्यभिचारिणी ॥४०५॥
देशना हि यदन्यस्य तदन्यस्याप्यदेशना ।
आतुरे[9] आतुरे[9] यद्वद्भिषग्द्रव्यं[10] प्रयच्छति ।
बुद्धा हि तद्वत्सत्त्वानां चित्तमात्रं वदन्ति ते ॥४०६॥
बाह्यवासनवीजेन[11] विकल्पः संप्रवर्तते ।
तत्त्वं हि येन गृह्णाति[12] यद्गृह्णाति[12] स कल्पितम् ॥४०७॥

[1] तो A. C. को K. [2] न्यासये Tib. [3] द्रग्गं K. [4] तूलौ or तूल्यां or तुर्यां ? Tib [5] चि K. [6] ल्प K. [7] वि A. C. व K. [8] व्या K.
[9] ले A. [10] ग्र A. [11] विर्यन A. [12] ह्रा A. C. K.

वाह्यमालम्बनं गृह्यं चित्तं चाश्रित्य[1] जायते ।
द्विधा प्रवर्तते भ्रान्तिस्तृतीयं नास्ति कारणम् ॥४०८॥
यस्माच्च जायते भ्रान्तिर्यदा[2]श्रित्य च जायते ।
षड्द्वादशाष्टादशकं चित्तमेव वदाम्यहम् ॥४०९॥
स्ववीजग्राह्यसंबन्धादात्मग्राहः प्र[3]हीयते ।
चित्तकल्पावतारेण धर्मग्राहः प्रहीयते ॥४१०॥
यत्तु[4] आलयविज्ञानं तद्विज्ञानं प्रवर्तते ।
आध्यात्मिकं ह्यायतनं भवेद्वाह्यं य[5]दाभया ॥४११॥
नक्षत्रकेशग्रहणं स्वसरूपं यथाबुधैः ।
संस्कृतासंस्कृतं नित्यं कल्प्यते न च विद्यते ॥४१२॥
गन्धर्वनगरं माया मृगतृष्णाभासं[6] यथा ।
आसन्तो[7] वा विदृश्यन्ते परतन्त्रं[8] तथा भवेत् ॥४१३॥
आत्मेन्द्रियोपचारं हि त्रिचित्ते[9] देशयाम्यहम् ।
चित्तं मनश्च विज्ञानं स्वलक्षणविसंयुता[10] ॥४१४॥
चित्तं मनश्च विज्ञानं नैरात्म्यं स्याद्द्वयं तथा ।
पञ्चधर्माः स्वभावा[11] हि बुद्धानां गोचरो ह्ययम् ॥४१५॥
लक्षणेन भवेत्त्रीणि एकं वासनहेतुका[12]ः ।

[1] चो K. [2] ति य A. C. तिः य K. [3] जा Tib. [4] यथान्तु K. सं is added in K. [5] यदोभयात् A. C. [6] भसां A. C. K. [7] आसंना A. C. नो K. असन्तो (魏) (唐) Tib. [8] परंततं A. [9] नृचित्ते A. C. नृवित्ते K. न चित्ते Tib., but 我說三種心 (魏) 我依三種心 (唐) [10] युतं ? [11] वं A. C. वा K. [12] कात् Tib.

रङ्गं हि यथाप्येकं[1] कुड्ये[2] चित्रं विदृश्यते ॥४१६॥
नैरात्म्यमद्वयं[3] चित्तं मनो विज्ञानमेव च ।
पञ्चधर्मा[4]: स्वभावा[5] हि मम गोत्रे न सन्ति ते ॥४१७॥
चित्तलक्षणनिर्मुक्तं विज्ञानमन[6]नवर्जितम् ।
धर्मस्वभावविरहं[7] गोत्रं ता[8]थागतं लभेत् ॥४१८॥
कायेन वाचा मनसा न तत्र क्रियते शुभम् ।
गोत्रं ताथागतं शुद्धं समुदाचारवर्जितम् ॥४१९॥
अभिज्ञै[9]र्वशितैः शुद्धं समाधिबलमण्डितम् ।
कायं मनोमयं चित्रं गोत्रं ताथागतं शुभम् ॥४२०॥
प्रत्यात्मवेद्यं ह्यमलं[10] हेतुलक्षणवर्जितम् ।
अष्टमी[11] बुद्धभूमिश्च गोत्रं ताथागतं भवेत् ॥४२१॥
दूरंगमा[12] साधुमती[13] धर्ममेघा तथागती ।
एतद्धि गोत्रं बुद्धानां शेषा यानद्वयावहा ॥४२२॥
सत्त्वसंतानभेदेन लक्षणार्थं च बालिशाम्[14] ।
देश्यन्ते भूमयः सप्त बुद्धैश्चित्तवशं गताः ॥४२३॥
वाक्कायचित्तदौष्ठुल्यं सप्तम्यां न प्रवर्तते ।
अष्टम्यां ह्याश्रयस्तस्य स्वप्नौघसमसादृशः ॥४२४॥

[1] In this quarter one syllable is wanting. [2] च्ये A. C., and left out in K., but follow Chin. [3] त्म्यं द्वयं ? [4] र्मा A. C. K. [5] वो K. [6] विज्ञानेनर्मन A. [7] रंह K. [8] त A. [9] ज्ञाव Tib. [10] ह्यम A. C. ह्यं ह्य K. [11] मि A. [12] लं K. [13] ति A. [14] शां A. C. साम् K.

भूम्यष्टम्यां च[1] पञ्चम्यां शिल्पविद्याकलागमम् ।
कुर्वन्ति जिनपुत्रा वै नृपत्वं च भवालये ॥४२५॥
उत्पादमथ नोत्पादं शून्याशून्यं न कल्पयेत् ।
स्वभाव[2]मस्वभावत्वं चित्तमात्रे न विद्यते ॥४२६॥
इदं तथ्यमिदं तथ्यमिदं मिथ्या विकल्पयेत् ।
प्रत्येकश्रावकाणां च देशना न जिनौरसाम् ॥४२७॥
सच्चासच्च सतो[3] नैव क्षणिकं लक्षणं न वै ।
प्रज्ञप्तिद्रव्यसन्नैव चित्तमात्रे न विद्यते ॥४२८॥
भावा विद्यन्ति संवृत्त्या परमार्थे न [4]भावकाः ।
निः[5]स्वभावेषु या भ्रान्तिस्तत्सत्यं संवृति[6]र्भवेत् ॥४२९॥
असत्सु सर्वधर्मेषु प्रज्ञप्तिः क्रियते मया ।
अभिलापो व्यवहारश्च बा[7]लानां तत्त्ववर्जितः ॥४३०॥
अभिलापसंभवो भावो विद्यते ह्यर्थगोचरः ।
अभिलापसंभवो भावो दृष्ट्वा वै नास्ति विद्यते ॥४३१॥
कुड्याभावे यथा चित्रं च्छायायां[8] स्थाणुवर्जिते ।
आलयं तु तथा शुद्धं तरङ्गै[9]र्न विराजते ॥४३२॥
नटवत्तिष्ठते चित्तं मनो विदूषसादृशम् ।
विज्ञानपञ्चकैः सार्धं दृश्यं कल्पति रङ्गवत्[10] ॥४३३॥

[1] म्यथ A. म्याथ K. [2] स्वभाव्य K. [3] सता A. सतो C. K. [4] नै स्वभा K. [5] निस्व A. K. निःस्व C. [6] तिं भ K. [7] ला left out in K. [8] छाया च ? [9] ङ्गैर्न ([illegible]) Tib. [10] वेत् K.

देशनाधर्मनिष्यन्दो[1] यच्च निष्यन्दनिर्मितम् ।
बुद्धा ह्येते भवेत्मौरा[2]: शेषा निर्माणविग्रहा: ॥ ४३४ ॥
दृश्यं[3] न विद्यते चित्तं[4] चित्तं दृश्यात्प्रमुह्यते[5] ।
देहभोगप्रतिष्ठानमालयं ख्यायते नृणाम् ॥ ४३५ ॥
चित्तं मनश्च विज्ञानं स्वभावं धर्मपञ्चकम् ।
नैरात्म्यं द्वितयं शुद्धं प्रभाषन्ते विनायका: ॥ ४३६ ॥
तार्किकानामविषयं श्रावकाणां न चैव हि ।
यं देशयन्ति वै नाथा प्रत्यात्मगतिगोचरम् ॥ ४३७ ॥
दीर्घह्रस्वादिसंबद्धमन्योन्यत: प्रवर्तते ।
अस्तित्वसाधका[6] नास्ति अस्ति नास्तित्वसाधकम् ॥ ४३८ ॥
अणु[7]शो विभज्य[8] द्रव्यं न वै रूपं विकल्पयेत् ।
चित्त[9]मात्र[10]व्यवस्थानं कुदृष्ट्या न प्रसीदति ॥ ४३९ ॥
मा शून्यतां[11] विकल्पेथ माशून्यमिति वा पुन: ।
नास्त्यस्तिकल्पनैवेयं कल्प्य[12]मर्थं न विद्यते ॥ ४४० ॥
गुणाणु[13]द्रव्यसंघाते रूपं बालैर्वि[14]कल्प्यते ।
एकैकमणु[15]शो नास्ति अतो ऽप्यर्थं न विद्यते ॥ ४४१ ॥
स्वचित्तं दृश्यसंस्थानं वहिर्धा ख्यायते नृणाम् ।

[1] ष्यंदं K. [2] बुद्धो ह्येते भवेदौरा: (魏) (唐) Tib. [3] दृश्ये (魏)
[4] चं Tib. [5] च्य A. C. K. ह्म (魏) Tib. [6] कं (魏) Tib. [7] अनु A. C. K.
णु (魏) Tib. [8] जन्द्र ? [9] चित्र A. C. K., but 説但是於心 (魏) [10] त्रं K.
[11] ता K. [12] ल्प K. [13] गुणानु A. C. K., but 功德微塵合 (魏)
[14] रूपैर्बालं वि A. C. [15] नु A. C. K. णु (魏) (唐) Tib.

वाह्यं न विद्यते दृश्यमतो ऽप्यर्थं न विद्यते ॥४४२॥
चित्रं[1] केशोण्डुकं मायां स्वप्नगन्धर्वमेव च ।
अलातं[2] मृगतृष्णां च असन्तं ख्यायते[3] नृणाम् ॥४४३॥
नित्यानित्यं तथैकत्वमुभयं नोभयं तथा ।
अनादिदोषसंबद्धा[4] बालाः कल्पे[5]न्ति मोहिताः ॥४४४॥
यानव्यवस्था नैवास्ति यानमेकं वदाम्यहम् ।
परिकर्षणार्थं बालानां यानभेदं वदाम्यहम् ॥४४५॥
विमुक्तयस्तथा तिस्रो धर्मनैरात्म्यमेव च ।
समताज्ञानक्लेशाख्या विमु[6]क्त्या ते विवर्जिताः ॥४४६॥
यथा हि काष्ठमुदधौ तरङ्गैर्विप्रवाह्यते ।
तथा च[7] श्रावको मूढो लक्षणेन प्रवाह्यते ॥४४७॥
निष्ठागतिर्न तत्तस्या न[8] च भूयो निवर्तते ।
समाधिकायं संप्राप्य अ[9]कल्पान्न प्रबुध्यते[10] ॥४४८॥
वासनाक्लेशसंबद्धा पर्यु[11]त्थानैर्विसंयुताः ।
समाधिमदमत्तास्ते धातौ तिष्ठन्त्यनास्रवे ॥४४९॥
यथा हि मत्तः पुरुषो मद्याभावाद्विबुध्यते ।
तथा ते[12] बुद्धधर्माख्यं कायं प्राप्स्यन्ति[13] मामकम् ॥४५०॥

[1] चित्रं A. C. K. Tib. चित्तं ([illegible]) [2] अलाभं A. C. अलातं K.
[3] यतो K. [4] द्धो K. [5] ल्प A. C. [6] मु left out in K [7] Left out in K.
[8] रतस्या न K. तत्र स्यात्र Tib. [9] आ Tib. [10] प्रबुद्धात्तने A.
प्रबुध्यार्त्तते C. [11] प्रत्यु in all MSS., but Tib. [12] तया ते left out in K.
[13] ति A. C. न्ति K. .

पङ्कमग्नो[1] यथा हस्ती इतस्ततो न धावति ।
समाधिमदमग्ना वै तथा तिष्ठन्ति श्रावकाः ॥४५१॥
अधिष्ठानं नरेन्द्राणां[2] प्रणिधानैर्विशोधितम्[3] ।
अभिषेकसमाध्याद्यः प्रथमस्यां दशमाय वै[4] ॥४५२॥
आकाशं शशशृङ्गं च बन्ध्यायाः पुत्र एव च[5] ।
असंतश्चाभिलप्यन्ते[6] तथा भवेषु कल्पना ॥४५३॥
वासनाहेतुकं लोकं नासन्न सदसत्क्वचित् ।
ये पश्यन्ति विमुच्यन्ते धर्मनैरात्म्यकोविदाः ॥४५४॥
स्वभावकल्पितं नाम परभावश्च तन्त्रजः ।
निष्पन्नं तथतेत्युक्तं[7] सूत्रे सूत्रे सदा मया ॥४५५॥
व्यञ्जनं पदकायं च नाम चापि विशेषतः ।
बालाः सजन्ति[8] दुर्मेधा[9] यथा पङ्के महागजाः ॥४५६॥
देवयानं ब्रह्मयानं श्रावकीयं तथैव च ।
ताथागतं च प्रत्येकं यानान्येतान्वदाम्यहम् ॥४५७॥
यानानां नास्ति वै निष्ठा यावच्चित्तं प्रवर्तते ।
चित्ते तु वै परावृत्ते न यानं न च यायिनः ॥४५८॥
चित्तं विकल्पो विज्ञप्तिर्मनो विज्ञानमेव च ।

[1] ग्ना K. [2] ष्ठानान्तरे (魏) Tib. [3] प्रति A. K. प्रणि C. [4] माध्याद्यं प्रथमी दशमी च वै Tib. [5] Left out in K. [6] ग A. [7] ग A. C. K. त (魏) (唐) Tib. [8] सज्जंति A. C. सर्ज्जंति K. सजन्ति Tib. [9] धाः A. C. K.

आलयं त्रिभवश्रेष्टा[1] एते चित्तस्य पर्यया:[2] ॥४५९॥
आयुरुष्माथ[3] विज्ञानमालयो जीवितेन्द्रियम् ।
मनश्च मनविज्ञानं विकल्पस्य विशेषणम् ॥४६०॥
चित्तेन धार्यते कायो[4] मनो मन्यति वै सदा ।
विज्ञानं चित्तविषयं विज्ञानैः सह छिन्दति[5] ॥४६१॥
तृष्णा हि माता इत्युक्ता अविद्या च तथा पिता ।
विषयावबोधाद्विज्ञानं बुद्ध इत्युपदिश्यते ॥४६२॥
अर्हन्तो ह्यनुशया: स्कन्धा:[6] संघ: स्कन्धकपञ्चक:[7] ।
निरन्तरान्तरच्छेदात्कर्म ह्यानन्तरं[8] भवेत् ॥४६३॥
नैरात्म्यस्य द्वयं क्लेशा: तथैवावरणद्वयम् ।
अचिन्त्यपरिणामिन्याश्च्युतेर्[9]लाभास्[10]तथागता: ॥४६४॥
सिद्धान्तश्च नयश्चापि[11] प्रत्यात्मं शासनं च वै ।
ये पश्यन्ति विभागज्ञा[12] न ते तर्कवशं गता: ॥४६५॥
न भावो विद्यते सत्यं यथा बालैर्विकल्प्यते ।
अभावेन तु वै मोक्षं कथं नेच्छन्ति तार्किका: ॥४६६॥
उत्पादभङ्गसंबद्धं[13] संस्कृतं प्रतिपश्यत: ।
दृष्टिद्वयं प्रपुष्णन्ति न च जानन्ति प्रत्ययान् ॥४६७॥

[1] यस्त्रि C. [2] पर्या K. [3] रूष्मा A. C. रुष्मा K. रुष्मा (魏) (唐) Tib.
[4] काय: A. C. K. [5] नद्यि A. C. न्दति K. [6] अर्हन्तो ऽनुशया: सन्त: Tib.
[7] दंव in all MSS., but Tib. [8] र्यं ? [9] त्या K. [10] भाव Tib.
[11] नयाश्च A. [12] विभाव A. [13] द्ध A. C. व K.

एकमेव भवेत्सत्यं निर्वाणं मनवर्जितम् ।
कदलीस्वप्नमायाभं लोकं पश्येद्विकल्पितम् ॥४६८॥
रागो न[1] विद्यते द्वेषो मोहश्चापि न पुद्गलः ।
तृष्णाया ह्युदिताः स्कन्धा विद्यन्ते स्वप्नसादृशाः ॥४६९॥
यस्यां च[2] रात्र्यां धिगमो यस्यां च परिनिर्वृतः ।
एतस्मिन्नन्तरे नास्ति मया किंचित्प्रकाशितम्[3] ॥४७०॥
प्रत्यात्मधर्मस्थितितां[4] संधाय कथितं मया ।
तैश्च बुद्धैर्मया चैव न च किं[5]चिद्विशे[6]षितम् ॥४७१॥
द्रव्यवद्विद्यते ह्यात्मा स्कन्धा लक्षणवर्जिताः ।
स्कन्धा विद्यन्ति भावेन आत्मा तेषु न विद्यते ॥४७२॥
प्रतिपत्तिं[7] विभाव[8]न्तो क्लेशैर्मानुषसं[9]गमैः ।
मुच्यते सर्वदुःखेभ्यः स्वचित्तं पश्यतो जगत् ॥४७३॥
कारणैः प्रत्ययैश्चापि येषां लोकः प्रवर्तते ।
चातुष्कोटिकया युक्तो न ते मन्नयकोविदाः ॥४७४॥
सदसन्न जायते लोको नासन्न सदसत्क्वचित्[10] ।
प्रत्ययैः कारणैश्चापि कथं बालैर्विकल्प्य[11]ते ॥४७५॥
न सन्नासन्न सदसद्यदा[12] लोकं[13] प्रपश्यति ।

[1] नैंश्च K. रागश्च (魏) Tib. [2] च्चि K. [3] तः K. [4] तां left out in K.
[5] य कि for न च किं in K. [6] षि left out in K. [7] प्रतिप्रत्तिं ? (魏) (唐) Tib., though such a form does not yet occur in any dictionary. [8] वे (=वय) ?
[9] क्लेसैः मानुषयं K. क्लेशैः सानुशयंगणैः ? [10] सन्न सत्क्वचित् Tib. [11] ल्प A. C. ल्प्य K. [12] या A. C. दा K. [13] सदसन्यदा लोकः Tib.

तदा व्यावर्तते चित्तं नैरात्म्यं चाधिगच्छति[1] ॥४७६॥
अनुत्पन्नाः सर्वभावा[2] यस्मात्प्रत्ययसंभवाः ।
कार्यं हि प्रत्ययाः सर्वे न कार्याज्जायते भवः ॥४७७॥
कार्यं न जायते कार्यं द्वित्वं कार्ये प्रसज्यते[3] ।
न च द्वित्वप्रसङ्गेन कार्याभावो[4]पलभ्यते[5] ॥४७८॥
आलम्बालम्ब[6]विगतं यदा पश्यति संस्कृतम् ।
निमित्तं चित्तमात्रं हि चित्तमात्रं वदाम्यहम् ॥४७९॥
मात्रास्वभावसंस्थानं प्रत्ययैर्भाववर्जितम् ।
निष्ठाभाव[7]परं ब्रह्म एतां मात्रां वदाम्यहम् ॥४८०॥
प्रज्ञप्तिसत्यतो ह्यात्मा द्रव्यः स हि न विद्यते ।
स्कन्धानां स्कन्धता तद्वत्प्रज्ञप्त्या न तु द्रव्यतः ॥४८१॥
चतुर्विधा वै समता लक्षणं हेतुभाजनम्[8] ।
नैरात्म्यसमता चैव चतुर्थी योगयोगिनाम् ॥४८२॥
व्यावृत्तिः सर्वदृष्टीनां कल्प्यकल्पनवर्जिता ।
अनुपलम्भो ह्यजातिश्च चित्तमात्रं वदाम्यहम् ॥४८३॥
न भावं[9] नापि चाभावं[9] भावाभावविवर्जितम् ।
तथता चित्तनिर्मुक्तं चित्त[10]मात्रं वदाम्यहम् ॥४८४॥
तथता शून्यता कोटी[11] निर्वाणं धर्मधातुकम्[12] ।

[1] धि K. [2] वाः A. C. वा K. [3] ह्य A. ज्य C. K. [4] र्याद्वा Tib.
[5] ब्यते C. भ्यते K. [6] म्ब्य ? [7] वः Tib. [8] भावजम् Tib. [9] वो ?
[10] त्र A. C. [11] टि A. [12] तुश्च K.

कायं मनोमयं चित्तं[1] चित्तमात्रं वदाम्यहम् ॥४८५॥
विकल्पवासनाबद्धं विचित्रं चित्तसंभवम्[2] ।
वहिर्धा जायते[3] नृणां चित्तमात्रं[4] हि लौकिकम् ॥४८६॥
दृश्यं न विद्यते वाह्यं चित्तचित्रं[5] विदृश्यते ।
देहभोगप्रतिष्ठाभं चित्तमात्रं[4] वदाम्यहम् ॥४८७॥
श्रावकाणां क्षयज्ञानं बुद्धानां जन्मसंभवम् ।
प्रत्येकजिनपुत्राणां[6] असंक्लेशात्[7] प्रवर्तते ॥४८८॥
वहिर्धा नास्ति वै रूपं स्वचित्तं दृश्यते वहिः ।
अनवबोधात्स्वचित्तस्य बालाः कल्पेन्ति[8] संस्कृतम् ॥४८९॥
वाह्यमर्थमजानानैः स्वचित्तचित्र[9]दर्शनम्[10] ।
हेतुभिर्वार्यते मूढैश्चातुष्कोटिकयोजितैः ॥४९०॥
न हेतवो न कोट्यो वै दृष्टान्ता[11]वयवानि च ।
स्वचित्तं ह्यर्थसंक्रान्तं यदि जानन्ति पण्डिताः ॥४९१॥
विकल्पैर्न विकल्पेत[12] यद्वि[13]कल्पितलक्षणम् ।
कल्पितं च समाश्रित्य विकल्पः संप्रवर्तते ॥४९२॥
अन्योन्याभिन्नसंबन्धादेकवासनहेतुकाः[14] ।

[1] कायो मनोमयश्चित्तं (魏) कायो मनोमयश्चित्रम् Tib. [2] चित्त A. C. K. Tib. 種種生種種 (魏) चित्र ? [3] भासते or स्राभासते (魏) Tib. [4] चित्र A. C. K., but 故我說唯心 (魏) [5] चित्तं K. [6] बुद्धा Tib. [7] स्रे (魏) [8] कल्पंति A. C. कल्पेति K. [9] चित्त A. C. K. चित्र (魏) (唐) Tib. [10] नात् Tib. [11] दृष्टा K. [12] ते K. [13] यद्वतद्वि K. विकल्पैर्यद्विकल्प्यते तद्वि (魏) (唐) Tib. [14] कम् ?

आगन्तुकत्वात्तद्द्वयोर्न[1] चित्तं जायते नृणाम् ॥४९३॥
विकल्पं चित्तचैत्तार्थी[2] त्रिभवे च प्रतिष्ठिताः ।
यदर्थाभाः प्रवर्तन्ते स्वभावकल्पितो हि सः ॥४९४॥
आभासबीजसंयोगाद्द्वा[3]दशाय[4]तनानि वै ।
आश्रयालम्ब्यसंयोगात्म्र[5]क्रिया वर्ण्यते मया ॥४९५॥
यथा हि दर्पणे बिम्बं केशोण्डुस्तिमिरस्य वा[6] ।
तथा हि वासनै[7]श्छन्नं चित्तं पश्यन्ति बालिशाः ॥४९६॥
स्वविकल्पकल्पिते ह्यर्थे विकल्पः संप्रवर्तते ।
अर्थो न विद्यते बाह्यो यथा तीर्थ्यैर्विकल्प्यते ॥४९७॥
रज्जुं[8] यथा ह्यजानानाः सर्पं गृह्ण[9]न्ति बालिशाः ।
स्वचित्तार्थमजानाना ह्यर्थं कल्पे[10]न्ति बाहिरम् ॥४९८॥
तथा हि रज्जुं रज्जुत्वे एकत्वान्यत्ववर्जितम् ।
किंतु स्वचित्तदोषो ऽयं येन रज्जुर्विकल्प्यते ॥४९९॥
न हि यो येन भावेन कल्प्यमानो न लक्ष्यते ।
न तन्नास्त्यवगन्तव्यं धर्माणामेष धर्मता ॥५००॥
अस्तित्वपूर्वकं नास्ति अस्ति नास्तित्वपूर्वकम् ।
अतो नास्ति न गन्तव्यं अस्तित्वं न च[11] कल्पयेत् ॥५०१॥

[1] त्वयोर्न A. त्वद्वयो न C. K., but 客二法是二 (魏) [2] र्थीम् K. र्थात् ?
[3] द्वा K. [4] ये K. [5] न्म्र K. [6] स्प रा A. स्प वा C.
[7] श्छ्छे A. श्छ्छ C. K. [8] रजुं A. रज्जुं C. रज्जुं K. [9] ह्न A. C. K.
[10] ल्प A. C. [11] च न K.

कल्पितं कल्प्यमानं हि यदिदं न तदात्मकम् ।
अनात्मकं कथं दृष्ट्वा विकल्पः संप्रवर्तते ॥५०२॥
रूपं रूपात्मना नास्ति तथा घटपटादयः[1] ।
अविद्यमाने दृश्ये तु विकल्पस्तेन जायते ॥५०३॥
विकल्पस्ते यदि भ्रान्तावनादिमति संस्कृते ।
भावानां भावता केन भ्रामिता ब्रूहि मे मुने ॥५०४॥
भावानां भावता नास्ति चित्तमात्रं च दृश्यते ।
अपश्यमानः स्वचित्तं विकल्पः संप्रवर्तते ॥५०५॥
कल्पितं यदि वै नास्ति यथा कल्पति बालिशः ।
अन्[2]यथा विद्यते चासौ न च बुद्ध्याव[3]गम्यते ॥५०६॥
आर्याणां यदि वा सो ऽस्ति नासौ बालैर्विकल्पितः ।
आर्याणामथ मिथ्यासौ आर्या बालैः समं गताः[4] ॥५०७॥
आर्याणां नास्ति वै भ्रान्तिर्यस्माच्चित्तं विशोधितम् ।
अशुद्धचित्तसंताना[5] बालाः कल्[6]पेन्ति कल्पितम् ॥५०८॥
मा[7]ता यथा हि पु[8]त्रस्य आका[9]शात्फलमानये[10]त् ।
एतद्धि पुत्र माक्रन्द गृह्ण[11] चित्रमिदं[12] फलम् ॥५०९॥
तथाहं सर्वसत्त्वानां विचित्रैः कल्पितैः फलैः ।

[1] घंटपत्तोदयं A. घटपटोदयं C. घटपटादयः K. [2] न्ये K. [3] च A. K. व C. [4] समागताः A. [5] नां K. [6] ल्प A. C. ल्पे K. [7] गा A. C. ता K. [8] सू A. C. पु K. [9] रा A. C. K. [10] से K. [11] ह्र A. C. K. [12] द A. C.

प्रलोभ्य देशेमि नयं सदसत्पक्षवर्जितम् ॥५१०॥
अभूत्वा यस्य वै भावः प्रत्ययैर्न च संकुला[1] ।
अजातपूर्वं[2] तज्जातमलब्धात्मकमेव च ॥५११॥
अलब्धात्मकं ह्यजातं च प्रत्ययैर्न[3] विना क्वचित् ।
उत्पन्नमपि ते भावो[4] प्रत्ययैर्न[3] विना क्वचित् ॥५१२॥
एवं समासतः पश्यं नासन्न सदसत्क्वचित् ।
प्रत्ययैर्जायते[5] भूतमविकल्प्यं[6] हि पण्डितैः ॥५१३॥
एकत्वान्यत्वकथाः कुतीर्थ्याः[7] कुर्वन्ति[8] बालिशाः ।
प्रत्ययैर्न च जानन्ति मायास्वप्नोपमं जगत् ॥५१४॥
अभिधानविषयं यानं[9] महायानमनुत्तरम्[10] ।
अर्थं[11] सुनीतं हि मया न च बुध्यन्ति बालिशाः ॥५१५॥
मात्सर्यैर्ये[12] प्रणीतानि[13] श्रावकैस्तीर्थकैस्तथा ।
व्यभिचरन्ति[14] ते ह्यर्थं यस्मात्तर्केण देशिताः ॥५१६॥
लक्षणं भावं[15] संस्थानं नाम चैव चतुर्विधम् ।
एतदालम्बनीकृत्य[16] कल्पना संप्रवर्तते ॥५१७॥
एकधा बहुधा ये तु[17] ब्रह्मकायवशंगताः[18] ।

[1] क A. C. K. कुलः ? [2] वँ K. [3] न K. [4] उत्पन्ना अपि ते भावाः Tib. [5] जा K. [6] भूतं न K. [7] न्यत्वसांकथ्यं तीर्थ्याः ? [8] पू A. [9] यां K. [10] या left out in K. [11] अर्थ K. [12] यै K. रै Tib. [13] प्रणीता नि (for हि ? another particle.) [14] दा K. [15] वः ? [16] म्बि ? [17] तत्र for ये तु in K. [18] गमाः K.

सोमभास्करयोर्भू[1]त्वा ये बालेन्ति न ते सुताः ॥५१८॥
आर्यदर्शनसंपन्ना यथाभूतगतिंगताः ।
संज्ञाविवर्तकुशला विज्ञाने च परंगताः ॥५१९॥
एषा हि मुद्रा मुक्तानां पुत्राणां मम शासने ।
भावाभावविनिर्मुक्ता गत्या[2]गतिविवर्जिता[3] ॥५२०॥
व्यावृत्ते रू[4]पविज्ञाने यदि कर्म विनश्यति ।
नित्यानित्यं न प्राप्नोति संसारश्च[5] न विद्यते ॥५२१॥
विनिर्वृत्तिकाले[6] प्रध्वस्तं रूपं देशान्निवर्तते ।
नास्त्यस्ति[7]दोषनिर्मुक्तं कर्म तिष्ठति आलये ॥५२२॥
प्रध्वंसि पतितं रूपं विज्ञानं च भवालये ।
रूपविज्ञानसंबद्धं न च कर्म विनश्यति ॥५२३॥
अथ तैः सह संबद्धं कर्म वै ध्वस्यते नृणाम् ।
ध्वस्ते तु कर्मसंबन्धे न संसृतिर्न[8] निर्वृतिः ॥५२४॥
अथ ध्वस्तमपि तैः सार्धं संसारे यदि[9] जायते ।
रूपं च[10] तेन संबद्धमभिन्नत्वाद्भ[11]विष्यति ॥५२५॥
नाभिन्नं न च वै भिन्नं चित्तं रूपं विकल्पनात् ।
प्रध्वंसो नास्ति भावानां सदसत्पक्षवर्जनात् ॥५२६॥

[1] भू K. योर्भानुं ये नाशेन्ति or योर्भां वा नाशेन्ति ? Tib. [2] गत्य A. [3] ताः K. ता (魏) (唐) Tib. [4] प्य K. [5] रे च A. रश्च C. रेश्च K. [6] ल A. निवृत्तिकाले ? [7] वि is added in K. [8] न K. [9] यति K. [10] पि K. [11] द्बभ K.

कल्पितः[1] परतन्त्रश्च[2] अन्योन्याभिन्नलक्षणात् ।
रूपे[3] ह्यनित्यता यद्वदन्योन्यजनकाश्च वै[4] ॥ ५२७ ॥
अन्यो ऽनन्यविनिर्मुक्तः कल्पितो नावधार्यते ।
नास्त्यस्ति कथं[5] भवति रूपे चानित्यता यथा ॥ ५२८ ॥
कल्पितेन सुदृष्टेन परतन्त्रो[6] न जायते ।
परतन्त्रेण दृष्टेन[7] कल्पितस्तं[8]थता भवेत् ॥ ५२९ ॥
कल्पितं हि विनाशेते मम नेत्री विनश्यते ।
समारोपापवादं च कुर्वते मम शासने ॥ ५३० ॥
एवंविधा य[9]दा यस्मि[10]न्काले स्युर्धर्मदूषकाः[11] ।
सर्वे च ते ह्य[12]संकथ्या मम नेत्रीविनाशकाः[13] ॥ ५३१ ॥
अनालप्याश्च[14] विद्वद्भिर्भिक्षुकार्यं[15] च वर्जयेत् ।
कल्पितं यत्र[16] नाशेन्ति समारोपापवादिनः ॥ ५३२ ॥
केशोण्डुकमायाभं स्वप्नगन्धर्वसादृशम् ।
मरीच्याभदृश[17]कल्पो येषां नास्त्यस्तिदर्शनात्[18] ॥ ५३३ ॥
नासौ शिक्षति बुद्धानां यस्तेषां सं[19]ग्रहे चरेत् ।
द्वयान्तपतिता ह्ये[20]ते अन्येषां च विनाशकाः ॥ ५३४ ॥
विविक्तं कल्पितं भावं ये[21] तु पश्यन्ति[22] योगिनः ।

[1] तं ? [2] न्त्रै A. न्त्रं च ? [3] प A. C. पे K. [4] वौ K. [5] कथं नास्त्यस्ति ? [6] न्त्रं ? [7] ष्ट्वे K. [8] तं त ? [9] य left out in K. [10] तस्मिं A. C. K. [11] स्युधर्मदूषकां K. [12] ह्र K. [13] सका K. [14] रप्या च A. °श्च ? [15] र्यं A. र्यैं C. र्यं K. [16] च वि° for यत्र ? Tib. [17] दृशः Tib. [18] स्तिदेश A. तिदर्शं C. K. [19] स K. [20] ह्य K. [21] य A. [22] पश्यति A.

भावाभावविनिर्मुक्तं तेषां वै संग्रहे[1] चरेत् ॥५३५॥
आकरा हि यथा लोके सुवर्णमणिमुक्तिजाः[2] ।
अकर्महेतुकाश्चित्रा [3]उपजीव्याश्च बालिशाम् ॥५३६॥
[4]तथा हि सत्त्वगोत्राणि चित्रा वै कर्मवर्जिता ।
दृश्याभावान्न कर्मास्ति न च वै कर्मजा गतिः ॥५३७॥
भावानां भावता नास्ति यथा त्वार्यै[5]र्विभाव्यते ।
किंतु विद्यन्ति वै भावा यथा बालैर्विकल्पिताः ॥५३८॥
यदि भावा[6] न विद्यन्ते यथा बालैर्विकल्पिताः[7] ।
असत्सु [8]सत्त्वभावेषु संक्लेशो नास्ति कस्यचित् ॥५३९॥
भाववैचित्र्यसंक्लेशात्संसार[9] इन्द्रियो गतः[10] ।
[11]अज्ञानतृष्णासंबद्धः प्रवर्तते शरीरिणाम् ॥५४०॥
येषां तु भावो वै नास्ति यथा बालैर्विकल्पितः ।
तेषां न विद्यते वृत्तिरिन्द्रियाणां न योगिनः[12] ॥५४१॥
यदि भावा न विद्यन्ते भावसंसारहेतवः ।
अयं तेन भवेन्मोक्षो बालानां[13] क्रियवर्जितः ॥५४२॥
बालार्याणां विशेषस्ते भावाभावात्कथं[14] भवेत् ।
आर्याणां नास्ति वै भावो विमोक्षत्रयचारिणाम् ॥५४३॥

[1] संग्रहेण K. [2] जा K. [3] त्रादु A. [4] य in all MSS. त (魏) (唐) Tib. [5] त्वार्यवि A. [6] वो A. [7] ता A. C. ताः K. [8] सर्वे (魏) (唐) [9] शास्संशार A. शास्संसार C. शास्संसारा K. शात्सं° (唐) Tib. [10] योपगः Tib. [11] आ A. [12] गिन् K. [13] वाराणां A. [14] वो कथं A.

स्कन्धाश्च[1] पुद्गला[2] धर्माः[3] स्वसामान्या[4] अलक्षणाः ।
प्रत्ययानीन्द्रियाश्चैव[5] श्रावकाणां वदाम्यहम् ॥५४४॥
अहेतुचित्त[6]मात्रं च विभूति[7] भूमयस्तथा ।
प्रत्यात्मतथतां शुद्धां[8] देशयामि जिनौरसान् ॥५४५॥
भविष्यन्त्यनागते काले मम शासनदूषकाः ।
काषाय[9]वासोवसनाः सदसत्कार्यवादिनः ॥५४६॥
असन्तः[10] प्रत्ययैर्भावा विद्यन्ते ह्यार्यगोचरम् ।
कल्पितो नास्ति वै भावः कल्पयिष्यन्ति तार्किकाः ॥५४७॥
भविष्यन्त्यनागते काले कणभुग्बालजातिकाः ।
असत्कार्यवाददुर्दृष्ट्या[11] जनतां नाशयन्ति च ॥५४८॥
अणुभ्यो जगदुत्पन्नमणवश्चाप्यहे[12]तुकाः ।
नवद्रव्याणि नित्यानि कुदृष्ट्या[13] देशयिष्यति ॥५४९॥
द्रव्यैरारभ्यते द्रव्यं गुणैश्चैव गुणास्तथा ।
भावानां भावतामन्यां सतीं[14] वै नाशयिष्यति ॥५५०॥
आदिमान्हि[15] भवेल्लो[16]को यद्यभूत्वा प्रवर्तते ।
पूर्वा च कोटिर्नै[17]वास्ति संसारस्य वदाम्यहम् ॥५५१॥

[1] धा च A. [2] लं in all MSS. [3] र्मा A. C. [4] न्यो A.
[5] यानिन्द्रियाण्येव ? [6] हेतुचित्र A. अहेतुचित्र C. [7] भूतिर्भू A.
[8] ता शुद्धा ? [9] वासवासनाः K. [10] असतः A. [11] ष्टा A. K. ष्या C.
[12] नवाचापीहे A. णवश्चार्यहे C. णवश्चार्य्यहे K. [13] ष्टा K. [14] सती A. सतीं C. सतिं K. [15] मां A. C. मा K. मान्हि (魏) (唐) Tib. [16] त्सो K.
[17] नैं A. नैं C. नै K.

त्रिभवः सर्वसंख्यातं यद्यभूत्वा प्रवर्तते ।
श्वानोष्ट्रखरशृङ्गाणां[1] उत्पत्तिः स्यान्न संशयः ॥ ५५२ ॥
यद्यभूत्वा भवेच्चक्षू रूपं विज्ञानमेव च ।
कटमुकुटपटाद्यानां[2] मृत्पिण्डात्संभवो भवेत् ॥ ५५३ ॥
पटेश्च वै कटो नास्ति पटो वै वीरणैस्तथा ।
एक एकत्रा[3] संभूतः प्रत्ययैः किं न जायते ॥ ५५४ ॥
तज्जीवं तच्छरीरं च यच्चाभूत्वा प्रवर्तते ।
परवादा[4] ह्यमी सर्वे मया च समुदाहृता ॥ ५५५ ॥
उच्चार्य पूर्वपक्षं च मतिस्तेषां निवार्यते ।
निवार्य तु मतिस्तेषां स्वपक्षं देशयाम्यहम् ॥ ५५६ ॥
अतो ऽर्थं तीर्थवादानां कृतमुच्चारणं मया[5] ।
मा मे शिष्यगणो मूढः सदसत्पक्षमाश्रयेत् ॥ ५५७ ॥
प्रधानाज्जगदुत्पन्नं[6] कपिलांगो ऽपि दुर्मतिः ।
शिष्येभ्यः संप्रकाशेति गुणानां च विकारिता ॥ ५५८ ॥
न भूतं नापि चाभूतं प्रत्ययैर्न च प्रत्ययाः ।
प्रत्ययानामसद्भावादभूतं न प्रवर्तते ॥ ५५९ ॥
सदसत्पक्षविगतो हेतुप्रत्ययवर्जितः ।
उत्पादभङ्गरहितः स्वपक्षो लक्ष्यवर्जितः ॥ ५६० ॥
मायास्वप्नोपमं लोकं हेतुप्रत्ययवर्जितम् ।

[1] शृगाराणां A. C. सृगाराणामु K. [2] ना K. [3] एकतः Tib. [4] दा left out in A. [5] णैर्म in all MSS. णं म (魏) (唐) Tib. [6] नो A. K. ना C.

अहेतुकं सदा पश्यन्विकल्पो न प्रवर्तते ॥५६१॥
गन्धर्वमृगतृष्णाभं केशोण्डुकनिभं सदा ।
सदसत्पक्षविगतं हेतुप्रत्ययवर्जितम् ।
अहेतुकं भवं पश्यं[1]श्चित्तधारा विशुध्यं[2]ते ॥५६२॥
वस्तु न[3] विद्यते पश्यंश्चि[4]त्तमात्रं न विद्यते ।
अवस्तुकं कथं चित्तं[5] चित्तमात्रं न युज्यते ॥५६३॥
वस्तुमालम्बनीकृत्य चित्तं[6] संजायते नृणाम् ।
अहेतुकं कथं चित्तं चित्तमात्रं न युज्यते ॥५६४॥
तथता चित्तमात्रं च आर्यवस्तुनयस्य[7] तु ।
विद्यन्ते न च विद्यन्ते न ते मन्नयकोविदाः ॥५६५॥
ग्राह्यग्राहकभावेन यदि चित्तं प्रवर्तते ।
एतद्धि लौकिकं चित्तं चित्तमात्रं न युज्यते ॥५६६॥
देहभोगप्रतिष्ठाभं स्वप्नवज्जायते यदि ।
द्विचित्तता प्रसज्येत न च चित्तं द्विलक्षणम् ॥५६७॥
स्वधारं[8] हि यथा खड्गं स्वाग्रं वै अङ्गुलिर्यथा ।
न च्छिन्दते न स्पृशते तथा चित्तं स्वदर्शने ॥५६८॥
न परं न च वै तत्त्वं कल्पितं वस्तुमेव[9] च ।
पञ्चधर्मा द्विचित्तं च निराभासे न सन्ति वै ॥५६९॥

[1] पश्यं चि A. K. पश्यंश्चि C. [2] द्य A. C. K. [3] न्न K. [4] यस्य चि (魏) (唐) Tib. [5] Left out in A. [6] चित्त K. [7] न पश्य A. C. K. नयस्य Tib. [8] स्वपरं A. K. स्वधारं C. स्वधारां (魏) (唐) Tib. [9] वस्तु नैव (唐) Tib.

उत्पादकं च उत्पाद्यं द्विविधं भावलक्षणम् ।
उत्पादकं हि सन्धाय नैःस्वभाव्यं[1] वदाम्यहम् ॥५७०॥
अथ वैचित्र्यसंस्थानं[2] कल्पा[3] च यदि जायते ।
आकाशे शशशृङ्गे च[4] अर्थाभासं[5] भविष्यति ॥५७१॥
अर्थाभासं भवेच्चित्तं तदर्थः[6] स्यादकल्पितः ।
न च वै कल्पितो ह्यर्थः चित्तादन्यो[7] ऽभिलभ्यते ॥५७२॥
अनादिमति[8] संसारे अर्थो वै नास्ति कुत्रचित् ।
अपुष्टं हि कथं चित्तमर्थाभासं प्रवर्तते ॥५७३॥
यद्यभावेन पुष्टिः स्याच्छ्[9]शशृङ्गे ऽपि तद्भवेत् ।
न चाभावेन वै पुष्टो विकल्पः संप्रवर्तते ॥५७४॥
यथापि दानीं नैवास्ति तथा पूर्वे[10] ऽपि नास्त्यसौ ।
अनर्थे अर्थसंबद्धं कथं चित्तं प्रवर्तते ॥५७५॥
तथता शून्यता कोटिर्निर्वाणं धर्मधातुकम्[11] ।
अनुत्पादश्च धर्माणां स्वभावः पारमार्थिकः ॥५७६॥
नास्त्यस्तिपतिता बाला हेतुप्रत्ययकल्पनैः ।
अहेतुकमनुत्पन्नं भवं वै अप्र[12]जानतः ॥५७७॥
चित्तं ख्याति न दृश्यो[13] ऽस्ति विशेषो ऽनादिहेतुकः ।

[1] च is added in A. K. [2] संधानं C. च्यंसस्थानं K. संस्थाने Tib. [3] कल्पे C. कल्पाच्च (唐) कल्पश्च or कल्पं च (=कल्पश्च) Tib. [4] पि A. K. च C. [5] अर्थं A. K. अर्था C. [6] य A. K. त C. [7] चिंता A. [8] अनादिय A. K. अनादिगति C. [9] त्स A. च्छ C. न्स K. [10] पूर्वो A. [11] धातु च A. K. धातुकं C. [12] अभ्य A. [13] ख्याति दृशो A. K. रव्याति न दृश्यो C.

अनादावपि नास्त्यर्थो विशेषः केन जायते ॥५७८॥
यद्यभावेन पुष्टिः स्याद्दरिद्रो धनवा[1]न्भवेत् ।
अर्थाभावे कथं चित्तं जायते ब्रूहि मे मुने[2] ॥५७९॥
अहेतुकमिदं सर्वं न चित्तं न च गोचरः ।
न च वै पुष्यते चित्तं त्रिभवं क्रि[3]यवर्जितम् ॥५८०॥
उत्पादविनिवृत्त्यर्थमनुत्पादप्रसाधनम् ।
अहेतुवा[4]दं देशेमि न च बालैर्विभाव्यते ।
अनुत्पन्नमिदं सर्वं न च भावा न सन्ति च ॥५८१॥
गन्धर्वस्वप्नमायाख्या भावा विद्यन्त्यहेतुकाः ।
अनुत्पन्ना[5]न्स्वभावांश्च[6] शून्याः केन वदासि[7] मे ॥५८२॥
समवायविनिर्मुक्तो यदा[8] भावो न दृश्यते ।
तदा शून्यमनुत्पन्नमस्वभावं वदाम्यहम् ॥५८३॥
स्वप्नकेशोण्डुकं माया गन्धर्वमृगतृष्णिका ।
अहेतुकापि दृश्यन्ते तथा लोकविचित्रता ॥५८४॥
समवाय[9]स्तथैवैको दृश्याभावान्न विद्यते ।
न तु तीर्थ्यदृष्ट्या[10] प्रलयो[11] समवायो न विद्यते ॥५८५॥
विगृह्याहेतुवादेन अनुत्पादं प्रसाधयेत् ।
अनुत्पादैः प्रसाध्यन्ते मम नेत्री न नश्यति ॥५८६॥

[1] वां A. C. K. [2] मुणे A. [3] ये K. [4] द K. [5] न्नां A. C. K.
[6] न्नास्वभावाश्च Tib. [7] सि A. हि C. K. वदेहि ? [8] यथा A. K. यदा C.
[9] यं त A. K. यस्त C. [10] ष्ट्वा A. K. ष्ट्या C. [11] या K.

अहेतुवादैर्[1]दृश्यन्ते तीर्थ्यानां जायते भयम् ।
कथं केन कुतः कुत्र संभवो ऽहेतुको भवेत् ॥५८७॥
नाहेतुकमहे[2]तुत्वं यदा पश्यन्ति पण्डिताः ।
तदा व्यावर्तते दृष्टिभ[3]ङ्गोत्पादानु[4]वादिनी ॥५८८॥
किमभावो ह्यनुत्पाद उत्पादो[5]त्पत्तिलक्षणम्[6] ।
अथ[7] भावस्य नामेदं निरर्थं वा ब्रवीहि मे ॥५८९॥
न च भावो ह्यनुत्पादो न च प्रत्ययलक्षणम् ।
न च भावस्य नामेदं न च नाम निरर्थकम् ॥५९०॥
यत्र[8] श्रावकबुद्धानां तीर्थ्यानां[9] च[10] अगोचरः[11] ।
सप्तभूमिगतानां च तदनुत्पादलक्षणम् ॥५९१॥
हेतुप्रत्ययव्यावृत्तिं[12] कारणस्य निषेधनम्[13] ।
चित्तमात्रव्यवस्थानमनुत्पादं वदाम्यहम् ॥५९२॥
अहेतुवृत्तिं[14] भावानां कल्प्यकल्पवर्जितम्[15] ।
सदसत्पक्षनिर्मुक्तमनुत्पादं वदाम्यहम् ॥५९३॥
चित्तदृश्यविनिर्मुक्तं[16] स्वभाव[17]द्वयवर्जितम् ।
आश्रयस्य परावृत्तिमनुत्पादं वदाम्यहम् ॥५९४॥

[1] दी K. [2] कं हे A. C. K. कमहे (魏) Tib. [3] वृष्टिभ A. [4] दोनुया A. दानुवा C. दानुपा K. [5] दा उत्प A. दोत्प C. द उत्प K. [6] उत प्रत्ययलक्षणम् or उताहो प्रत्ययेक्षणम् ? cf. (魏) Tib. v. 590 below. [7] अर्थं A. C. K. अथ Tib. [8] यत्र ? [9] तीर्थिकानां ? [10] चा A. [11] च गोचरः ? [12] त्ति A. त्तिं C. K. [13] निशेषवन A. K. निशेषणं C. [14] त्ति A. K. [15] विवर्जिताम् ? [16] युक्तं A. मुंक्तं C. मुक्तं K. [17] वा K.

न बाह्यभावं[1] भावानां न च चित्तपरिग्रहम्[2] ।
सर्वदृष्टिप्रहाणं यत्तदनुत्पादलक्षणम् ॥५९५॥
एवं शून्यास्वभावाद्यात्सर्वधर्मान्विभावयेत् ।
न जातु शून्यया शून्या किंत्वनुत्पादशून्यया ॥५९६॥
कलापः प्रत्ययानां हि प्रवर्तते[3] निवर्तते ।
कलापाच्च पृथग्भूतं न जातं न निरुध्यते ॥५९७॥
भावो न विद्यते ह्यन्यः कलापाच्च पृथक्क्वचित् ।
एकत्वेन पृथक्त्वेन यथा तीर्थ्यै[4]र्विकल्प्यते ॥५९८॥
सदसन्न[5] जायते भावो नासन्न सदसत्क्वचित्[6] ।
अन्यत्र हि कलापो ऽयं[7] प्रवर्तते[8] निवर्तते ॥५९९॥
संकेतमात्रमेवेदमन्योन्यापेक्ष[9]संकलात् ।
जन्यमर्थं न चैवास्ति पृथक्प्रत्ययसंकलात् ॥६००॥
जन्याभावो[10] ह्यनुत्पादः तीर्थ्यदोषविवर्जितः ।
देशेमि संकलामात्रं न च बालैर्विभाव्यते ॥६०१॥
यस्य जन्यो हि भावो ऽस्ति संकलायाः पृथक्क्वचित् ।
अहेतुवादी विज्ञेयः संकलाया विनाशकः ॥६०२॥
प्रदीपद्रव्यजातीनां व्यञ्जका संकला भवेत् ।
यस्य भावो भवेत्कश्चित्संकलायाः पृथक्क्वचित् ॥६०३॥

[1] नाबाह्यभावो (魏) Tib. [2] ग्रहः (魏) Tib. [3] ति A. K. ते C.
[4] र्थ्यैं वि A. थ्यै K. [5] असन्न ? [6] न सन्न सदसन्क्वचित् ? [7] या यं A.
[8] ति A. C. K. [9] न्यान्यापक्ष A. न्योन्यापेक्ष C. न्योन्यापक्ष K. [10] वे C.

अस्वभावो ह्यनुत्पन्नः प्रकृत्या गगनोपमः ।
संकलायाः पृथग्भूतो[1] यो धर्मः कल्पितो ऽबुधैः ॥ ६०४ ॥
अयमन्यमनुत्पादमार्याणां प्राप्तिधर्मता ।
यश्च तस्य[2] अनुत्पादं तदनुत्पादक्षान्तिः[3] स्यात् ॥ ६०५ ॥
यदा सर्वमिमं लोकं संकलामेव पश्यति[4] ।
संकलामात्रमेवेदं[5] तदा चित्तं समाध्यते ॥ ६०६ ॥
अज्ञानतृष्णाकर्मादि संकलाध्यात्मिका भवेत् ।
[6]खजंमृद्दण्डचक्रादि वीजं[7]भूतादि बाहिरम् ॥ ६०७ ॥
परतो यस्य वै भावः प्रत्ययैर्जायते क्वचित् ।
[8]न संकलामात्रमेवेदं न ते युक्त्यागमे स्थिताः ॥ ६०८ ॥
यदि जन्यो न भावो ऽस्ति स्याद्बुद्धिः कस्य प्रत्ययात् ।
अन्योन्यप्रत्यया ह्येते[9] नैतेन[10] प्रत्ययाः स्मृताः ॥ ६०९ ॥
उष्णद्रवचलकठिना बालैर्धर्मा विकल्पिताः ।
कलापो ऽयं न धर्मो ऽस्ति अतो वै निः[11]स्वभावता ॥ ६१० ॥
वैद्या यथातुरवशा[12]त्क्रियाभेदं प्रकुर्वते ।
न तु शास्त्रस्य[13] भेदो ऽस्ति दोषभेदस्तु[14] विद्यते ॥ ६११ ॥
तथाहं सत्त्वसंताने[15] क्लेशदोषैः सुदूषितैः[16] ।

[1] ताः A. K. ता C. [2] यस्तस्य A. K. यश्च तस्य C. यच्च तस्य ? [3] न्ति A. न्तिः C. K. क्षान्तिना ? [4] संकलासेवस्यति A. [5] सकालमात्रमेवदं A. [6] खड्ग C. ध्वज (魏) [7] जे A. [8] Left out in Tib. [9] ह्यते A. K. ह्येते C. [10] न तेन (魏) ते तेन Tib. [11] नि A. K. निः C. [12] सा A. K. शा C. [13] सास्तुस्य A. K. [14] भेदां तु A. K. भेदस्तु C. [15] ने A. K. नैः C. [16] ते ?

इन्द्रियाणां बलं ज्ञात्वा नयं देशेमि बालिशान्[1] ॥६१२॥
न क्लेशेन्द्रियभेदेन शासनं भिद्यते मम ।
एकमेव भवेद्यानं मार्गमष्टाङ्गिकं[2] शिवम् ॥६१३॥
[3]घटपटमुकुटविषाणहेतुकशशविषाणानास्तित्वम् ।
यद्धेतुसमुत्पन्न स च[4] नास्ति ते ऽवगन्तव्यम्[5] ॥६१४॥
अस्तित्वसाधकं नास्ति नास्ति नास्ति न युज्यते ।
अस्तित्वं नास्त्यपेक्ष्यं हि अन्योन्यापेक्षकारणम् ॥६१५॥
किंचाशून्यं[6] पुनः किंचित्ख्यायते यस्य वै मतम् ।
अहेतुकं यदाश्रित्य[7] किंचिच्चाहेतुकं न तु ॥६१६॥
अर्थमप्यन्यमाश्रित्य[8][7] तदप्यन्यस्य ख्यायते ।
अनवस्था प्रसज्येत किंचिच्च किं च नो भवेत् ॥६१७॥
आश्रित्य[9] पर्णकाष्ठादीन्यथा माया प्रसज्यते[10] ।
वस्तु तद्वत्समाश्रित्य[11] वैचित्र्यं[12] ख्यायते नृणाम् ॥६१८॥
मायाजालं न पर्णानि न काष्ठं न च शर्करा[13] ।

[1] सां A. शां C. साम् K. [2] माने A. K. मार्गं C. [3] The meaning of this verse is not clear. 瓶疊冠及角。兎角無是因。無因依彼生。而無彼因法。(魏) 因瓶衣角等。而說兎角無。是故不應言。無彼相因法。(唐) घटपटं विषाणं च शशविषाणना=स्तितः ? [4] यद्धेतुसामग्र्युत्पन्नं न Tib. [5] नास्ति नास्ति न तेव A. K. [6] मृत्यं A. K. स्मून्यं C. किंचिदाश्रित्य (魏) (唐) Tib. [7] सृ A. K. श्रि C. [8] अथ तदन्य (魏) (唐) Tib. [9] तृ A. सृ K. [10] ह्य A. C. [11] तद्वत्त A. तद्वर्म C. तद्वत्त K. [12] त्य A. त्यं K. [13] संकरा A. K. संकला C. शर्करा Tib.

मायैव दृश्यते बालैर्मायाकारेण चाश्रयम्[1] ॥ ६१९ ॥
तथा वस्तु समाश्रित्य यदि किंचिद्विनश्यति[2] ।
दृश्यकाले द्वयं नास्ति कथं किंचिद्विकल्प्यते ॥ ६२० ॥
विकल्पैर्विकल्पितं नास्ति विकल्पश्च[3] न विद्यते ।
विकल्पे ह्यविद्यमाने तु न संसृतिर्न[4] निर्वृतिः ॥ ६२१ ॥
विकल्पे ह्यविद्यमाने तु विकल्पो न प्रवर्तते ।
अप्रवृत्तिं[5] कथं चित्तं चित्त[6]मात्रं[7] न युज्यते ॥ ६२२ ॥
अनेकमतिभिन्नत्वाच्छासने[8] नास्ति सारता ।
साराभावान्न मोक्षोऽस्ति न च लोकविचित्रता ॥ ६२३ ॥
बाह्यं न विद्यते दृश्यं यथा बालैर्विकल्प्यते ।
बिम्बवत्ख्यायते चित्तं वासनैर्भ्रमणीकृतम् ॥ ६२४ ॥
सर्वभावा ह्यनुत्पन्ना असत्सदसंभवाः[9] ।
चित्त[10]मात्रमिदं सर्वं[11] कल्पनाभिश्च वर्जितम् ॥ ६२५ ॥
बालैर्भावाः समाख्याताः प्रत्ययैर्न तु पण्डितैः ।
स्वभावचित्त[12]निर्मुक्ताश्चित्त[13]मार्योपगं शिवम् ॥ ६२६ ॥
संख्या[14] वैशेषिका नग्ना विप्राः पाशुपतास्तथा ।

[1] यः Tib. [2] द्विशिष्यते Tib., but the text agrees with (唐) [3] विकल्पो न च A. विकल्पश्च न C. विकल्पा न च K. [4] न K. [5] त्तिं A. C. त्तिं K. वर्तिं (唐) Tib. [6] चित्त left out in A. [7] त्र K. [8] त्वात् सा A. K. त्वात् शा C. [9] असत्सदाभसंभवाः (魏) असत्सदनसंभवाः Tib. [10] त्र A. C. [11] सर्वं K. [12] श्चि (魏) Tib. [13] मुक्तं चि C. मुक्तश्चि (魏) Tib. [14] सो A. संख्या C. सोख्या K. सांख्या Tib.

असत्सद्दृष्टिपतिता[1] विविक्तार्थविवर्जिता[2]: ॥ ६२७ ॥
निःस्वभावा[3] ह्यनुत्पन्नाः शून्या मायोपमामलाः ।
कस्यैते देशिता बुद्धैस्त्वया च प्रतिवर्णिताः ॥ ६२८ ॥
योगिनां शुद्धचित्तानां दृष्टितर्कविवर्जिताः ।
बुद्धा देशेन्ति वै योगं[4] मया च प्रतिवर्णिताः ॥ ६२९ ॥
यदि चित्तमिदं सर्वं कस्मिँल्लोकः[5] प्रतिष्ठितः ।
गमनागमनं केन दृश्यते भूतले नृणाम् ॥ ६३० ॥
शकुनिर्यथा गगने विकल्पेन समीरितः ।
अप्रतिष्ठमनालम्ब्यं चरते भूतले यथा ॥ ६३१ ॥
तथा हि देहिनः सर्वे विकल्पेन समीरिता[6]: ।
स्वचित्ते[7] चङ्क्रमन्ते ते गगने शकुनिर्यथा ॥ ६३२ ॥
देहभोगप्रतिष्ठाभं ब्रूहि चित्तं प्रवर्तते ।
आभा वृत्तिः कथं केन चित्तमात्रं वदाहि मे ॥ ६३३ ॥
देहभोगप्रतिष्ठाश्च आभा वृत्तिश्च वासनैः[8] ।
संजायते अयुक्तानां आभा[9] वृत्तिर्विकल्पनैः ॥ ६३४ ॥
विषयो विकल्पितो भावश्चित्तं विषयसंभवम् ।
दृश्यचित्तपरिज्ञानाद्विकल्पो न प्रवर्तते ॥ ६३५ ॥

[1] त्सु दृ A. त्सुद्दृ C. त्स दृ K. [2] ताः A. C. K. [3] निस्व K.
[4] योग्यं A. K. [5] कस्मि लो A. कस्मिल्लो C. कस्मिं लो K.
[6] ता A. C. K. [7] त्तैं A. त्तं C. K. [8] वासना Tib. [9] नामा A.
नां आ C. K.

नाम नाम्नि विसंयुक्तं यदा पश्यति कल्पितम्।
बुद्धिबोद्धव्यरहितं[1] संस्कृतमुच्यते[2] तदा[3] ॥६३६॥
एता बुद्धिर्भवेद्बोध्यं नाम नाम्नि[4] विभावनम्।
ये त्वन्यथा[5]वबुध्यन्ते न ते बुद्धा[6] न बोधकाः ॥६३७॥
पञ्चधर्माः स्वभावाश्च विज्ञानान्यष्ट एव च।
द्वे[7] नैरात्म्ये भवेत्कृत्स्नो[8] महायानपरिग्रहः ॥६३८॥
यदा बुद्धिश्च[9] बोद्धव्यं[10] विविक्तं पश्यते[11] जगत्।
नास्ति नाम[12] विकल्पश्च तदा नाभिप्रवर्तते ॥६३९॥
क्रियाक्षरविकल्पानां निवृत्तिश्चित्त[13]दर्शनात्।
अदर्शनात्स्वचित्तस्य विकल्पः संप्रवर्तते ॥६४०॥
चत्वारो ऽरूपिणः स्कन्धाः संख्या तेषां न विद्यते।
भूतैर्विलक्षणे रूपं कथं रूपबहुत्वता ॥६४१॥
लक्षणस्य परित्यागान्न भूतं न च भौतिकम्।
अथान्यलक्षणे रूपं कस्मात्[14]स्कन्धैर्न जायते ॥६४२॥
विमुक्ता[15]यतनस्कन्धा यदा पश्यत्यलक्षणाः[16]।
तदा निवर्तते चित्तं धर्मनैरात्म्यदर्शनात् ॥६४३॥

[1] रहितं A. K. [2] तमु in all MSS. (魏), but तं मु (唐) Tib. [3] स A. C. K. त (魏) (唐) Tib. [4] नामस्ति A. नाम नाम्नि C. नाम नास्ति K. [5] च A. [6] तद्बुद्धं A. C. K. ते बुद्धा (魏) (唐) Tib. [7] धर्म for द्वे in A. K. [8] भवे कृत्स्ना K. [9] बुद्धिं च (魏) (唐) Tib. [10] ध A. [11] तो A. K. [12] नाम नाम्नि (魏) (唐) नाम्नि नाम Tib. [13] त्त left out in A. K. [14] त्स्वं K. [15] भूता A. C. K. मुक्ता (唐) Tib. [16] णा C.

विषयेन्द्रियभेदेन विज्ञानं जायते ऽष्टधा ।
लक्षणेन भवेन्त्रीणि[1] निराभासे निवर्तते ॥६४४॥
आलयं हि मनस्यात्मा आत्मीयं[2] ज्ञानमेव च ।
प्रवर्तते द्वयग्राहात्परिज्ञानान्निवर्तते ॥६४५॥
अन्यानन्यविनिर्मुक्तं यदा पश्यत्यसंचरम्[3] ।
तदा द्वयं न कल्पन्ति आत्मा चात्मीयमेव च ॥६४६॥
अप्रवृत्तं न पुष्णाति न च विज्ञानकारणम् ।
कार्यकारण[4]निर्मुक्तं निरुद्धं न प्र[5]वर्तते ॥६४७॥
विकल्पं चित्तमात्रं च लोकं केन वदाहि मे ।
कारणैश्च विसंयुक्तं लक्ष्यलक्षणवर्जितम् ॥६४८॥
स्वचित्तं दृश्यते चित्तं[6] दृश्याकारं विकल्पितम् ।
चित्तदृश्यापरि[7]ज्ञानादन्यं चित्तार्थसंग्रहात् ॥६४९॥
नास्तित्वदृष्टिर्भवति यदा बुद्ध्या न पश्यति ।
अस्तित्वं हि कथं तस्य चित्तग्राहान्न[8] जायते ॥६५०॥
विकल्पो[9] न भावो नाभावो अतो ऽस्तित्वं न जायते ।
चित्तदृश्यपरिज्ञानाद्विकल्पो[10] न प्रवर्तते ॥६५१॥
अप्रवृत्तिविकल्पस्य परावृत्तिनिराश्रयः ।

[1] भवे त्री A. K. भवेन्त्री C. [2] त्मात्मीयं A. [3] ति सं A. C. K. त्यसं (唐) Tib. [4] कारकण K. [5] व्य A. C. प्र K. [6] चित्तं A. K. चित्रं C. [7] दृश्यपरि A. K. दृश्यापरि C. [8] हं न A. [9] ल्पो K. [10] ल्प A.

निवार्य पक्षांश्चत्वारो[1] यदि भावाः सहेतुकाः ॥ ६५२ ॥
संज्ञान्तरविशेषो ऽयं कृतं केन[2] न साधितः[3] ।
अर्थापत्तिर्भवे[4]त्तेषां कारणाद्वा प्रवर्तते ॥ ६५३ ॥
हेतुप्रत्ययसंयोगात्कारणप्रतिषे[5]धतः ।
नित्यदोषो[6] निवार्यते[7] अनित्या यदि प्रत्ययाः ॥ ६५४ ॥
न संभवो न विभवो[8] अनित्यत्वाद्धि बालिशाम्[9] ।
न हि नश्यमानं किंचि[10] कारणत्वेन दृश्यते ॥ ६५५ ॥
अदृष्टं हि कथं केन नानित्यो जायते भवः ।
संग्रहैश्च दमैस्त्[11]स्त्वान् शीलेन च वशीकरेत् ॥ ६५६ ॥
प्रज्ञया[12] नाशयेद्दृष्टिं विमोक्षैश्च विवर्धयेत्[13] ।
लोकायतमिदं सर्वं यत्तीर्थ्यै[14]र्दृश्यते मृषा ॥ ६५७ ॥
कार्यकारणसद्दृ[15]ष्ट्या[16] स्वसिद्धान्तं[17] न विद्यते ।
अहमेकं[18] स्वसिद्धान्तं कार्यकारणवर्जितः ॥ ६५८ ॥
देशेमि शिष्यवर्गस्य लोकायतविवर्जितः ।
चित्तमात्रं न दृश्यो ऽस्ति द्विधा चित्तं विदृश्यते ।
ग्राह्यग्राहकभावेन शाश्वतोच्छेदवर्जितम् ॥ ६५९ ॥

[1] पक्षां च A. K. पक्षाश्च C. [2] कृतः स च (魏) Tib. [3] सो A. [4] आर्थोपत्ति भ A. K. अर्थोत्पत्तिर्भ C. अर्थापत्तिर्भ Tib. [5] पे K. षे (魏) (唐) Tib. [6] षा A. [7] निर्वायते A. निवार्यन्ते C. [8] वो A. वः C. व K. [9] सां A. K. शां C. [10] किंचिद्वै C. न विनश्वरं किंचिद्वै ? Tib. [11] ह्ल A. K. [12] प्रज्ञावा A. प्रज्ञाया K. [13] नयभवेत् A. K. [14] र्यै A. [15] संद्दु A. C. K. सद्दू Tib. [16] ष्ट्वा A. K. [17] न्तो (魏) Tib. [18] मेकं A. K. मेकः C.

यावत्प्रवर्तते चित्तं तावल्लोकायतं भवेत् ।
अप्रवृत्तिर्विकल्पस्य स्वचित्तं पश्यतो जगत् ॥ ६६० ॥
आयं[1] कार्याभि[2]निर्वृत्तिर्व्ययं कार्यस्य दर्शनम्[3] ।
आयव्ययपरिज्ञानाद्विकल्पो न प्रवर्तते ॥ ६६१ ॥
नित्यमनित्यं[4] कृतकं अकृतकं परा[5]परम् ।
एवमाद्यानि सर्वाणि [6]लोकायतनं भवेत् ॥ ६६२ ॥
देवासुरमनुष्याश्च तिर्यक्प्रेतयमालया[7]ः ।
गतयः षळ्[8]समाख्याता यत्र जायन्ति देहिनः ॥ ६६३ ॥
हीनउत्कृष्टमध्येन कर्मणा तेषु जायते ।
संरक्ष्य कुशलान्सर्वान्विशेषो मोक्ष एव वा[9] ॥ ६६४ ॥
क्षणे क्षणे त्वया यत्मरण[10]मुपपत्तिं च ।
देश्यते भिक्षुवर्गस्य अभिप्रायं वदाहि मे ॥ ६६५ ॥
रूपाद्रूपान्तरं यद्वच्चित्तं संभूय भज्यते ।
तस्माद्देशेमि शिष्याणां क्षणजन्म[11]परंपराम् ॥ ६६६ ॥
रूपे रूपे विकल्पस्य संभवो विभवस्तथा ।
विकल्पो हि भवेज्ज[12]न्तुर्विकल्पो ऽन्यो न विद्यते ॥ ६६७ ॥
क्षणे क्षणे यन्न[13] युक्तमिदं[14] प्रत्ययभाषितम् ।

[1] आर्यं A. आर्य्यं K. [2] भि in K. only. [3] कार्यानिदर्शनम् Tib.
[4] त्य A. K. त्यं C. [5] च परो A. K. [6] तल्लो ? [7] या A. K.
[8] ख्यु A. ख्यू K. [9] च A. [10] ०णां उ A. K. यत्ममरणो उ C. जन्ममरण (魏) Tib. [11] त्म A. K. [12] जंतु A. K. [13] यत A. K. [14] मेतं A. K. यन्मयोक्तमिदं Tib.

रूपग्राहविनिर्मुक्तं न जन्म न च भज्यते[1] ॥ ६६८ ॥
प्रत्ययाः प्रत्ययोत्पन्ना अ[2]विद्यातथतादयः ।
धर्मद्वयेन वर्तन्ते अद्वया तथता भवेत् ॥ ६६९ ॥
प्रत्ययाः[3] प्रत्ययोत्पन्ना[4] यदि धर्मा विशेषिताः ।
नित्यादयो भवेत्कार्यं कारणं प्रत्ययो[5] भवेत् ॥ ६७० ॥
निर्वि[6]शिष्टं भवेत्तीर्थ्यैः कार्यकारणसंग्रहात् ।
वादस्तव च बुद्धानां तस्मान्नार्यो[7] महामुने[8] ॥ ६७१ ॥
शरीरे व्या[9]ममात्रे च लोकं वै लोकसमुदयम्[10] ।
निरोधगामिनी[11] प्रतिपद्देशयामि जिनौरसान्[12] ॥ ६७२ ॥
स्वभावत्रय[13]ग्राहेण ग्राह्यग्राहविदृ[14]ष्टयः ।
लोक्यलोकोत्तरान्धर्मान्विकल्पेन्ति[15] पृथग्जनाः ॥ ६७३ ॥
अतः[16] स्वभावग्रहणं क्रियते पूर्वपक्षया ।
निवारार्थं तु दृ[17]ष्टीनां स्वभावं न[18] विकल्पयेत् ॥ ६७४ ॥
छिद्रदोषान्न नियमो[19] न वा चित्तं प्रवर्तते ।
[20]प्रवृत्तिद्वयग्राहेण अद्वया तथता भवेत् ॥ ६७५ ॥

[1] ह्य A. [2] त्यंनार A. त्यन्ना अ C. त्यंनाः अ K. [3] Left out in A. [4] न्नाः A. K. [5] या A. [6] वि K. [7] र्यं A. C. K. न्यो (魏) र्यों Tib. [8] णे A. K. [9] व्यो A. C. K. [10] संभवम् ? [11] मिनी A. C. मिनीं K. मिप्र° ? [12] सां A. C. K. [13] वत्तु A. वत्र C. वम्त्र K. [14] वृ A. C. द्रु K. [15] रां धर्मां विकल्पेन्ति A. K. रां धर्मां विकल्पन्ति C. [16] Left out in A. [17] निर्वार्थं द्रुष्टी A. °णार्थं द्रुष्टी K. [18] नि K. [19] म A. K. मं C. [20] अ is added in A. C. K.

अज्ञानतृष्णाकर्म च[1] विज्ञानाद्या अयोनिजाः ।
अनवस्थाकृतकत्वं[2] च न कृत्वा जायते भवः ॥६७६॥
चतुर्विधश्च प्रध्वंसो भावानां कथ्यते ऽबुधैः ।
द्विधावृत्तेर्विकल्पस्य भावाभावो न विद्यते ।
चातुष्कोटिकनिर्मुक्तं दर्शनद्वयवर्जितम् ॥६७७॥
द्विधावृत्तिविकल्पः स्याद्दृष्ट्वा नाभिप्रवर्तते ।
अनुत्पन्नेषु भावेषु बुद्धेर्व्युत्थानभावतः ॥६७८॥
उत्पन्नेष्वपि भावेषु तत्कल्पत्वान्न कल्पयेत् ।
युक्तिं वदाहि मे नाथ द्विधादृष्टि[3]निवारणात् ॥६७९॥
यथाहमन्ये च सदा नास्त्यस्ति न विसंकरेत् ।
तीर्थवाद असंसृष्टाः[4] श्रावकैर्जिनवर्जिताः[5] ।
जिनाभिसमयचर्यां च जिनपुत्राविनाशतः ॥६८०॥
विमोक्षहेत्वहेतुश्चाप्यनुत्पादैकलक्षणः ।
पर्यायैर्मोहयन्त्येतां वर्जनीयां सदा बुधैः ॥६८१॥
मेघाभ्रकूटेन्द्रधनुः प्रकाशा मरीचिकेशोण्डुकमायतुल्याः ।
भावा हि सर्वे स्वविकल्पसंभवास्तीर्थ्या विकल्पे[6]न्ति जगत्स्वकारणैः
अनुत्पादश्च तथता भूतकोटि[7]श्च शून्यता । ॥६८२॥
रूपस्य नामान्येतानि अभावं न विकल्पयेत् ॥६८३॥

[1] श्च A. K. [2] स्या कृत Tib. [3] वृत्ति A. C. K. दृष्टि (魏) (唐) Tib.
[4] ष्टा A. C. K. ष्टां ? [5] ता A. K. ताः C. श्रावकजिनवर्जितां ? [6] ल्प C.
[7] टी A. K. टि C.

हस्तः करो यथा लोक इन्द्रः शक्रः पुरंदरः ।
तथा हि सर्वभावानामभावं न विकल्पयेत् ॥६८४॥
रूपाच्च शून्यता नान्या अनुत्पादं तथैव च ।
न कल्पयेदनन्यत्वाद्दृष्टिदोषः प्रसज्यते ॥६८५॥
संकल्पश्च विकल्पश्च वस्तुलक्षणसंगहात् ।
दीर्घह्रस्वादिमाण्डल्यं परिकल्पस्य संग्रहात् ॥६८६॥
संकल्पो हि भवेच्चित्तं परिकल्पो मनस्तथा ।
विकल्पो मनविज्ञानं लक्ष्यलक्षणवर्जितम् ॥६८७॥
यच्च तीर्थ्यैरनुत्पादो यच्चं मन्नयदृष्टिभिः ।
कल्प्यते निर्विशिष्टो ऽयं दृष्टिदोषः प्रसज्यते ॥६८८॥
प्रयोजनमनुत्पादमनुत्पादार्थमेव च ।
ये वै जानन्ति युक्तिज्ञास्ते ऽभिबुध्यन्ति मन्नयम् ॥६८९॥
प्रयोजनं दृष्टिसंकोचमनुत्पादमनालयम् ।
अर्थत्रयपरिज्ञानादनुत्पादं वदाम्यहम् ॥६९०॥
भावा विद्यन्त्यनुत्पन्ना न वा ब्रूहि महामुने ।
अहेतुवादो ऽनुत्पादो प्रवृत्तिस्तीर्थदर्शनम् ॥६९१॥

[1] र्वं K. [2] वि in C. only. [3] दस्त ? [4] ह्य A. [5] स्वादिताशून्यमलिलास्यग्रहः A. स्वादिताऽल्यपलिलस्य संग्रहः K. [6] क्ष्य A. C. K. [7] य च महामन्नय A. यद्ये मन्नय C. यच्च मनय K. [8] नुपायार्थं C. [9] वै भि in C. only. [10] मु A. K. यु C. [11] च A. वा C. व K. [12] वैषम्य for प्र॰म् in A. K., left out in (魏) (唐) Tib. renders as 'Uneven and none are mixed together in all things' ?

[1]अहेतुवादो ऽनुत्पादो वैषम्यतीर्थदर्शनम् ।
अस्तिनास्तिविनिर्मुक्तं चित्तमात्रं वदाम्यहम् ॥६९२॥
उत्पादमनुत्पादं[2] वर्जयेद्दृष्टिहेतुकम् ।
अहेतुवादे ऽनुत्पादे उत्पादे कारणाश्रयः ॥६९३॥
अनाभोगक्रिया नास्ति क्रिया चेद्दृष्टिसंकरः ।
उपायप्रणिधानाद्यैर्दृ[3]ष्टिमेव वदाहि मे ।
असत्त्वात्सर्वधर्माणां मण्डलं जायते कथम् ॥६९४॥
ग्राह्यग्राहकविसंयोगान्न प्रवृत्तिर्न निर्वृतिः ।
भावाद्भावान्तरं दृष्टिं[4] चित्तं वै तत्समुत्थितम् ॥६९५॥
अनुत्पादश्च धर्माणां कथमेतद्वदाहि मे ।
सत्त्वाश्चेन्नावबुध्यन्तो अत एतत्प्रकाश्यते ॥६९६॥
पूर्वोत्तरविरोधं च[5] सर्वं[6] भाष्य महामुने ।
तीर्थदोष[7]विनिर्मुक्तं[8] विषमाहेतुवर्जितम्[8] ॥६९७॥
अप्रवृत्तिर्निवृत्तिश्च[9] ब्रूहि मे वादिनांवर[10] ।
अस्तिनास्तिविनिर्मुक्तं[11] फलहेत्वविनाशकम्[11] ॥६९८॥
भूमिक्रमानुसंधिश्च[12] ब्रूहि मे धर्मलक्षणम्[13] ।
द्वयान्तपतितो लोको दृष्टिभिर्व्याकुलीकृतः ॥६९९॥

[1] This line is left out in C. [2] One syllable is wanting in this quarter. [3] द्यैः दृ A. C. K. [4] दृष्टि A. C. दृष्टं Tib. [5] धश्च A. C. K. धं च (唐) Tib. [6] सर्व C. [7] दृष्टि Tib. [8] °क्तां °ताम् (唐) Tib. [9] प्रवृत्तिं च निवृत्तिं च (唐) Tib. [10] वरः A. K. वदतांवर C. [11] °क्तां °काम् (唐) Tib. [12] संधिं च ? [13] पद्मलोचन (唐) Tib.

[1]अनुत्पादा[2]उत्पादाद्यैः[3] शमहेतुर्न बुध्यते ।
मण्डलं हि न मे किंचिन्न[4] च देशेमि धर्मताम् ॥७००॥
द्वये सति हि दोषः स्याद्[5]द्वयं बुद्धैर्विशोधितम् ।
शून्याश्च क्षणिका भावा निःस्वभावा ह्यजातिकाः ॥७०१॥
कुदृष्टिवादसंछन्नैः कल्प्यन्ते न तथागतैः ।
प्रवृत्तिं च निवृत्तिं च विकल्पस्य वदाहि मे ॥७०२॥
यथा येन प्रकारेण जायते विषयो [6]सुखम् ।
वर्णपु[7]ष्कलसंयोगात्प्रमन्त्रैः समुदा[8]नितम् ॥७०३॥
रूपं दृष्ट्वा बहिर्धा वै विकल्पः संप्रवर्तते ।
तस्यैव हि परिज्ञानाद्यथाभूतार्थदर्शनात् ।
आर्यगोत्रानुकूलं च चित्तं नाभिप्रवर्तते ॥७०४॥
प्रत्याख्याय तु भूतानि भावोत्पत्तिर्न विद्यते ।
भूताकारं सदा चित्तमनुत्पन्नं विभावयेत् ॥७०५॥
मा[9] विकल्पं विकल्पेथ[10] निर्विकल्पा हि पण्डिताः ।
विकल्पं विकल्पयं[11]स्तस्य द्वयमेव न निर्वृतिः ॥७०६॥
अनुत्पादप्रतिज्ञस्य माया च[12] दृश्यते नयेत्[13] ।
मायानिर्हेतुसंभूतं हानिसि[14]द्धान्तलक्षणम् ॥७०७॥

[1] This line is left out in C. [2] उ in K. only. [3] उत्पत्त्यनुत्पत्त्याद्यादात् or उत्पत्त्यनुत्पत्त्याद्याद्वै ? [4] चि A. चित् K. [5] द्व A. K. [6] त्सु A. त्मु K. [7] र C. [8] नि A. K. Tib. न्वि C. [9] स C. [10] ल्पो थ A. C. K. ल्पेथ (魏) (唐) Tib. [11] ल्पायं त A. ल्पयं त K. [12] मायेव Tib. [13] नयः Tib. [14] दानिसि A. हानिसि K. हानिसि (唐) Tib.

विम्बवद्दृश्यते चित्तमनादिमभिभावितम् ।
अर्थाकारं न[1] चार्थो ऽस्ति यथाभूतं विभावयेत् ॥७०८॥
यथा हि दर्पणे[2] रूपमेकत्वान्यत्ववर्जितम् ।
दृश्यते न च तत्रा[3]स्ति तथा चोत्पादलक्षणम् ॥७०९॥
गन्धर्वमायादि यथा हेतुप्रत्ययलक्षणाः[4] ।
तथा हि सर्वभावानां संभावो न ह्यसंभवः ॥७१०॥
विकल्पः[5] पुरुषाकारो[6] द्विधावृत्त्या[7] प्रवर्तते ।
आत्मधर्मोपकारै[8]श्च न च बालैर्विभाव्यते ॥७११॥
विपुल[9]प्रत्ययाधीनः श्रावको ऽपि ह्यर्हंस्तथा[10] ।
स्वबलाधीनं जिनाधीनं पञ्चमं[11] श्रावकं नयेत्[12] ॥७१२॥
कालान्तरं च प्रध्वस्तं परमार्थे[13]तरेतरम् ।
चतुर्विधमनित्यत्वं बाला[14]ः कल्पे[15]न्त्यकोविदाः[16] ॥७१३॥
द्वयान्तपतिता बाला गुणाणु[17]प्रकृतिकारणैः ।
मोक्षोपायं न जानन्ति[18] सदसत्पक्षसंग्रहात् ॥७१४॥
अङ्गुल्यग्रं[19] यथा बालैश्चन्द्रं[20] गृह्ण[21]न्ति दुर्मतिः[22] ।

[1] कारणं A. [2] दर्प्यणे A. दर्पणो K. [3] तत्रा A. C. K. तत्रा (魏) (唐) Tib. [4] यप्रेक्षणा ? (魏) (唐) Tib. [5] ल्प C. [6] पुरुषो कार A. पुरुषो कारं K. [7] वृत्यान्म्र A. K. [8] चा A. K. र्भविचा (唐) Tib. [9] विधुर Tib. [10] ह्यहंस्तया A. K. ह्यहं तया C. ह्यर्हंस्तया (魏) Tib. [11] ना पंचमे A. K. नां पश्चान्मे C. [12] वदेत् Tib. [13] र्थे A. K. [14] ला A. K. [15] ल्प A. C. [16] दा A. K. [17] नु A. C. K. 功德及微塵 (魏) 微塵自性作 (唐) [18] जानस्ति सदत्प A. [19] अङ्गुत्याग्रं A. अंगुत्याग्रं C. [20] लैः चंद्रं C. बालाश्च ? Tib. [21] हृ A. C. K. [22] र्ग A. K. नान्यथा ? Tib.

तथा ह्यक्षरसंसक्तास्तत्त्वं नावेंति[1] मोमकम् ॥७१५॥
विलक्षणानि भूतानि रूपभावप्रवर्तका ।
भूतानां संनिवेशो ऽयं न भूतैर्भौतिकं[2] कृतम् ॥७१६॥
अग्निना दह्यते[3] रूपमब्धातुः[4] क्लेदनात्मकः[5] ।
वायुना कीर्यते रूपं कथं भूतैः प्रवर्तते ॥७१७॥
रूपं स्कन्धश्च विज्ञानं द्वयमेतन्न पञ्चकम् ।
पर्यायभेदं स्कन्धानां शतधा दे[6]शयाम्यहम् ॥७१८॥
चित्तचैत्तस्य भेदेन वर्तमानं प्रवर्तते ।
व्यतिभिन्नानि रूपाणि चित्तं[7] रूपं न भौतिकम्[8] ॥७१९॥
नीलाद्यपेक्षणं श्वेतं श्वेतं[9] नीलं[9] ह्यपेक्षणम्[10] ।
कार्यकारणमुत्पाद्य शून्यता अस्ति नास्ति च ॥७२०॥
साधनं साधकं साध्यं शीतोष्णे लक्ष्यलक्षणम्[11] ।
एवमाद्यानि सर्वाणि तार्किकैर्न प्रसाधिताः ॥७२१॥
चित्तं मनश्च षड्[12]ज्ञान्यविज्ञानान्यात्मसंयुता ।
एकत्वान्यत्वरहिता आलयो ऽयं प्रवर्तते ॥७२२॥
सांख्या वैशेषिका नग्नास्तार्किका ईश्वरोदिताः ।
सदसत्पक्षपतिता विविक्तार्थविवर्जिताः ॥७२३॥

[1] वि A. K. वैति C. नावेंति (魏) Tib. (=नावेन्ति i.e. नावयन्ति cf. देशेमि i.e. देशयामि) [2] गि A. K. [3] दाहहते C. ना दह्यते (魏) (唐) Tib. [4] ब्धांतुः A. K. ब्धातुं C. [5] कः A. K. कं C. [6] शक्रवद्दे A. च for श C. K. 我說如帝釋 (魏). 我說彼如怨 (唐) [7] त्त A. [8] क A. K. [9] Left out in A. [10] नीलं श्वेताद्यपेक्षणम् (魏) (唐) Tib. [11] ष्णलक्षणं A. [12] ड्वा A. K.

संस्थानाकृति[1]विशेषो[2] भूतानां नास्ति[3] भौतिकम् ।
तीर्थ्या वदन्ति जन्म[4] भूतानां भूतिकस्य[5] च[6] ॥७२४॥
अनुत्पन्ना यतो ये ऽन्ये तीर्थ्या कल्पन्ति[7] कारणैः ।
न च बुध्यन्ति मोहेन[8] सदसत्पक्षमाश्रिताः ॥७२५॥
चित्तेन सह संयुक्तं विसंयुक्तं[9] मनादिभिः ।
विशुद्धलक्षणं सत्त्वं ज्ञानेन सह तिष्ठति ॥७२६॥
कर्म यच्च भवेद्रूपं स्कन्धविषयहेतुकाः ।
सत्त्वाश्च निरुपादाना आरूप्ये नावतिष्ठति[10] ॥७२७॥
नैरात्म्यं[11] सत्यवादित्वं[12] सत्त्वाभावात्प्रसज्यते ।
नैरात्म्यवादिनो च्छेदो[13] विज्ञानस्याप्यसंभवः[14] ॥७२८॥
चत्वारः स्थितयस्तस्य रूपाभावात्कथं भवेत् ।
अध्यात्मबाह्याभावा[15]द्विज्ञानं न प्रवर्तते ॥७२९॥
अन्तराभविका[16] स्कन्धा यथैवेच्छन्ति[17] तार्किकाः[18] ।
तथारूप्योपपन्नस्य[19] भवो ऽरूपो न चास्ति किम् ॥७३०॥
अप्रयत्नेन मोक्षः स्यात्सत्त्वविज्ञानयोर्विना ।
तीर्थ्यवादो न संदेहो न च बुध्यन्ति तार्किकाः ॥७३१॥
रूपं च विद्यते तत्र आरूप्ये[20] नास्ति दर्शनम् ।

[1] त A. K. [2] षा A. वैशेष्यं ? [3] स्ती A. [4] जन्मानि ? [5] भौ ?
[6] वपि A. K. च C. [7] कल्पवि C. [8] ण C. [9] क्ते A. क्ति K. क्तं (唐) Tib. [10] ष्ठति left out in A. [11] त्म्य A. [12] त्वां A. त्व K. सत्त्ववादस्य Tib. [13] च्छ C. [14] वात् Tib. [15] ह्यनिर्भा Tib.
[16] भरि K. [17] त K. [18] ताः K. [19] प्या A. [20] प्य A.

तदभावो न सिद्धान्तो न यानं न च यायिनम् ॥ ७३२ ॥
इन्द्रियैः सह संयुक्तं विज्ञानं[1] वासनोद्भवम् ।
अष्टवदेकदेशं[2] हि क्षणे काले न गृह्णन्ति[3] ॥ ७३३ ॥
न[4] प्रवर्तति यदा[5] रूपं इन्द्रिया न च इन्द्रियैः ।
अतो हि[6] देशेति[7] भगवान्क्षणिका[8] इन्द्रियादयः ॥ ७३४ ॥
अनिर्धार्यं[9] कथं रूपं विज्ञानं संप्रवर्त्स्यते[10] ।
अप्रवृत्तं[11] कथं ज्ञानं संसारं जनयिष्यति[12] ॥ ७३५ ॥
उत्पत्त्यनन्तरं भङ्गं[13] न देशेन्ति विनायकाः ।
नैरन्तर्यं न[14] भावानां विकल्पस्पन्दिते[15][16] गतौ ॥ ७३६ ॥
इन्द्रिया इन्द्रियार्थाश्च मूढानां न तु पण्डिताः ।
बाला गृह्णन्ति[17] नामेन[18] आर्या वै अर्थकोविदाः ॥ ७३७ ॥
षष्ठं हि निरुपादानः[19] सोपादानो[20][21] न गृह्यते[22] ।
अनिर्धार्यं[23] वदन्त्यार्या अस्तिदोषैर्विवर्जिताः[24][25] ॥ ७३८ ॥
शाश्वतोच्छेदभीताश्च[26] तार्किका ज्ञानवर्जिताः ।

[1] व्यसं A. व्य K. [2] अदुष्टं A. K. अदुष्ट C. अष्टविधैक ? Tib. [3] ह्रंति A. K. ह्रति C. ह्लते ? [4] Left out in C. K. [5] यदो K. यया Tib. [6] In C. only. [7] मि A. K. [8] वां क्ष A. C. K. [9] परनिचार्यं A. अनिवार्यं C. अनियार्यं K. अनिर्धार्यं Tib. [10] प्र left out in A. [11] त्तिं A. C. K. त्तं (魏) (唐) Tib. [12] जा A. K. [13] उत्पत्यनरं भंग A. उत्पत्यनंरं भंग K. [14] च Tib. [15] ल्पः Tib. [16] स्य A. C. [17] ह्र A. C. K. [18] नाम्ना is the correct form. [19] निरुक्तपादाना A. निरुक्तपादानो K. °दानं ? (唐) Tib. [20] पा left out in A. [21] दानं ? (唐) Tib. [22] ह्र A. K. [23] र्यं A. अनिर्वार्यं C. [24] वि K. [25] ता A. [26] भिन्नाश्च C.

संस्कृतासंस्कृतात्मानं[1] न विशेषन्ति बालिशाः ॥७३९॥
एकत्वे विद्यते दानमन्यत्वे चापि[2] विद्यते ।
चित्तेन सह चैकत्वमन्यत्वं वै मनादिभिः ॥७४०॥
निर्धा[3]यते यदा[4] दानं चित्तं चैत्ताभिशब्दितम् ।
उपादानात्कथं तत्र एकत्वेनावधार्यते ॥७४१॥
सोपादानोपलब्धिश्च कर्मजन्मक्रियादिभिः ।
[5]अग्निवत्साधयिष्यन्ति सदृशासदृशैर्नयैः ॥७४२॥
यथा[6] हि अग्निर्युगप[7]द्दह्यते दाह्यदाहकौ ।
सोपादानस्तथा ह्यात्मा तार्किकैः किं न गृ[8]ह्यते ॥७४३॥
उत्पादाद्वाप्यनुत्पादाच्चित्तं वै भास्वरं सदा ।
दृष्टान्तं[9] किं न कुर्वन्ति तार्किका आत्मसाधकाः ॥७४४॥
विज्ञानगह्वरे मूढा[10]स्तार्किका नयवर्जिताः ।
इतस्ततः प्रधावन्ति[11] आत्मवादचिकीर्षया ॥७४५॥
प्रत्यात्मगतिगम्यश्च आत्मा वै शुद्धिलक्षणम्[12] ।
गर्भ[13]स्तथागतस्यासौ तार्किकानामगोचरः ॥७४६॥
उपादानउपादा[14]नोर्विभागस्कन्धयोस्तथा ।
लक्षणं यदि जानाति ज्ञानं संजायते नयम्[15] ॥७४७॥

[1] तैर्ह्यात्मा A. तैह्यात्मा K. [2] नापि Tib. [3] र्वा A. C. K. र्धा (唐) Tib.
[4] In K. only. [5] तथैवं ? Tib. [6] अथा A. K. [7] गव द A. गपत् द C. K.
[8] ग A. [9] दृष्टा तं A. K. [10] ढा ता A. मूढा ता K. [11] न्ते A. K.
[12] णः ? [13] गर्भः त K. [14] दा left out in A. [15] Left out in A.

आलयं गर्भ[1]संस्थानं मतं तीर्थ्यानुवर्णितम् ।
आत्मना सह संयुक्तं न च धर्माः प्रकीर्तिताः ॥ ७४८ ॥
एतेषां प्रविभागेन विमोक्षः सत्यदर्शनम् ।
भावानां[2] दर्श्य[3]हेयानां क्लेशानां स्याद्विशोधनम् ॥ ७४९ ॥
प्रकृति[4]प्रभास्वरं चित्तं गर्भं [5]ताथागतं शुभम् ।
उपादानं हि सत्त्वस्य अन्तानन्तविवर्जितम् ॥ ७५० ॥
कान्तिर्[6]यथा सुवर्णस्य जातरूपं च शर्करम्[7] ।
परिकर्मेण पश्यन्ति सत्त्वं[8] स्कन्धालयैस्तथा ॥ ७५१ ॥
न पुद्गलो न च स्कन्धा बुद्धो ज्ञानमनास्रवम्[9] ।
सदा[10]शान्तिं वि[11]भावित्वा गच्छामि शरणं ह्यहम्[12] ॥ ७५२ ॥
प्रकृतिप्रभास्वरं चित्तमुपक्लेशैर्[13]मनादिभिः ।
आत्मना सह संयुक्तं[14] देशेति वदतां[15]वरः ॥ ७५३ ॥
प्रकृतिप्रभास्वरं चित्तं[16] मनाद्यस्तस्य वै परः[17] ।
तै[18]राचितानि[19] कर्माणि यतः क्लिश्यन्ति ता[20]वुभौ ॥ ७५४ ॥
आगन्तुकैर[21]नाद्यैश्च क्लेशैरात्मा[22] प्रभास्वरः ।

[1] गर्ज्ञ K. [2] भावनां A. K. भावना C. [3] दृश ? [4] प्रकृति is repeated in K. [5] गर्भस्ता A. गर्भना C. गर्भस्त K. [6] र्निं य ? [7] राः A. K. राम् C. [8] त्व A. K. [9] नं नह्मनाश्र A. K. नमनाश्र C. [10] शा K. [11] नि A. K. [12] हृहत् A. K. [13] रनाचितैर् A. [15] संक्लेशं C. [15] ता K. [16] चित्त A. C. K. Tib. [17] प्रत्ययः for वै परः in (魏) [18] वै A. [19] त्ता A. C. [20] ता in C. only. [21] र्यणा A. रना C. Tib. र्पणा K. र्मना (魏) (唐) [22] त्म्यन् A. त्मां K.

संक्लिश्यन्ते उपेतश्च वस्त्रवन्[1]परिशुध्यते ॥७५५॥
मलाभावाद्यथा वस्त्रं[2] हेमं वा दोषवर्जितम् ।
तिष्ठन्ति न च नश्यन्ते आत्मा दोषैस्तथा विना[3] ॥७५६॥
वीणा[4]शङ्खे ऽथ भेर्यां च[5] माधुर्यस्वरसंपदा[6] ।
मृगयेद्यकोविदः कश्चित्तथा स्कन्धेषु पुद्गलम् ॥७५७॥
निधयो म[7]णयश्चापि पृथिव्यामुदकं त[8]था ।
विद्यमाना न दृश्यन्ति तथा स्कन्धेषु पुद्गलम् ॥७५८॥
चित्तचैत्तकलापांश्च स्वगुणां[9] स्कन्धसंयुताम् ।
अकोविदा[10] न गृह्ण[11]न्ति तथा स्कन्धेषु पुद्गलम्[12] ॥७५९॥
यथा हि ग[13]र्भो गर्भिण्या विद्यते न च दृश्यते ।
आत्मा हि तद्वत्स्कन्धेषु अयुक्तिज्ञो न पश्यति ॥७६०॥
औषधीनां यथा सारमग्निं वा इन्धनैर्यथा ।
न पश्यन्ति अयुक्तिज्ञास्तथा स्कन्धेषु पुद्गलम् ॥७६१॥
अनित्यतां[14] सर्वभावेषु शून्यतां च यथाबुधाः ।
विद्यमानां न पश्यन्ति तथा स्कन्धेषु पुद्गलम् ॥७६२॥
भूमयो वशिताभिज्ञा अभिषेकं च उत्तरम् ।
समाधयो विशेषाश्च असत्यात्मनि नास्ति वै[15] ॥७६३॥

[1] वस्तुवन्म्र A. K. वस्तुवत्म C. 猶如彼淨衣。而有諸垢染。(唐) [2] वस्तुं दे A.
[3] नाः A. K. [4] वीणा in C. only. [5] चा A. K. [6] पदः ?
[7] न A. K. [8] कस्त A. K. [9] णा A. K. [10] अविकोविदा A.
अविकोदा K. [11] ह्र A. C. K. [12] पुंगलं A. [13] ग left out in A.
[14] तां ? [15] यैः A. पैः K.

वैनाशिको[1] यदा[2] गत्वा ब्रूयाद्यद्यस्ति देश्यताम्[3] ।
स वक्तव्यो[4] भवेद्विज्ञैः स्वविकल्पं[5] प्रदर्शय[6] ॥ ७६४ ॥
नैरात्म्यवादिनो ऽभाष्या भिक्षुकर्माणि[7] वर्जय ।
बाधका बुद्धधर्माणां सदसत्पक्षदृष्टयः[8] ॥ ७६५ ॥
तीर्थदोषैर्वि[9]निर्मुक्तं[10] नैरात्म्यवनदाहकम्[11] ।
जाज्वलत्यात्मवादो ऽयं युगान्ताग्निरिवोत्थितः ॥ ७६६ ॥
खण्डेक्षुशर्करमध्वादिदधितिलघृतादिषु ।
स्वरसं विद्यते तेषु अनास्वाद्यं[12] न गृह्यते ॥ ७६७ ॥
पञ्चधा गृह्यमानश्च आत्मा स्कन्धसमुच्छ्रये ।
न च पश्यन्त्यविद्वांसो विद्वान्दृष्ट्वा[13] विमुच्यते ॥ ७६८ ॥
विद्यादिभिश्च दृष्टान्तै[14]श्चित्तं नैवावधार्यते ।
यत्र यस्माद्यदर्थं च समूहं नावधार्यते ॥ ७६९ ॥
विलक्षणा हि वै धर्माश्चित्तमेकं न गृह्यते ।
अहेतुरप्रवृत्तिश्च तार्किकाणां प्रसज्यते[15] ॥ ७७० ॥
चित्तानुपश्यी च[16] योगी चित्तं चित्ते[17] न पश्यति ।
[18]पश्यको दृश्यनिर्जातो[19] दृश्यं किंहेतुसंभवम् ॥ ७७१ ॥

[1] का K. [2] यथा C. [3] ब्रूयाद्यद्यस्ति दर्श्यतां A. द्रूपाद्यद्यस्ति दर्शनं C. ब्रूयाद्व्यर्व्यस्तिं दर्श्यतां K. [4] व्यो in C. only. [5] ल्प C. [6] यं A. K. [7] र्भ C. [8] ष्ट्वा यः A. ष्ट्व यः K. [9] वि K. [10] क्तो (魏) (唐) Tib. [11] कः (魏) (唐) Tib. [12] द्य K. [13] द्वां दृ A. K. [14] दृष्टांतै A. K. [15] ह्य A. [16] न A. K. [17] चै A. [18] न is added in A. K. [19] दृश्यंतिज्जातं A.

कात्यायनस्य गोत्रो ऽहं शुद्धावासाद्विनिस्सृतः[1] ।
देशेमि धर्मं सत्त्वानां निर्वाणपुरगामिनम् ॥७७२॥
पौराणिकमिदं वर्त्म अहं[2] ते च तथागताः ।
त्रिभिः सहस्रैः सूत्राणां निर्वाणमत्यदेशयन्[3] ॥७७३॥
कामधातौ तथारूप्ये न वै बुद्धो विबुध्यते ।
रूपधात्वकनिष्ठेषु वीतरागेषु बुध्यते ॥७७४॥
न बन्धहेतुर्विषया हेतुर्विषयबन्धनम् ।
ज्ञानवध्यानि क्लेशानि असिधारव्रतो[4] ह्ययम् ॥७७५॥
असत्यात्मानि[5] मायाद्या धर्मा नास्त्यस्ति[6] वै कथम् ।
बालानां ख्याति तथता कथं नास्ति निरात्मिका[7] ॥७७६॥
कृतकाकृतकत्वाद्धि नास्ति हेतुः प्रवर्तकः[8] ।
अनुत्पन्नमिदं सर्वं न च बालैर्[9]विभाव्यते ॥७७७॥
कारणानि [10]अनुत्पन्ना कृतकाः प्रत्ययाश्च ते ।
द्वावप्येतौ [11]न जनकौ कारणैः[12] कल्प्यते कथम् ॥७७८॥
प्राक्पश्चाद्युगपच्चापि हेतुं [13]वर्णन्ति तार्किकाः ।
प्रकाशघटशिष्याद्यैर्भावानां जन्म कथ्यते ॥७७९॥
नाभिसंस्कारिकैर्बुद्धा लक्षणैर्लक्षणान्विताः ।

[1] सृ A. K. [2] पौराणमिदं धर्ममहं A. C. K., but follow (魏) Tib. [3] णमिति देशयेत् A. C. K. णमत्यदेशयन् (唐) Tib. [4] णो C. [5] हि (魏) (唐) [6] णां A. K. [7] काः A. K. [8] का A. K. [9] त्मै A. ल्मै K. [10] ऽर A. K. ऋ C. ह्य ? [11] हि A. C. K. न (魏) (唐) Tib. [12] ल्प A. K. [13] र्णं C.

चक्रवर्तिगुणा ह्येते नैते बुद्धप्रभाषिताः[1] ॥ ७८० ॥
बुद्धानां[2] लक्षणं ज्ञानं दृष्टिदोषैर्विवर्जितम् ।
प्रत्यात्मदृष्टिगतिकं सर्वदोषविघातकम् ॥ ७८१ ॥
बधिरान्धकाणमूकानां[3] वृद्धानां वैरवृत्तिनाम् ।
बालानां च विशेषेण ब्रह्मचर्यं न विद्यते ॥ ७८२ ॥
आवृतैर्व्यञ्जनैर्दिव्यैर्[4]लक्षणैश्चक्रवर्तिनः[5] ।
व्यञ्जितैः प्रव्रजन्त्येके न चान्ये च प्रवादिनः[6] ॥ ७८३ ॥
व्यासः[7] कणाद[8] ऋषभः[9] कपिलः[10] शाक्यनायकः ।
निर्वृते[11] मम पश्चात्तु भविष्यन्त्येवमादयः ॥ ७८४ ॥
मयि निर्वृते वर्षशते[12] व्यासो वै भारत[13]स्तथा ।
पाण्डवाः[14] कौरवा[15] राम[16] पश्चान्मौरी[17] भविष्यति ॥ ७८५ ॥
मौर्या नन्दाश्च[18] गुप्ताश्च[19] ततो[20] म्लेच्छा[21] नृपाधमाः[22] ।
म्लेच्छान्ते शस्त्रसंक्षोभः[23] शस्त्रान्ते च कलिर्युगः[24] ।

[1] वि A. C. K. षि (魏) (唐) Tib. [2] ना A. K. [3] ल A. K. [4] आवृतैर्व्यञ्जितैश्चित्रै A. C. K., but follow (唐) Tib. [5] न K. [6] द्वौ चान्यौ च प्रमादिनौ Tib. [7] 毗耶娑 (魏) (唐) [8] 迦那 (魏) (唐) [9] 梨沙婆 (魏) (唐) [10] 迦毗羅 (魏) 劫比羅 (唐) [11] निवृते A. C. निर्वृत्ते K. [12] वर्षिनः ते A. वर्वनः ते K. [13] 園陀 (魏) 婆羅多 (唐) [14] 槃茶婆 (魏) 半擇娑 (唐) [15] 鳩羅婆 (魏) 憍拉婆 (唐) [16] 囉摩 (唐) [17] सौरी A. C. K. 失羅 (魏), but 毛盤 (魏) 冒狸 (唐) मौरी Tib. [18] 難陀 (唐) [19] गुप्तो A. गुप्तोश्च K. 掘多 (魏) 毱多 (唐) [20] ततो left out in A. K. [21] 無道王 (魏) 篾利車王 (唐) [22] धर्माः A. K. [23] शमु A. शस्तु C. 刀劍亂 (魏) 刀兵起 (唐) [24] 刀劍末世 (魏) 極惡時 (唐)

कलि[1]युगान्ते लोकैश्च सद्धर्मो हि न[2] भावि[3]त: ॥७८६॥
एवमाद्या[4]न्यतीतानि चक्रवद्भ्रमते जगत् ।
व[5]ह्न्यादित्यसमायोगात्कामधातुर्वि[6]दीर्यते[7] ॥७८७॥
पुन: संस्था[8]स्यते दिव्यं तस्मिँल्लोक: प्रवर्त्स्यते ।
चातुर्व[9]र्णा नृपेन्द्राश्च ऋषयो धर्ममेव[10] च ॥७८८॥
वेदाश्च[11] यज्ञं[12] दानं च[13] धर्मस्था वर्त्स्यते पुन: ।
आख्यायिकेतिहासा[14]द्यैर्ग[15]द्यचूर्णिकवार्त्तिकै: ।
एवं मया श्रुतादि[16]भ्यो लोको वै वि[17]भ्रमिष्यति ॥७८९॥
सुरक्ताकोटितं कृत्वा उपरिष्टाद्विवर्णयेत् ।
नीलकर्द[18]मगोमयै[19]: पटं वै संप्रचि[20]न[21]येत् ।
सर्ववासैर्विचि[22]त्रांगस्त्रीर्थ्य[23]लिङ्गविवर्जित: ॥७९०॥
शा[24]सनं देशयेद्योगी बुद्धानामेष वै ध्वज: ।
वस्त्रपूतं जलं पे[25]यं कटिसूत्रं च धारयेत् ।
उपपद्यमान[26]कालेन भैक्ष्यं[27] वा नीचवर्जितम् ॥७९१॥

[1] युं K. [2] सद्धर्म न A. K. [3] षि A. K. [4] न्य C. [5] वाह्या A. K. [6] वि A. K. [7] दह्यते ? (魏) (唐) Tib. [8] घ्य C. [9] व A. वर्ण्या (魏) (唐) Tib. [10] धर्म एव (魏) (唐) Tib. [11] च्च A. K. [12] यज्ञा A. K. [13] श्च A. K. [14] स्य A. K. [15] ग K. [16] एवन्यश्रुदि A. एवं मश्रुदि K. [17] चित्र A. C. वित्र K. विभ्र (魏) (唐) Tib. [18] कर्दकम A. [19] मयद्यै: A. K. मद्यै: C. नीकर्दमैर्गोमयाद्यै: (魏) (唐) Tib. [20] वि A. K. [21] तु A. [22] त्रा A. त्रां K. [23] स्त्रीथ्य A. स्त्रीर्थ्यं K. [24] आश A. K. [25] षे K. [26] नं C. [27] क्ष A. क्षं K.

दिव्यं संजायते[1] स्वर्गाद्द्वौ चान्यौ मानुषोद्भवौ[2] ।
रत्नलक्षणसंपन्नो[3] देवजन्मजगेश्वरः[4] ॥ ७९२ ॥
स्वर्गं[5] प्रभुञ्जते[6] द्वीपांश्चतुरो धर्मशासनः ।
भुक्त्वा तु सुचिरं[7] द्वीपान्तृष्णाया[8] विप्रणश्यति[9] ॥ ७९३ ॥
कृतयुगश्च त्रेता च द्वापरं कलिनस्तथा ।
अहं चान्ये कृतयुगे शाक्यसिंहः कलौ[10] युगे ॥ ७९४ ॥
सिद्धार्थः शाक्यतनयो[11] विष्णुर्व्यासो[12] महेश्वरः ।
एवमाद्यानि तीर्थ्यानि निर्वृते मे भविष्यति ॥ ७९५ ॥
एवं[13] मया श्रुतादिभ्यः[14] शाक्यसिंहस्य देशना ।
इतिहासं[15] पुरावृत्तं व्यासस्यैतद्भविष्यति ॥ ७९६ ॥
विष्णुर्महेश्वरश्चापि[16] सृष्टित्वं[17] देशयिष्यति ।
एवं मे[18] निर्वृते पश्चादेवमाद्यं भविष्यति ॥ ७९७ ॥
माता च मे वसुमतिः पिता विप्रः प्रजापतिः ।
कात्यायनसगोत्रो[19] ऽहं नाम्ना वै विरजो जिनः ॥ ७९८ ॥
चम्पायां हं समुत्पन्नः पितापि च पितामहः ।
सोमगुप्तेति नाम्नासौ सोमवंशसमुद्भवः ॥ ७९९ ॥

[1] स A. K. [2] षौ भ A. षो भ K. [3] न्नं A. C. K. न्नो (唐) [4] जगेश्वरः A. जनेश्वरं C. जगेस्वरः K. [5] स्वर्ग A. K. [6] भुंजंते A. K. [7] रां A. K. [8] पां तृ A. C. K. [9] ते A. K. [10] कलि A. K. [11] यः A. C. K. [12] ष्णव्यो A. ष्णुर्व्यो C. K. [13] एवमा K. [14] त्यो A. K. [15] हां C. [16] रः चा A. K. [17] शृ A. C. K. [18] म A. [19] न in C. only.

चीर्णव्रतः प्रव्रजितः सहस्रं देशितं नयम्[1] ।
व्याकृत्य[2] परिनिर्वास्ये[3] अभिषिच्य महामतिम् ॥ ८०० ॥
मतिर्दास्यति[4] धर्माय धर्मो[5] दास्यति मेखले[6] ।
मेखलः शिष्यो दौर्बल्यात्कल्पान्ते[7] नाशयिष्यति ॥ ८०१ ॥
काश्यपः क्रकुच्छन्दश्च कनकश्च[8] विनायकः[9] ।
अहं च विरजो ऽन्ये वै सर्वे ते कृतिनो[10] जिनाः ॥ ८०२ ॥
कृते युगे ततः पश्चान्मतिर्नामेन नायकः ।
भविष्यति महावीरः पञ्चज्ञेयावबोधकः[11] ॥ ८०३ ॥
न द्वापरे न त्रेतायां[12] न[13] पश्चाच्च[14] कलौ[15] युगे ।
संभवो लोकनाथानां संबुध्यन्ते[16] कृते युगे ॥ ८०४ ॥
अहार्या[17] लक्षणायाश्च अच्छिन्नदशकैः सह ।
मोर[18]चन्द्रसमैश्चन्द्रै[19]रुत्तरीयं विचित्रयेत् ॥ ८०५ ॥
[20]द्व्यङ्गुलं त्र्यङ्गुलं वापि चन्द्रं चन्द्रान्तरं भवेत् ।
अन्यथा चित्र[21]मानं हि लोभनीयं हि बालिशान्[22] ॥ ८०६ ॥
रागाग्निं शमयेन्नित्यं स्नायाद्वै ज्ञानवारिणा ।
त्रिशरणं त्रिसंध्यासु योगी कुर्यात्प्रयत्नतः ॥ ८०७ ॥

[1] नयः ? Tib. तो नयम् ? [2] वृ A. C. [3] स्य A. [4] स्यामि A. C. K., but (魏) (厝) Tib. [5] र्मा A. K. [6] ला A. K. [7] दौर्बल्यांते A. दौर्बल्सांते K. [8] को C. [9] कः in C. only. [10] भि is added in A. हि id. in K. [11] ज्ञ A. K. [12] न च त्रेत्रा A. [13] च is added in A. [14] च्च in C. only. [15] कलि A. K. [16] सु C. [17] दा is added in A. K. [18] मोर(=मयूर) a Prākrit form. [19] दैः उ C. [20] द्वा A. द्व्यगु K. [21] त्र्य A. K. [22] शां A. C. K.

इषुम[1]स्तरकाष्ठाद्या उ[2]त्क्षेपाद्यैः समीरिताः ।
एकः क्षिप्तः पतत्येकः कुशलाकुशलस्तथा ॥८०८॥
एकं[3] च बहुधा नास्ति वैलक्षण्या[4]न्न कुत्रचित् ।
वायुभा[5] ग्राहकाः सर्वे क्षेत्रवद्दायका[6] भवेत् ॥८०९॥
यद्येकं बहुधा वै स्यात्सर्वे[7] ह्यकृतका भवेत् ।
कृतकस्य विनाशः स्यात्तार्किकाणामयं नयः ॥८१०॥
दीपबीजवदेतत्स्यात्सादृ[8]श्याद्बहुधा कुतः ।
एकं हि बहुधा भवति तार्किका[9]णामयं नयः ॥८११॥
न तिलाज्जायते मुद्गो[10] न व्रीहिर्यवहेतुकः ।
गो[11]धूमधान्यजातानि एकं हि बहुधा कथम् ॥८१२॥
पा[12]णि[13]नि शब्दनेतारम[14]क्षपादो वृहस्पतिः[15] ।
लोकायत[16]प्रणेतारो ब्रह्मा गर्भो भविष्यति ॥८१३॥
कात्यायनः सूत्रकर्ता[17] यज्ञ[18]वल्कस्तथैव च ।
भु[19]ढुकज्योति[20]षाद्यानि[21] भविष्यन्ति कालौ[22] युगे ॥८१४॥

[1] पत्थ A. C. पंथ K. प्रस्त Tib. [2] त्रक्ष A. उक्षे C. उक्ष K. [3] वं C.
[4] नु A. K. [5] वाना A. K. न वायुना C. [6] द्वात्मका A. C. K.
[7] वं A. K. [8] स्या ब A. K. [9] काः ना A. K. [10] मुंगें A. K. मुंगौं C.
[11] धु A. [12] नि A. K. [13] निः (魏) (唐) Tib. [14] रं त्र A. C. K.
तास्य (魏) (唐) Tib. 波尼出聲論 (魏) 名手作聲論 (唐) [15] 阿叉波太白 (魏)
廣主造王論 (唐) [16] त left out in C. 世俗論 (魏) 順世論妄說 (唐) [17] 迦旃
延作經 (魏) 迦多延造經 (唐) [18] ल्कः त A. K. 夜婆迦亦爾 (魏) 樹皮仙說祀 (唐)
[19] पुड्डक A. K. बुड्डक C. भुधुक Tib. [20] षां C. 浮稠迦天文 (魏) 鵂鶹
出天文 (唐) [21] हि ? [22] कलै (魏) (唐) Tib.

बली पुण्यकृताल्लोकात्प्रजाभाग्याद्भविष्यति ।
रक्षकः सर्वधर्माणां राजा बली[1] महीपतिः ॥८१५॥
वाल्मीको[2] मसुराक्षश्च[3] कौटिल्य[4] आश्वलायनः[5] ।
ऋषयश्च महाभागा भविष्यन्ति अनागते ॥८१६॥
सिद्धार्थः शाक्य[6]तनयो भूतान्तः पञ्चचूडकः[7] ।
वाग्बलिरथ[8] मेधावी[9] पश्चात्काले भविष्यति ॥८१७॥
अजिनं[10] दण्डकाष्ठं[11] च मेखलाचक्रमण्डलम्[12] ।
ददाति ब्रह्मा महेश्वरो[13] वन[14]भूमौ व्यवस्थिते[15] ॥८१८॥
भविष्यति महायोगी नाम्ना वै विरजो मुनिः ।
मोक्षस्य देशकः शास्ता मुनीनामेष वै ध्वजः ॥८१९॥
ब्रह्मा ब्रह्मशतैः सार्धं देवैश्च बहुभिर्मम ।
अजिनं प्र[16]पात्य गगनात्तत्रैवान्तर्हितो वशी ॥८२०॥
सर्वचि[17]त्राणि वासांसि भै[18]क्ष्यपात्रं सुरैः सह ।
इन्द्रो[19] विरूढकाद्याश्च वनभूमौ ददन्ति मे ॥८२१॥

[1] 王婆離施地 (魏) [2] 彌迦 (魏) 青蟻 (唐) [3] मयसुरा° A. K. 摩脩羅 (魏) 赤豆 (唐) [4] 側僻 (唐) [5] 阿舒羅 (魏) 馬行 (唐) [6] कृ A. K. [7] 浮單陀五角 (魏) 步多五髻者 (唐) [8] वात्सली अर्थ A. K. वल्मल C., but follow (魏) (唐) Tib. 口力 (魏) [9] 黠慧 (魏) 聰慧 (唐) [10] 阿示那 (魏) 鹿皮 (唐) [11] 三拒 (魏) 三岐枝 (唐) [12] लामय कुण्डिकाम् (魏) (唐) Tib. 彌佉羅澡灌 (魏) 腰縚及軍持 (唐) [13] रा A. [14] वन in C. only. [15] तः C. [16] वा A. K. [17] त्वा A. K. [18] क्षा A. K. [19] न्द्र C.

अनुत्पादवादहेत्विष्टो[1] ऽजातो जायेत[2] वा पुनः ।
साधयिष्य[3]त्यनुत्पादं वाङ्मा[4]त्रं कीर्त्यते तु वै[5] ॥८२२॥
तस्याविद्या[6] कारणं तेषां चित्तानां संप्रवर्तिता ।
अन्तरा किमवस्थासौ यावद्रूपं न जानति ॥८२३॥
समनन्तरप्रध्वस्तं चित्तमन्यत्प्रवर्तते ।
रूपं न तिष्ठते किंचित्किमालम्ब्य प्रवर्त्स्यते ॥८२४॥
यस्माद्यत्र प्रवर्तेत[7] चित्तं वितथं[8]हेतुकम्[9] ।
न प्रसिद्धं कथं तस्य क्षणभङ्गो ऽवधार्यते ॥८२५॥
योगिनां हि समापत्तिः सुवर्णजिनधातवः[10] ।
[11]आभास्वरविमानानि अभेद्या लोककारणात् ॥८२६॥
स्थितयः प्राप्तिधर्माश्च बुद्धानां ज्ञानसंपदः ।
भिक्षु[12]त्वं समयप्राप्ति[13]र्दृष्टा वै क्षणिका कथम् ॥८२७॥
गन्धर्वपुरमायाद्या रूपा वै क्षणिका[14] कथम् ।
अभूतिका च भूतानि भूताः किंचित्कचागतौ[15] ॥८२८॥
अविद्याहेतुकं[16] चित्त[17]मनादिमतिसंचितम् ।
उत्पादभङ्गसंबद्धं तार्किकैः संप्रकल्प्यते ॥८२९॥
द्विविधः सांख्यवादश्च प्रधानात्परिणामिकम् ।

[1] स्विष्टौ A. [2] ह्याहेत A. K. [3] ष्यं A. K. [4] वाह्या A. C. [5] वैः A. K. [6] स्याद्विद्या A. C. K., but follow Tib. [7] प्रवर्तन्ते तच्चितं A. C. K. [8] र्थं A. K. [9] कः A. [10] व A. [11] रा A. [12] क्ष A. K. [13] प्ति A. K. [14] काः C. [15] भूता किंचित्कतां गता ? [16] कं A. [17] त्ते A.

प्रधाने विद्यते कार्यं कार्यं स्वात्मप्रसाधितम्[1] ॥८३०॥
प्रधानं सह भावेन गुणभेदः प्रकीर्तितः ।
कार्यकारणवैचित्र्यं[2] परिणामे न विद्यते ॥८३१॥
यथा हि पारतः[3] शुद्ध उप[4]क्लेशैर्न लिप्यते ।
आलयं हि तथा शुद्धमाश्रयः सर्व[5]देहिनाम् ॥८३२॥
हि[6]ङ्गुगन्धः प[7]लाण्डुश्च गर्भिण्या[8] गर्भदर्शन[9]म् ।
लवणादिभिश्च लावण्यं वीजवत्किं न वर्तते ॥८३३॥
अन्यत्वे च तदन्यत्वे[10] उभयं [11]नोभये तथा ।
अस्तित्वं निरुपादानं न [12]च नास्ति न संस्कृतम् ॥८३४॥
अश्ववद्विद्यते ह्यात्मा स्कन्धै[13]र्गोभाववर्जितम् ।
संस्कृ[14]ता[15]संस्कृतं वाच्यमवक्तव्यं स्वभावकम् ॥८३५॥
[16]युक्त्यागमाभ्यां दुर्दृष्ट्या[17] तर्कदृष्ट्या[17] मलीकृतम् ।
अनि[18]र्धार्य वदन्यात्मा नोपादाने न चान्यतः ॥८३६॥
दोषनि[19]र्धारणा ह्येषां स्कन्धेनात्मा विभाव्यते ।
एकत्वेन तदन्यत्वेन[20] न च बुध्यन्ति तार्किकाः ॥८३७॥
दर्पणे[21] उदके नेत्रे यथा विम्बं प्रदृश्यते ।

[1] तत् A. [2] दैविधा A. K. वैबोध्यं C. [3] परंत A. पारंतं K. [4] इं य A. [5] व is added in A. [6] 興蕖 (魏) 興渠 (唐) [7] पलंभू A. 葱 (魏) 葱氣 (唐) [8] Left out in A. [9] नः A. K. [10] च is added in A. K. [11] उभयमा A. K. [12] चा A. K. [13] गो left out in A. [14] तो A, [15] स K. [16] युक्ता A. C. K. [17] ष्ट्वा A. K. [18] वा A. C. K. धा (魏) (唐) Tib. [19] वा A. K. [20] एकत्वं च तदन्यत्वं ? Tib. [21] दर्पण A.

एकत्वान्यत्वरहितस्तथा स्कन्धेषु पुद्गलः ॥८३८॥
भाव्यं[1] विभावनाध्याता[2] मार्गः[3] सत्या च दर्शनम् ।
एतत्त्रयं विभावेन्तो मुच्यन्ते हि कुदर्शनैः ॥८३९॥
दृष्टं नष्टं यथा विद्युच्चक्रं[4] च्छिद्रगृहे यथा ।
परिणामः[5] सर्वधर्माणां बालैरिव न कल्पयेत्[6] ॥८४०॥
भावाभावेन निर्वाणं बालानां चित्तमोहनम् ।
आर्यदर्शनसद्भावाद्यथावस्थानदर्शनात् ॥८४१॥
उत्पादभङ्गरहितं[7] भावाभावविवर्जितम् ।
लक्ष्यलक्षण[8]निर्मुक्तं परिणामं विभावयेत् ॥८४२॥
तीर्थ्यवादविनिर्मुक्तं नामसंस्थान[9]वर्जितम् ।
अध्यात्मदृष्टिनिलयं परिणामं विभावयेत् ॥८४३॥
संस्पर्शपीडनाभ्यां[10] वै देवानां नारकाणि[11] च ।
अन्तराभविका नास्ति विज्ञानेन प्रवर्तिता[12] ॥८४४॥
जर[13]जाण्ड[14]जसंस्वेदाद्या[15] अन्तराभव[16]संभवाः ।
सत्त्वकाया यथा चित्रा गत्यागत्यां विभावयेत् ॥८४५॥
युक्त्या[17]गमव्यपेतानि निः[18]क्लेशपक्षक्षयावहा ।

[1] विभाव्यं is added in A. [2] नाख्यात्मा A. C. K. [3] मार्ग C. [4] द्य A. K.
[5] मं A. K. [6] बालैरेवं न कल्प्यताम् Tib. [7] त A. K. [8] क्ष्य A. K.
[9] स्था in C. only. [10] त्या A. त्याम्वै C. त्यां K. [11] नि A. K.
ण(=णां) ? [12] ताः A. K. [13] ल C. [14] जं A. K. [15] दजा C.
जराय्वण्डस्वेदजा Tib. [16] व in C. only. [17] युक्ता A. C. K. [18] नि A. K.
निः C. क्लेशपक्षक्षयावहा ? Tib. क्लेशपक्षाक्षयावहा (without निः) ?

तीर्थ्यदृष्टिप्रलापानि मतिमान्न समाचरेत् ॥८४६॥
आदौ निर्धार्यते [1]आत्मा उपादानाद्विशेषयेत् ।
अनिर्धार्य[2] विशेषन्ति[3] वन्ध्यापुत्रं[4] विशिष्यते[5] ॥८४७॥
पश्यामि सत्त्वान्दिव्येन प्रज्ञामांसविवर्जितम् ।
संस्कारस्कन्धनिर्मुक्तं[6] मूर्तिमान्सर्वदेहिनाम् ॥८४८॥
दुर्वर्णसुवर्णगतं[7] मुक्तामुक्तविशेषणम्[8] ।
दिव्यं संस्कार[9]विगतं सं[10]स्कारस्थं प्रपश्यते[11] ॥८४९॥
मूर्तिमा[12]न्गतिसंधौ[13] वै तार्किकानामगोचरम् ।
अतिक्रान्तमानुष्यगतिमहं नान्ये कुतार्किकाः ॥८५०॥
नास्त्यात्मा[14] जायते चित्तं कस्मादे[15]तत्प्रवर्तते ।
नदीदीपबीजवत्तस्य[16] निर्गमः किं न कथ्यते ॥८५१॥
अनुत्पन्ने च विज्ञाने अज्ञानादि न विद्यते ।
तदभावे[17] न विज्ञानं संतत्या[18] जायते कथम् ॥८५२॥
अध्वत्रयमनध्वश्च[19] अवक्तव्यश्च[20] पञ्चमः[21] ।
ज्ञेयमेतद्धि बुद्धानां तार्किकैः संप्रकीर्त्यते[22] ॥८५३॥

[1] From आत्मा till विज्ञानस्य in verse 870 (p. 374, l. 2) left out in A. [2] य K. [3] विशेषेन्तो (=विशेषयन्) ? Tib. [4] बध्यपुत्र K. [5] विशेषयेत् ? [6] क्तो ? [7] दुर्वर्णस्य सुवर्णतां C. [8] षताम् K. [9] वि left out in K. [10] स K. [11] श्यिरे C. K. [12] मार्ग K. [13] संला K. [14] त्म C. [15] ता K. [16] द्दीपशिखेवास्य C. [17] तदभावेन Tib. [18] भ्या C. [19] म K. [20] अवव्यक्त K. [21] मैः A. C. K. [22] र्यं A. C. K.

अव[1]क्तव्यश्च[2] सं[3]स्कारैर्ज्ञानं संस्कार[4]हेतुकम् ।
गृह्णा[5]ति संस्कारगतं ज्ञानं संस्कार[6]शब्दितम् ॥८५४॥
अस्मिन्सतीदं भवति प्रत्ययाश्चाप्यहेतुकाः ।
व्यञ्जकेनोपदि[7]श्यन्ते तदभावान्न कारकम्[8] ॥८५५॥
पवनं[9] हि व[10]ह्नेर्दहनं[11] प्रेरणे[12] न तु संभवे ।
प्रेर्यं निर्वायते तेन कथं सत्त्वप्रसा[13]धकाः ॥८५६॥
संस्कृता[14]संस्कृतं वाच्यमुपादानविवर्जितम् ।
कथं हि साधकस्तस्य वह्निर्बा[15]लैर्विकल्प्[16]यते ॥८५७॥
अन्योन्यस्य[17] बलाधानाद्वह्निर्वै जायते नृणाम् ।
सत्त्वः प्रवर्ति[18]तः केन वह्निवत्कल्प्[19]यते यतः ॥८५८॥
स्कन्धायत[20]नकदम्बस्य मनाद्याकारणो नु[21] वै[22] ।
नैरात्मा सार्थवन्नित्यं चित्तेन सह वर्तते ॥८५९॥
द्वावेतौ भास्वरौ नित्यं कार्यकारणवर्जितौ[23] ।
अग्निर्ह्यसाधकस्तेषां न च बुध्यन्ति तार्किकाः ॥८६०॥
चित्तं सत्त्वाश्च निर्वाणं प्रकृत्या भासुरा नु वै ।
दोषै[24]रनादिकैः क्लि[25]ष्टा अभिन्ना गगनोपमाः ॥८६१॥

[1] अव्य C. [2] व्यं च (魏) (唐) Tib. [3] स K. [4] रे K. [5] ह्र C. K. [6] वर्जितम् (魏) साधितम् Tib. [7] स्य K. [8] कः (魏) (唐) Tib. [9] मंचन K. नो ? [10] वं K. [11] ने (魏) (唐) वह्निमेघस्य ? Tib. [12] प्रहरणे A. C. [13] ह K. [14] स K. [15] बा K. [16] ल्प K. [17] स्य left out in K. [18] र्ति K. [19] ल्प्य ? [20] त left out in K. [21] मनाद्याः कारणानि Tib. [22] वैः K. [23] तै K. [24] र्स Tib. [25] स्वि K.

हस्तिश[1]य्यादि[2]वच्छा[3]सास्ती[4]र्थ्य[5]दृ[6]ष्ट्या मलीकृताः ।
मनोविज्ञानसं[7]छन्ना अभिरा[8]द्यैर्विशोधिताः ॥८६२॥
दृष्टाश्च[9] ते यथाभूतं दृष्ट्वा क्लेशा विदारि[10]ताः ।
दृष्टा[11]न्तगहनं[12] हित्वा गतास्ते आर्यगोचरम् ॥८६३॥
ज्ञानज्ञेयविभागेन अन्यत्वं कल्प्यते यतः ।
न च बुध्यन्ति दुर्मेधा अवक्तव्यश्च[13] कथ्यते ॥८६४॥
[14]भेरी यथा चन्दनजा बालैः[15] कुर्वन्ति [16]नान्यथा ।
चन्दनागरुसंकाशं तथा ज्ञानं कुतार्किकैः ॥८६५॥
उत्थितः खलुभक्तश्च पात्रसंश्रितमात्रकम्[17] ।
दोषैर्मुखविकाराद्यैः शुद्धं भक्तं समाचरेत् ॥८६६॥
इमं नयं यो ऽनुमिनोति युक्तितः प्रसादवान्योगपरो ह्य[18]कल्पनः ।
अनाश्रितो ह्यर्थप[19]रो भयेद[20]सौ हिरण्मयीं[21] धर्मगतिं प्रदीपयेत्॥८६७॥
भावाभावप्र[22]त्यय[23]मोहकल्पना कुदृष्टिजालं समलं हि तस्य तु ।
सरागदोषप्रतिघं निवर्तते निरञ्जनो बुद्धकैश्च सिच्यते ॥८६८॥
तीर्थ्या[24] कारणादिग्मूढा[25] अन्ये[26] प्रत्ययविह्वला[27]ः ।

[1] सर्पा A. C. K. [2] व left out in K. Tib. [3] या A. C. द्या K.
[4] छायावत्ती Tib. [5] र्थं K. [6] ष्ट्वा K. [7] स K. [8] ना K. [9] दृष्टश्च C.
दृष्ट्वाश्च K. [10] लि K. [11] दृष्ट्वां K. [12] ह्रं K. [13] व्यं च ? [14] भौ K.
[15] वालाः (魏) Tib. [16] श्र K. (魏) Tib. [17] नामकम् A. C. K. नामतम् Tib.;
but follow (魏) [18] हृ K. [19] प्रर C. [20] भवेन K. [21] हिशायी K.
[22] भवाभवप्र (魏) (唐) Tib. [23] ये K. [24] र्थ K. [25] ग्व्यूढा C.
ग् मूहा K. [26] न्य C. न्ये K. [27] ला C. K.

अन्ये अहेतुसद्भावादुच्छे[1]दमार्यमास्थिताः ॥८६९॥
विपाकपरिणामश्च विज्ञानस्य मनस्य च ।
मनो ह्यालय[2]संभूतं विज्ञानं च[3] मनो[4]भवम् ॥८७०॥
आलयात्सर्वचित्तानि प्रवर्तन्ति तरङ्गवत् ।
वासनाहेतुकाः सर्वे यथाप्रत्ययसंभवाः ॥८७१॥
क्षणभेदसंकलाबद्धाः स्वचित्तार्थवि[5]ग्राहिणः ।
संस्था[6]नलक्षणाकारा[7] मनोचक्ष्वादिसंभवाः ॥८७२॥
अनादिदोषसंब[8]द्धमर्थाभावा[9]सनोदितम् ।
बहिर्धा[10] दृश्यते चित्तं तीर्थदृष्टिनिवारणम् ॥८७३॥
तद्धेतुक[11]मेवान्यत्तदालम्ब्य प्रवर्तते ।
यदा[12] सं[13]जायते दृष्टिः संसारश्च प्रवर्तते ॥८७४॥
मायास्वप्ननिभा भावा[14] गन्धर्वनगरोपमाः ।
मरीच्युदकचन्द्राभाः स्वविकल्पं विभावयेत् ॥८७५॥
वृत्तिभेदात्तु तथता[15] सम्यग्ज्ञानं तदाश्रयम् ।
मायाशू[16]रंगमादीनि समाधीनि[17] पराणि च ॥८७६॥
भूमिप्रवे[18]शाल्लभते अभिज्ञा वशितानि च ।
ज्ञानमायोपमं कायमभिषिक्तं च सौगतम् ॥८७७॥

[1] दं आर्य K. दानार्य (魏) (唐) दानर्थ Tib. [2] यं A. K. [3] श्च A. K. [4] ज्ञ A. [5] गा C. [6] संस्कार A. [7] राः A. C. K. [8] द्धं A. K. [9] भवाम A. C. K. [10] ययाभं (唐) Tib. [11] चा A. K. One syllable is wanting in this puarter. [12] ततः (魏) (唐) Tib. [13] स K. संज्ञा Tib. [14] वाः A. C. K. [15] तां ? [16] मायासुदूरं C. K. [17] न A. C. K. [18] दे C.

निवर्तते[1] यदा[2] चित्तं निवृत्तं[3] पश्यतो जगत् ।
मुदितां लभते भूमिं बुद्धभूमिं[4] लभन्ति च ॥८७८॥
आश्रयेण[5] निवृत्तेन[6][7] विश्वरूपो मणिर्यथा ।
करोति सत्त्वकृत्यानि प्रतिविम्बं यथा जले ॥८७९॥
सदसत्पक्षनिर्मुक्तमुभयं नोभयं न च ।
प्रत्येकश्रावकीयाभ्यां[8] निष्क्रान्ता सप्तमी भवेत् ॥८८०॥
प्रत्यात्मदृष्टधर्माणां भूतभूमि[9]विशोधितम् ।
बाह्यतीर्थ्य[10]विनिर्मुक्तं महायानं[11] विनिर्दिशेत् ॥८८१॥
परावृत्तिवि[12]कल्पस्य च्युतिनाशविवर्जितम् ।
शशरोम[13]मणिप्रख्यं मुक्तानां देशयेन्नयम् ॥८८२॥
यथा हि ग्रन्थो ग्रन्थेन युक्त्या[14] युक्तिस्तथा यदि ।
अतो यु[15]क्तिर्भवेद्युक्तिम[16]न्यथा तु न कल्पयेत् ॥८८३॥
चक्षुः कर्म च तृष्णा च अविद्या योगिन[17]स्तथा[18] ।
चक्षूरूपे मनश्चापि आविलस्य मनस्तथा[19] ॥८८४॥
॥ इत्या[20]र्यसद्धर्मलङ्कावतारो[21] नाम महायानसूत्रं सगाथकं

[1] प्र (唐) [2] तदा (魏) (唐) Tib. [3] विक्लृप्तं ? (魏) (唐) Tib. [4] प्रवेशाद्धभूमिं A. लभंते बुद्धभूमिं K. [5] न A. K. [6] प्र (魏) (唐) Tib. [7] वृं A. K. [8] From श्राव° till परावृत्तिर्वि in verse 882 left out in A. [9] भूमिभूमि (魏) (唐) [10] र्थ्यं K. [11] णं C. K. [12] त्तिं वि ? Tib. [13] शृङ्ग for रोम (魏) (唐) [14] गङ्गेन युक्तो R. [15] मु R. [16] र (魏) Tib. [17] ण A. K. [18] अविद्य योनिशस्तया ? (魏) अविद्यायोनिशस्तया Tib. [19] येति A. K. R. [20] आर्य A. K. R. [21] र A. रत्ना C. ल K. रो R.

सनाप्तमिति[1] ॥

ये धर्मा हेतुप्रभवा[2] हेतुं तेषां[3] तथागतो ह्यवदत् ।
तेषां च यो निरोधो एवं वादी[4] महाश्रमणः ॥

[1] प्तं R. [2] भा A. K. भ C. [3] तु ते A. K. तुस्ते C. [4] दि A. R.

大正十二年六月廿五日　印刷
大正十二年六月三十日　發行

不許複製	記念出版六百部ノ内 No. 392

定價金拾圓

校訂者　南條文雄

發行者　南條先生古稀記念祝賀會
代表者　藤岡了淳

京都市西洞院通七條南入
印刷者　村上勘兵衞

京都市西洞院通七條南入
印刷所　内外出版株式會社印刷部

京都市上京區小山上總町
發行所　大谷大學

BL 1411 .L29A2 N2	768 693 Laṅkāvatāra sūtra (Nanjio)
My 21 '46	A. E. Dien Je 4 - '46
Je 4 - '46	RENEWEL Je 13 '46
Ja 4 - '49	Dr. W[illegible] - 8 '49
MAR 13 1950	[illegible] JAN 9 1951
FEB - 6 1951	Jane Sargent MAR 14 1951